वतमइतिशिवऽतमः॥२५॥बोधि।मे।अस्य।वचसः।यविष्ठ।मं
हिष्ठस्य।प्रभृतस्येतिप्रऽभृतस्य।स्वधावइतिस्वधाऽवः।पीयति।
त्वः।अनु।त्वः।गृणाति।वंदारुः।ते।तन्वम्।वंदे।अग्ने॥२६॥सः।
बोधि।सूरिः।मघवेतिमघऽवा।वसुपतइतिवसुऽपते।वसुदाव

न्निति वसुऽदावन्। युयोधि। अस्मत्। द्वेषांऽसि ॥३७॥ अप। इत। वि।
इत। वि। च। सर्पत। अतः। ये। अत्र। स्थ। पुराणाः। ये। च। नूतनाः। अदा
त्। यमः। अवसानमित्यवऽसानम्। पृथिव्याः। अक्रन्। इमम्। पितरः।
लोकम्। अस्मै ॥३८॥ संज्ञानमिति सम्ऽज्ञानम्। असि। कामधरणमि
ति कामऽधरणम्। मयि। ते। कामधरणमिति कामऽधरणम्। भूया
त्। अग्नेः। भस्म। असि। अग्नेः। पुरीषम्। असि। चितः। स्थ। परिचि
त इति परिऽचितः। ऊर्ध्वचित इत्यूर्ध्वऽचितः। श्रयध्वम् ॥३९॥ अयम्।

सः । अग्निः । यस्मिन् । सोमम् । इंद्रः । सुतम् । दधे । जठरे । वावशानः ।
सहस्रियम् । वाजम् । अत्यम् । न । सप्तिम् । ससवानिति ससऽवान् । सन् ।
स्तूयसे । जातवेद इति जातऽवेदः ॥ ५० ॥ अग्ने । यत् । ते । दिवि । वर्चः ।
पृथिव्याम् । यत् । ओषधीषु । अप्स्वित्यप्ऽसु । आ । यजत्र । येन । अंत
रिक्षम् । उरु । आततंथेत्याऽततंथ । त्वेषः । सः । भानुः । अर्णवः । नृचक्षा
इति नृऽचक्षाः ॥ ५१ ॥ अग्ने । दिवः । अर्णम् । अच्छ । जिगासि । अच्छ ।
देवान् । ऊचिषे । धिष्ण्याः । ये । याः । रोचने । परस्तात् । सूर्यस्य । याः । च ।

॥३२॥

नै२

अवस्तात् । उपतिष्ठंत इत्युपऽतिष्ठंते । आपः ॥ २ ॥ पुरीष्यासः । अग्नयः । प्रावणेभिः । प्रवणेभिरिति प्रऽवणेभिः । सजोषस इति सऽजोषसः । जुषंताम् । यज्ञम् । अद्रुहः । अनमीवाः । इषः । महीः ॥ ३ ॥ इळाम् । अग्ने । पुरुदंसमिति पुरुऽदंसम् । सनिम् । गोः । शश्वत्तममिति शश्वत्ऽतमम् । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजावेति विजा वा । अग्ने । सा । ते । सुमतिरिति सुऽमतिः । भूतु । अस्मे इत्यस्मे ॥ ४ ॥ चित् । असि । तया । देवतया । अंगिरस्वत् । ध्रुवा । सिद । परिचिदिति परिऽचि

॥३२॥

त्। असि। तया। देवतया। अंगिरस्वत्। ध्रुवा। सीद॥ ४८॥ लोकम्। पृण।
छिद्रम्। पृण। अथो इत्यथो। सीद। ध्रुवा। त्वम्। इंद्राग्नी इतीन्द्राग्नी। त्वा। बृ
हस्पतिः। अस्मिन्। योनौ। असीषदन्। असीसदन्नित्यसीसदन्॥ ४९॥
ताः। अस्य। सूददोहस इति सूदऽदोहसः। सोमम्। श्रीणंति। पृश्नयः॥ ज
न्मन्। देवानाम्। विशः। त्रिषु। आ। रोचने। दिवः॥ ५०॥ इन्द्रम्। विश्वाः।
अवीवृधन्। समुद्रव्यचसमिति समुद्रऽव्यचसम्। गिरः। रथीतमम्।
रथितममिति रथिऽतमम्। रथीनाम्। रथिनामिति रथिनाम्। वाजाना

म्।सत्पतिमितिसत्ऽपतिम्।पतिम्॥५८॥सम्।इतम्।सम्।कल्पेथा
म्।संप्रिया इतिसम्ऽप्रियौ।रोचिष्णू इति रोचिष्णू।सुमनस्यमाना इ
तिसुऽमनस्यमानौ।इषम्।ऊर्जम्।अभि।संवसाना इतिसम्ऽवसानौ॥५९॥
सम्।वाम्।मनांसि।सम्।व्रता।सम्।उं इत्यूँ।चित्तानि।आ।अकरम्।
अग्ने।पुरीष्य।अधिपा इत्यधिऽपाः।भव।त्वम्।नः।इषम्।ऊर्जम्।य
जमानाय।धेहि॥६०॥अग्ने।त्वम्।पुरीष्यः।रयिमानितिरयिऽमान्।
पुष्टिमानितिपुष्टिऽमान्।असि।शिवाः।कृत्वा।दिशः।सर्वाः।स्वम्।योनि

मा। इह। आ। असदः॥५१॥ मातेवेति माताऽइव। पुत्रम्। पृथिवी। पुरी
ष्यम्। अग्निम्। स्वे। योनौ। अभाः। उखा। ताम्। विश्वैः। देवैः। ऋतुभि
रित्यृतुऽभिः। संविदान इति सम्ऽविदानः। प्रजापतिरिति प्रजाऽपतिः।
विश्वकर्मेति विश्वऽकर्मा। वि। मुंचतु॥५२॥ असुन्वन्तम्। अयजमान
म्। इच्छ। स्तेनस्य। इत्याम्। अनु। इहि। तस्करस्य। अन्यम्। अस्मत्। इच्छ।
सा। ते। इत्या। नमः। देवि। निर्ऋत इति निःऽऋते। तुभ्यम्। अस्तु॥५३॥
नमः। सु। ते। निर्ऋत इति निःऽऋते। तिग्मतेज इति तिग्मऽतेजः। अयस्म

॥३४॥

यम्। वि। चृत्त। बंधम्। एतम्। यमेन। त्वम्। यम्या। सं। विदानेति सम्ऽ
विदाना। उत्तम इत्युत्ऽतमे। नाके। अधि। रोहय। एनम्॥ ५४॥ यस्याः।
ते। घोरे। आसन्। जुहोमि। एषाम्। बंधानाम्। अवसर्जनायेत्यवऽ
सर्जनाय। याम्। त्वा। जनः। भूमिः। इति। प्रमंदत इति प्रऽमंदते। नि
र्ऋतिमिति निःऽऋतिम्। त्वा। अहम्। परि। वेद। विश्वतः॥ ५५॥ यम्।
ते। देवी। निर्ऋतिरिति निःऽऋतिः। आबबंधेत्याऽबबंध। पाशम्।
ग्रीवासु। अविचृत्यमित्यविऽचृत्यम्। तम्। ते। वि। स्यामि। आयुषः।

॥३४॥

नामध्यानि। अप्सा। एतम्। पितुम्। अद्भिः। प्रसूतइतिप्रऽसूतः। नमः। नृ
सै। या। इदम्। चकार॥ ५६॥ निवेशनइतिनिऽवेशनः। संगमनइति
समऽगमनः। वसूनाम्। विश्वा। रूपा। अभि। चष्टे। शचीभिः। देवइवे
तिदेवःऽइव। सविता। सत्यधर्मेतिसत्यऽधर्मा। इंद्रः। न। तस्थौ। स
मरइतिसमऽअरे। पथीनाम्॥ ५७॥ सीरा। युंजंति। कवयः। युगा।
वि। तन्वते। पृथक्। धीराः। देवेषु। सुम्नयेतिसुम्नऽया॥ ५८॥ युनक्त।
सीरा। वि। युगा। तनुध्वम्। कृते। योनौ। वपत। इह। बीजम्। गिरा।

चाश्विभिः। सन्नरा इति सऽन्नराः। असत्। नुः। नेदीयः। इत्। सृण्यः
पक्वम्। आ। ईयात्॥ ५९॥ शुनम्। सु। फालाः। वि। तुदंतु। भूमिम्। शुन
म्। कीनाशाः। अभि। यंतु। वाहैः। शुनासीरा। हविषा। तोशमाना। सु
पिप्पला इति सुऽपिप्पलाः। ओषधीः। कर्त्तम्। अस्मै इत्यस्मै॥ ६०॥ घृते
ना। सीता। मधुना। सम्। अज्यताम्। विश्वैः। देवैः। अनुमतेत्यनुऽमता।
मरुद्भिरिति मरुत्ऽभिः। ऊर्जस्वती। पयसा। पिन्वमाना। अस्मान्। सी
ते। पयसा। अभि। आ। ववृत्स्व॥ ६१॥ लांगलम्। पवीरवत्। सुशे

वमितिसुऽशेवम्। सोमपित्सर्वितिसोमपिऽत्सरुः। तत्। उत्। वपति।
गाम्। अविम्। प्रफर्व्यमितिप्रऽफर्व्यम्। च। पीवरीम्। प्रस्थावदिति
प्रस्थाऽवत्। रथवाहणम्। रथवाहनमितिरथऽवाहनम्॥ ६२॥ का
मम्। कामदुघमितिकामऽदुघम्। धुक्ष्व। मित्राय। वरुणाय। च। इन्द्राय। अ य ४
श्विभ्यामित्यश्विऽभ्याम्। पूष्णे। प्रजाभ्यइतिप्रऽजाभ्यः। ओषधीभ्यः॥ ६३॥
वि। मुच्यध्वम्। अघ्न्याः। देवयानाइतिदेवऽयानाः। अगन्म। तमसः।
पारम्। अस्य। ज्योतिः। आपाम॥ ६४॥ सजूरितिसऽजूः। अब्दः। अय

वोग्निरिस्वयवः।ग्निः।उषाः।अरुणीभिः।सजोषसावितिसऽजोषसौ।
अश्विना।दंसोग्निरितिदंसःऽग्निः।सूरः।एतशेन।वैश्वानरः।इळ
या।घृतेन।स्वाहा॥७५॥याः।ओषधीः।पूर्वाः।जाताः।देवेभ्यः।त्रियुग
मितित्रिऽयुगम्।पुरा।मनै।नु।बभ्रूणाम्।अहम्।शतम्।धामानि।स
प्त।च॥७६॥शतम्।वः।अंब।धामानि।सहस्रम्।उत।वः।रुहः।अ
ध।शतक्रत्वइतिशतऽक्रत्वः।यूयम्।इमम्।मे।अगदम्।कृत।॥७७॥
ओषधीः।प्रति।गृभ्णीत।पुष्पवतीरितिपुष्पऽवतीः।प्रसूवरीरितिप्रऽ

सूवरीः।अश्वाइवेत्यश्वाःऽइव।सजित्वरीरितिसऽजित्वरीः।वीरुधः।
पारयिष्णवः॥६८॥ओषधीः।इति।मातरः।तत्।वः।देवीः।उप।ब्रुवे।
सनेयम्।अश्वम्।गाम्।वासः।आत्मानम्।तव।पूरुष।पुरुषेतिपुरुष॥६९॥
अश्वत्थे।वः।निषदनम्।निसदनमितिनिऽसदनम्।पर्णे।वः।वसतिः।
कृता।गोभाजइतिगोऽभाजः।इत्।किल।असथ।यत्।सनवथ।पूरु
षम्।पुरुषमितिपुरुषम्॥७०॥यत्र।ओषधीः।समग्मतेतिसम्ऽअ
ग्मत।राजानः।समिताविवेतिसमितौऽइव।विप्रः।सः।उच्यते।त्नि

षकूा रक्षोहेतिरक्षःऽहा। अमीवचातन इत्यमीवऽचातनः।७१। अश्वा
वतीम्। अश्ववतीमित्यश्वऽवतीम्। सोमावतीम्। सोमवतीमिति
सोमऽवतीम्। ऊर्जयन्तीम्। उदोजसमित्युत्ऽओजसम्। आ। अवित्सि।
सर्वाः। ओषधीः। अस्मै। अरिष्टतातय इत्यरिष्टऽतातये।७२। उत। स्म
ष्माः। ओषधीनाम्। गावः। गोष्ठादिव। गोस्थादिवेति गोस्थात्ऽइव।
ईरते। धनम्। सनिष्यन्तीनाम्। आत्मानम्। तव। पूरुष। पुरुषेति पुरुष ।७३।
इष्कृतिः। नाम। वः। माता। अथो इत्यथो। यूयम्। स्थ। निष्कृतीः। निःऽकृ

तीरितिनिःऽहरंतीः । सीराः । पतत्रिणीः । स्थन । यत् । आमयति । निः । हृ
थ ॥७४॥ अति । विश्वाः । परिष्ठाः । परिस्था इति परिऽस्थाः । स्तेनइवेति
स्तेनःऽइव । व्रजम् । अक्रमुः । ओषधीः । प्र । अचुच्यवुः । यत् । किम् । च ।
तन्वः । रपः ॥७५॥ यत् । इमाः । वाजयन् । अहम् । ओषधीः । हस्ते । आ
दध इत्याऽदध्ये । आत्मा । यक्ष्मस्य । नश्यति । पुरा । जीवगृभ इति जीवऽ
गृभः । यथा ॥७६॥ यस्य । ओषधीः । प्रसर्पथेति प्रऽसर्पथ । अंगमंग
मित्यंगम्ऽअंगम् । परुःपरुः । परुः परुरिति परुःऽपरुः । ततः । यक्ष्मम् ।

विऽबाधध्वे।उग्रः।मध्यमशीरिवेतिमध्यमशीःऽइवः॥७७॥साक
म्।यक्ष्म।प्र।पत।चाषेण।किकिदीविना।साकम्।वातस्य।ध्राज्या।सा
कम्।नस्य।निहाकयेतिनिऽहाकया॥७८॥अन्या।वः।अन्याम्।अवतु।
अन्या।अन्यस्याः।उप।अवत।ताः।सर्वाः।संविदानाइतिसम्ऽविदानाः।
इदम्।मे।प्र।अवत।वचः॥७९॥याः।फलिनीः।अफलाः।अपुष्पाः।याः।
च।पुष्पिणीः।बृहस्पतिप्रसूताइतिबृहस्पतिऽप्रसूताः।ताः।नः।मुंचंतु।
अंहसः॥८०॥मुंचंतु।मा।शपथ्यात्।अथोइत्यथो।वरुण्यात्।उत।

अथो इत्यथो । यमस्य । पड्वीशात् । सर्वस्मात् । देवकिल्बिषादिति देवऽ
किल्बिषात् ॥ ८१ ॥ अवयतीरित्यवऽयतीः । सम् । अवदंत । दि वः । ओष
धयः । परि । यम् । जीवम् । अश्नवामहै । न । सः । रिष्याति । पुरुषः । पुरु
ष इति पुरुषः ॥ ८२ ॥ याः । ओषधीः । सोमराज्ञीरिति सोमऽराज्ञीः । बह्वीः ।
शतविचक्षणा इति शतऽविचक्षणाः । तासाम् । असि । त्वम् । उत्तमेत्यु
त्ऽतमा । अरम् । कामाय । शम् । हृदे ॥ ८३ ॥ विष्ठिताः । विस्थिता इति विऽ
स्थिताः । पृथिवीम् । अनु । बृहस्पतिप्रसूता इति बृहस्पतिऽप्रसूताः । अ

स्यै।सम्।दत्त।वीर्यम्॥८४॥यः।च।अदूदम्।उपश्रृण्वंतीत्युपऽश्रृण्वंति।
याः।च।अदूरम्।परागता इति पराऽगताः।सखीः।संगस्येति सम्ऽगस्य।वी
रुधः।अस्यै।सम्।दत्त।वीर्यम्॥८५॥नाशयित्री।बलासस्य।अर्शसः।
उपचितामित्युपऽचिताम्।असि।अथो इत्यथो।शतस्य।यक्ष्माणाम्।
पाकारोरिति पाकऽअरोः।असि।नाशनी॥८६॥मा।वः।रिषत्।खनि
ता।यस्मै।च।अहम्।खनामि।वः।द्विपदिति द्विऽपत्।चतुष्पत्।च
तुःपदिति चतुःऽपत्।अस्माकम्।सर्वम्।अस्तु।अनातुरम्॥८७॥

ओषधयः। सम्। वदन्ते। सोमेन। सह। राज्ञा॥ यस्मै। कृणोति। ब्राह्मणः।
तम्। राजन्। पारयामसि॥ ८८॥ त्वाम्। गंधर्वाः। अखनन्। त्वाम्। इंद्रः।
त्वाम्। बृहस्पतिः। त्वाम्। ओषधे। सोमः। राजा। विद्वान्। यक्ष्मात्।
अमुच्यत॥ ८९॥ त्वम्। उत्तमेत्युत्ऽतमा। असि। ओषधे। तव। वृक्षाः। तु ४
उपस्तयः। उपस्तिः। अस्तु। सः। अस्माकम्। यः। अस्मान्। अभिदास
तीत्यभिऽदासति॥ ९०॥ मा। मा। हिंसीत्। जनिता। यः। पृथिव्याः।
यः। वा। दिवम्। सत्यधर्मेति सत्यऽधर्मा। वि। आनट्। यः। च। अपः।

॥५०॥

चंद्राः।प्रथमः।जजान।कस्मै।देवाय।हविषा।विधेम॥१॥अग्नि।
आ।वर्त्तस्व।पृथिवि।यज्ञेन।पयसा।सह।वपाम्।ते।अग्निः।इषितः।
अरोहत्॥२॥अग्ने।यत्।ते।शुक्रम्।चंद्रम्।पूतम्।च।यज्ञियम्।
तत्।देवेभ्यः।भरामसि॥३॥इषम्।ऊर्जम्।अहम्।इतः।आदम्।
ऋतस्य।योनिम्।महिषस्य।धाराम्।ँ मा।गोषु।विशतु।आ।तनूषु। आ५
जहामि।सेदिम्।अनिराम्।अमीवाम्॥४॥अग्ने।तव।श्रवः।वयः।
महि।भ्राजंते।अर्चयः।विभावसो इति विभाऽवसो।बृहद्भानो।इ

॥५०॥

तिबृहत्ऽभानो।शवसा।वाजम्।उक्थ्यम्।दधासि।दाशुषे।कवे।१५॥
पावकवर्चाइतिपावकऽवर्चाः।शुक्रवर्चाइतिशुक्रऽवर्चाः।अनु
नवर्चाइत्यनूनऽवर्चाः।उत्।इयर्षि।भानुना।पुत्रः।मातरा।विचर
न्नितिविऽचरन्।उप।अवसि।पृणक्षि।रोदसीइतिरोदसी।उभे
इत्यऽग्ने।१५।ऊर्जः।नपात्।जातवेदइतिजातऽवेदः।सुशस्तिभि
रितिसुशस्तिऽभिः।मंदस्व।धीतिभिरितिधीतिऽभिः।हितः।त्वेइ
तित्वे।इषः।सं।दधुः।भूरिवर्पसइतिभूरिऽवर्पसः।चित्रोतयइ

तिचित्रऽऊतयः। वामजाताइतिवामऽजाताः॥ १७ ॥ दूरज्यन्। अग्ने।
प्रथयस्व। जंतुभिरितिजंतुऽभिः। अस्मेइत्यस्मे। रायः। अमर्त्यः। सः। द
र्शतस्य। वपुषः। वि। राजसि। पृणक्षि। सानसिम्। क्रतुम्॥ १८ ॥ इ
ष्कर्तारम्। अध्वरस्य। प्रचेतसमितिप्रऽचेतसम्। क्षयन्तम्।
राधसः। महः। रातिम्। वामस्य। सुभगामितिसुऽभगाम्। महीम्। इ
षम्। दधासि। सानसिम्। रयिम्॥ १९ ॥ ऋतावानम्। ऋतवानमि
त्यृतऽवानम्। महिषम्। विश्वदर्शतमितिविश्वऽदर्शतम्। अग्नि

म्ना।सुम्नायं।दधिरे।पुरः।जनाः।श्रुत्कर्णमितिश्रुत्ऽकर्णम्।सुप्रथ
स्तममितिसुप्रथःऽतमम्।त्वा।गिरा।दैव्यम्।मानुषा।युगा॥१०॥आ।
प्यायस्व।सम्।एतु।ते।विश्वतः।सोम।वृष्ण्यम्।भव।वाजस्य।संगथ
इतिसम्ऽगथे॥१॥सम्।ते।पयांसि।सम्।उँ इति।यन्तु।वाजाः।स
म्।वृष्ण्यानि।अभिमातिषाहः।अभिमातिसह इत्यभिमातिऽसहः।
आप्यायमानइत्याऽप्यायमानः।अमृताय।सोम।दिवि।श्रवांसि।
उत्तमानीत्युत्ऽतमानि।धिष्व॥२॥आ।प्यायस्व।मदिन्तमेतिमदि

न्ऽतम। सोम। विश्वेभिः। अंशुभिरित्यंशुऽभिः॥ भव। नः। सप्रथ
स्तम इति सप्रथःऽतमः॥ सखा। वृधे॥३॥ आ। ते। वत्सः। मनः। यम
त्। परमात्। चित्। सधस्थादिति सधऽस्थात्। अग्ने। त्वांकामयेति
त्वाम्ऽकामया। गिरा॥४॥ तुभ्यम्। ता। अंगिरस्तमेत्यंगिरःऽतम।
विश्वाः। सुक्षितय इति सुऽक्षितयः। पृथक्। अग्ने। कामाय। येमिरे॥५॥
अग्निः। प्रियेषु। धामस्विति धामऽसु। कामः। भूतस्य। भव्यस्य।
सम्राडिति सम्ऽराट्। एकः। वि। राजति॥६॥ इति शुक्लयजुःका

ण्वपदसंहितायांत्रयोदशोध्यायः॥१३॥हरिः।ॐम्।मयि।गृह्णा
मि।अग्ने।अग्निम्।रायः।पोषाय।सुप्रजास्त्वायेतिसुप्रजाःऽत्वाय।
सुवीर्यायेतिसुऽवीर्याय।माम्।उँइत्यूँ।देवताः।सचंताम्॥१॥ब्र
ह्म।जज्ञानम्।प्रथमम्।पुरस्तात्।वि।सीमतः।सुरुचइतिसुऽरुचः।
वेनः।आवरित्यावः।सः।बुध्न्याः।उपमाइत्युपऽमाः।अस्य।विष्ठाः।
विस्थाइतिविऽस्थाः।सतः।च।योनिम्।असतः।च।वि।वरितिवः॥२॥
हिरण्यगर्भइतिहिरण्यऽगर्भः।सम्।अवर्तत।अग्रे।भूतस्य।जा

तः।पतिः।एकः।आसीत्।सः।दाधार।पृथिवीम्।उत।इमाम्।कस्मै।देवा ध्याम्।
य।हविषा।विधेम॥३॥द्रप्सः।चस्कंद।पृथिवीम्।अनु।ध्याम्।इमम्।च।
योनिम्।अनु।यः।च।पूर्वः।समानम्।योनिम्।अनु।संचरंतमितिस
म्ऽचरंतम्।द्रप्सम्।जुहोमि।अनु।सप्त।होत्राः॥४॥नमः।अस्तु।स
र्पेभ्यः।ये।के।च।पृथिवीम्।अनु।ये।अंतरिक्षे।ये।दिवि।तेभ्यः।स
र्पेभ्यः।नमः॥५॥याः।इषवः।यातुधानानामितियातुऽधानानाम्।ये।
वा।वनस्पतीन्।अनु।ये।वा।अवटेषु।शेरते।तेभ्यः।सर्पेभ्यः।नमः॥६॥

ये। वा। अमी इत्यमी। रोचने। दिवः। ये। वा। सूर्यस्य। रश्मिषु। येषाम्।
अप्स्वित्यप्ऽसु। सदः। कृतम्। तेभ्यः। सर्पेभ्यः। नमः॥ ८॥ कृणुष्व। पा
जः। प्रसितिमिति प्रऽसितिम्। न। पृथ्वीम्। याहि। राजेवेति राजाऽइव।
अमवानित्यमऽवान्। इभेन। तृष्वीम्। अनु। प्रसितिमिति प्रऽसिति
म्। द्रूणानः। अस्ता। असि। विध्य। रक्षसः। तपिष्ठैः॥ ९॥ तव। भ्रमासः।
आशुयेत्याशुऽया। पतन्ति। अनु। स्पृश। धृषता। शोशुचानः। तपूंषि।
अग्ने। जुह्वा। पतंगान्। असंदित इत्यसंऽदितः। वि। सृज। विष्वक्। उल्काः॥ १।

॥५५॥

प्रति। स्पशः। वि। सृज। तूर्णितमऽइति तूर्णिऽतमः। भव। पायुः। विशः।
अस्याः। अदब्धः। यः। नः। दूरे। अघशंसऽइत्यघऽशंसः। यः। अंति। अ
ग्ने। माकिः। ते। व्यथिः। आ। दधर्षीत्॥१०॥ उत्। अग्ने। तिष्ठ। प्रति। आ।
तनुष्व। नि। अमित्रान्। ओषतात्। तिग्महेतऽइति तिग्मऽहेते। यः। नः।
अरातिम्। समिधानेति समऽइधान। चक्रे। नीचा। तम्। धक्षि। अत
सम्। न। शुष्कम्॥११॥ ऊर्ध्वः। भव। प्रति। विध्य। अधि। अस्मत्। आविः।
कृणुष्व। दैव्यानि। अग्ने। अव। स्थिरा। तनुहि। यातुजूनामिति यातुऽ ॥५५॥

जूनाम्।अजामिम्।अजामिम्।प्रा।मृणीहि।शत्रून्॥१२॥अग्नेः।त्वा।तेजसा।सादयामि।इन्द्रस्य।त्वा।ओजसा।सादयामि॥१३॥भुवः।यज्ञस्य।रजसः।च।नेता।यत्र।नियुद्भिरिति नियुत्ऽभिः।सचसे।शिवाभिः।दिवि।मूर्द्धानम्।दधिषे।स्वर्षाम्।स्वस्सामिति स्वःऽसाम्।जुह्वाम्।अग्ने।चकृषे।हव्यवाहमिति हव्यऽवाहम्॥१४॥ध्रुवा।असि।धरुणा।आस्तृतेत्याऽस्तृता।विश्वकर्मणेति विश्वऽकर्मणा।मा।त्वा।समुद्रः।उत्।वधीत्।मा।सुपर्ण इति सुऽपर्णः।अव्यथमाना।पृथिवीम्।दृंह॥१५॥प्र

पृष्ठ १

जाऽपतिरिति प्रजाऽपतिः। त्वा। सादयतु। अपाम्। समुद्रस्य। एमन्। व्य
चस्वतीम्। प्रथस्वतीम्। प्रथस्व। पृथिवी। असि॥१५॥ भूः। भूमिः।
अदितिः। विश्वधाया इति विश्वऽधायाः। विश्वस्य। भुवनस्य। धर्त्री।
पृथिवीम्। यच्छ। पृथिवीम्। दृंह। पृथिवीम्। मा। हिंसीः॥१६॥ विश्वस्मै। प्राणाय।
अपानायेत्यपऽआनाय। [illegible]। व्यानायेति विऽआनाय। उदानायेत्युत्ऽ
आनाय। प्रतिष्ठायै। प्रतिस्थाया इति प्रतिऽस्थायै। चरित्राय। अग्निः।
त्वा। अभि। पातु। मह्या। स्वस्त्या। छर्दिषा। शंतमेनेति शम्ऽतमेन। तेन

या। देवतया। अंगिरस्वत्। ध्रुवा। सीद॥१८॥ कांण्डात्कांडादितिकाण्डा
त्ऽकांडात्। प्ररोहंतीतिप्रऽरोहंती। परुषःपरुषइतिपरुषःऽपरुषः।
परी। एव। नः। दूर्वे। प्र। तनु। सहस्रेण। शतेन। च॥१९॥ या। शतेन। प्र
तनोषीतिप्रऽतनोषि। सहस्रेण। विरोहसीतिविऽरोहसि। तस्याः। ते।
देवि। इष्टके। विधेम। हविषा। वयं॥२०॥ याः। ते। अग्ने। सूर्ये। रुचः। दि
वम्। आतन्वंतीत्याऽतन्वंति। रश्मिभिरितिरश्मिऽभिः। ताभिः। नः।
अद्य। सर्वाभिः। रुचे। जनाय। नः। कृधि॥२१॥ याः। वः। देवाः। सूर्ये।

रुचः। गोषु। अश्वेषु। याः। रुचः। इंद्राग्नी इतीन्द्राग्नी। ताभिः। सर्वाभिः।
रुचम्। नः। धत्त। बृहस्पते ॥२२॥ विराडिति विऽराट्। ज्योतिः। अधार
यत्। स्वराडिति स्वऽराट्। ज्योतिः। अधारयत्। प्रजापतिरिति प्रजाऽप
तिः। त्वा। सादयतु। पृष्ठे। पृथिव्याः। ज्योतिष्मतीम् ॥२३॥ विश्वस्मै। प्रा
णाय। अपानायेत्यपऽआनाय। व्यानायेति विऽआनाय। विश्वम्।
ज्योतिः। यच्छ। अग्निः। ते। अधिपतिरित्यधिऽपतिः। तया। देवतया।
अंगिरस्वत्। ध्रुवा। सीद ॥२४॥ मधुः। च। माधवः। च। वासंतिकौ।

१ अग्ने:

ता२

ऋतुरस्यृतूँऽअंतःश्लेषइत्यंतःऽश्लेषः।असि।कल्पेताम्।द्यावाप
थिवीइतिद्यावापृथिवी।कल्पँम्।आपः।ओषधयः।कल्पंताम्।अग्न
यः।पृथक्।मम।ज्यैष्ठ्याय।सव्रताइतिसऽव्रताः।ये।अग्नयः।सम
नसइतिसऽमनसः।अंतरा।द्यावापृथिवीइतिद्यावापृथिवी।इमे
इतीमे।वासंतिकौ।ऋतूइत्यृतू।अभिकल्पमानाइत्यभिऽकल्पमा
नाः।इंद्रमिवेतीन्द्रंऽइव।देवाः।अभिसंविशंत्वित्यभिऽसंविशंतु।
तया।देवतया।अंगिरस्वत्।ध्रुवेइतिध्रुवे।सीदतं॥२५॥अषाल्हा।

॥४७॥

असि। सहमाना। सहस्व। अरातीः। सहस्व। पृतनायत इति पृतनाऽ
यतः। सहस्रवीर्येति सहस्रऽवीर्या। असि। सा। मा। जिन्व॥२७॥ सहस्व।
इमाः। अभिमातीरित्यभिऽमातीः। सहस्व। पृतनायत इति पृतनाऽ
यतः। सहस्व। सर्वं। पाप्मानम्। सहमाना। असि। ओषधे॥२८॥ मधु।
वाताः। ऋतायते। ऋतयत इत्यृतऽयते। मधु। क्षरंति। सिंधवः। मा
ध्वीः। नः। संतु। ओषधीः॥२९॥ मधु। नक्तम्। उत। उषसः। मधुम
दिति मधुऽमत्। पार्थिवम्। रजः। मधु। द्यौः। अस्तु। नः। पिता॥३०॥

॥४७॥

मधुमानितिमधुऽमान्।नः।वनस्पतिः।मधुमानितिमधुऽमान्।
अस्तु।सूर्यः।माध्वीः।गावः।भवंतु।नः॥३०॥अपाम्।गंभन्।सीद।मा।
त्वा।सूर्यः।अभि।ताप्सीत्।मा।अग्निः।वैश्वानरः।अछिन्नपत्राइ
त्यछिन्नऽपत्राः।प्रजाइतिप्रऽजाः।अनुवीक्षस्वेत्यनुऽवीक्षस्व।अ
नु।त्वा।दिव्या।वृष्टिः।सचताम्॥३१॥त्रीन्।समुद्रान्।सम्।असृपत्।
स्वर्गानितिस्वःऽगान्।अपाम्।पतिः।वृषभः।इष्टकानाम्।पुरीषम्।
वसानः।सुकृतस्येतिसुऽकृतस्य।लोके।तत्र।गच्छ।यत्र।पूर्वे।परेता

इतिपराऽइताः॥ ३२॥ ऋत्वा। असि। धरुणा। इतः। जज्ञे। प्रथमम्। एभ्यः।
योनिभ्य इति योनिऽभ्यः। अधि। जातवेदा इति जातऽवेदाः। सः। गायत्र्या।
त्रिष्टुभा। त्रिस्तुभेति त्रिऽस्तुभा। अनुष्टुभा। अनुस्तुभेत्यनुऽस्तुभा। च।
देवेभ्यः। हव्यम्। वहतु। प्रजानन्निति प्रऽजानन्॥ ३३॥ इषे। राये। रमस्व।
सहसे। द्युम्ने। ऊर्जे। अपत्याय। संम्राडिति सम्ऽराट्। असि। स्वराडिति
स्वऽराट्। असि। सारस्वतौ। त्वा। उत्सौ। प्र। अवताम्॥ ३४॥ अग्ने। युक्ष्व।
हि। ये। तव। अश्वासः। देव। साधवः। अरम्। वहन्ति। मन्यवे॥ ३५॥

युक्ष्वा । हि । देवहूतमानिति देवऽहूतमान् । अश्वान् । अग्ने । रथीरिवे
ति रथीःऽइव । नि । होता । पूर्व्यः । सदः ॥ ३६ ॥ सम्यक् । स्रवन्ति । सरितः ।
न । धेनाः । अंतः । हृदा । मनसा । पूयमानाः । घृतस्य । धाराः । अभि । चा
कशीमि । हिरण्ययः । वेतसः । मध्ये । अग्नेः ॥ ३७ ॥ ऋचे । त्वा । रुचे ।
भासे । ज्योतिषे । त्वा । अभूत् । इदम् । विश्वस्य । भुवनस्य । वाजिनम् । अ
ग्नेः । वैश्वानरस्य । च ॥ ३८ ॥ अग्निः । ज्योतिषा । ज्योतिष्मान् । रुक्मः । वर्च
सा । वर्चस्वान् । सहस्रदा इति सहस्रऽदाः । असि । सहस्राय । त्वा ॥ ३९ ॥

आदित्यम्।गर्भम्।पयसा।सम्।अङ्ग्धि।सहस्रस्य।प्रतिमामितिप्रतिऽ
माम्।विश्वरूपमितिविश्वऽरूपम्।परि।वृङ्ग्धि।हरसा।मा।अभि।मꣳस्थाः।
शतायुषमितिशतऽआयुषम्।कृणुहि।चीयमानः॥ ४० ॥वातस्य।जूतिम्।
वरुणस्य।नाभिम्।अश्वम्।जज्ञानम्।सरिरस्य।मध्ये।शिशुम्।नदी
नाम्।हरिम्।अद्रिबुध्नमित्यद्रिऽबुध्नम्।अग्ने।मा।हिꣳसीः।परमे।व्यो
मन्नितिविऽओमन्॥ ४१ ॥अजस्रम्।इन्दुम्।अरुषम्।भुरण्युम्।अ
ग्निम्।ईळे।पूर्वचित्तिमितिपूर्वऽचित्तिम्।नमोभिरितिनमःऽभिः।

सः।पर्वभिरितिपर्वऽभिः।ऋतुशइत्यृतुऽशः।कल्पमानः।गाम्।मा।हि
ᳫंसीः।अदितिम्।विराजमितिविऽराजम्॥४३॥वरूत्रीम्।त्वष्टुः।वरु
णस्य।नाभिम्।अविम्।जज्ञानाम्।रजसः।परस्मात्।महीम्।साहस्री
म्।असुरस्य।मायाम्।अग्ने।मा।हिᳫंसीः।परमे।व्योमन्नितिविऽओ
मन्॥४४॥यः।अग्निः।अग्नेः।अधि।अजायत।शोकात्।पृथिव्याः।उ
त।वा।दिवः।परि।येन।प्रजाइतिप्रऽजाः।विश्वकर्मेतिविश्वऽकर्मा।
जजान।तम्।अग्ने।हेळः।परि।ते।वृणक्तु॥४५॥इमम्।मा।हिᳫंसीः।

॥५०॥

द्विपादमिति द्विऽपादम्। पशुम्। सहस्राक्षेति सहस्रऽअक्ष। मेधाय।
चीयमानः। मयुम्। पशुम्। मेध्यम्। अग्ने। जुषस्व। तेन। चिन्वानः। तन्वः।
नि। सीद। मयुम्। ते। शुक्। ऋच्छतु। यम्। द्विष्मः। तम्। ते। शुक्। ऋच्छतु॥४५॥
एकशफमित्येकऽशफम्। पशुम्। कनिक्रदम्। वाजिनम्। वाजिनेषु।
गौरम्। आरण्यम्। अनु। ते। दिशामि॥४६॥ साहस्रम्। शतधारमिति
शतऽधारम्। उत्सम्। व्यच्यमानमिति विऽअच्यमानम्। सरिरस्य।
मध्ये। घृतम्। दुहानाम्। अदितिम्। जनाय। गवयम्॥४७॥ ऊर्णायु

॥५०॥

म्।वरुणस्य।नाभिम्।त्वचम्।पशूनाम्।द्विपदामितिद्विऽपदाम्।
चतुष्पदाम्।चतुःपदामितिचतुःऽपदाम्।त्वष्टुः।प्रजानामितिप्रऽजा
नाम्।प्रथमम्।जनित्रम्।उग्रम्॥४८॥अजः।हि।अग्नेः।अजनिष्ट।
शोकात्।सः।अपश्यत्।जनितारम्।अग्रे।तेन।देवाः।देवताम्।अ
५ आयन् ग्रम्।आयन्।तेन।रोहम्।उप।मेध्यासः।शरभम्॥४९॥त्वम्।य
विष्ठ।दाशुषः।नॄन्।पाहि।शृणुधि।गिरः।रक्ष।तोकम्।उत।त्मना॥५०॥
अपाम्।त्वा।एमन्।सादयामि।ओद्मन्।भस्मन्।ज्योतिषि।अयने।

॥५१॥

अर्णवे। समुद्रे। सरिरे। क्षये। सधिंषि। सदने। सधस्थ इति सधऽ
स्थे। योनौ। पुरीषे। पाथसि। गायत्रेण। त्रैष्टुभेन। त्रैस्तुभेनेति त्रैस्तुभे
न। जागतेन। आनुष्टुभेन। आनुस्तुभेनेत्यानुऽस्तुभेन। पाङ्क्तेन। त्वा।
छन्दसा। सादयामि॥ ५१॥ अयम्। पुरः। भुवः। तस्य। प्राणः। भौवाय
न इति भौवऽआयनः। वसन्तः। प्राणायन इति प्राणऽआयनः। गा
यत्री। वासन्ती॥ ५२॥ गायत्र्यै। गायत्रम्। गायत्रात्। उपांशुरित्यु
पऽअंशुः। उपांशोरित्युपऽअंशोः। त्रिवृदिति त्रिऽवृत्। त्रि

॥५१॥

वृतइति त्रिऽवृतः।रथन्तरमिति रथमऽन्तरम्।वसिष्ठः।ऋषिः।प्रजा
पतिगृहीतयेति प्रजाऽपतिऽगृहीतया।त्वया।प्राणम्।गृह्णामि।प्रजा
भ्यइति प्रऽजाभ्यः॥५४॥अयम्।दक्षिणा।विश्वकर्मेति विश्वऽक
र्मा।तस्य।मनः।वैश्वकर्मणमिति वैश्वऽकर्मणम्।ग्रीष्मः।मानसः।
त्रिष्टुप्।त्रिस्तुबिति त्रिऽस्तुप्।ग्रैष्मी॥५५॥त्रिष्टुभः।त्रिस्तुभइति
त्रिऽस्तुभः।स्वारम्।स्वारात्।अन्तर्याम इत्यंतःऽयामः।अंतर्यामादित्यं
तःऽयामात्।पंचदशइति पंचऽदशः।पंचदशादिति पंचऽदशात्।

बृहत्।भरद्वाजइतिभरत्ऽवाजः।ऋषिः।प्रजापतिगृहीतयेति
प्रजापतिऽगृहीतया।त्वया।मनः।गृह्णामि।प्रजाभ्यइतिप्रऽजाभ्यः॥५५॥
अयम्।पश्चात्।विश्वव्यचाइतिविश्वऽव्यचाः।तस्य।चक्षुः।वैश्व
व्यचसमितिवैश्वऽव्यचसम्।वर्षाः।चाक्षुष्यः।जगती।वार्षी॥५६॥
जगत्याः।ऋक्सममित्यृक्ऽसमं।ऋक्समादित्यृक्ऽसमात्।शुक्रः।
शुक्रात्।सप्तदशइतिसप्तऽदशः।सप्तदशादितिसप्तऽदशात्।
वैरूपम्।जमदग्निरितिजमत्ऽअग्निः।ऋषिः।प्रजापतिगृहीत

येति प्रजापतिऽगृहीतया । त्वया । चक्षुः । गृह्णामि । प्रजाभ्य इति प्रऽ
जाभ्यः ॥ ५७ ॥ इदम् । उत्तरात् । स्वरिति स्वः । तस्य । श्रोत्रम् । सौवम् । शु
रत् । श्रौत्री । अनुष्टुप् । अनुस्तुबित्यनुऽस्तुप् । शारदी ॥ ५८ ॥ अनु
ष्टुभः । अनुस्तुभ इत्यनुऽस्तुभः । ऐडम् । ऐडात् । मंथी । मंथिनः ।
एकविंश इत्येकऽविंशः । एकविंशादित्येकऽविंशात् । वै
राजम् । विश्वामित्रः । ऋषिः । प्रजापतिगृहीतयेति प्रजापतिऽगृ
हीतया । त्वया । श्रोत्रम् । गृह्णामि । प्रजाभ्य इति प्रऽजाभ्यः ॥ ५९ ॥ इ

यम्। उपरि। मतिः। तस्यै। वाक्। मात्या। हेमंतः। वाच्यः। पङ्क्तिः। हैमंती॥ ६०॥
पङ्क्ये। निधनवदिति निधनऽवत्। निधनवतइति निधनऽवतः।
आग्रयणः। आग्रयणात्। त्रिणवत्रयस्त्रिंशौ। त्रिनवत्रयस्त्रिं
शाइति त्रिनवत्रयस्त्रिंशौ। त्रिणवत्रयस्त्रिंशाभ्याम्। त्रिनव
त्रयस्त्रिंशाभ्यामिति त्रिनवत्रयस्त्रिंशाभ्याम्। शाक्वररैवइति
शाक्वररैवते। विश्वकर्मेति विश्वऽकर्मा। ऋषिः। प्रजापतिगृही
तयेति प्रजापतिऽगृहीतया। तया। वाचम्। गृह्णामि। प्रजाभ्यइ

तिग्मऽजम्भ्यः॥ लोकम्। पृण। ताः। अस्य। इन्द्रम्। विश्वाः॥ ६१॥ इति
शुक्लयजुः काण्वपदानां चतुर्दशो ध्यायः॥ १४॥ हरिः ॐम्॥ ध्रुवक्षि
तिरिति ध्रुवऽक्षितिः। ध्रुवयोनिरिति ध्रुवऽयोनिः। ध्रुवा। असि।
ध्रुवम्। योनिम्। आ। सीद। साधुयेति साधुऽया। उख्यस्य। केतुम्। प्र
थमम्। जुषाणा। अश्विना। अध्वर्यू इत्यध्वर्यू। सादयताम्। इह। त्वा॥ १॥
कुलायिनी। घृतवतीति घृतऽवती। पुरंधिरिति पुरंऽधिः। स्योने। सीद।
सदने। पृथिव्याः। अभि। त्वा। रुद्राः। वसवः। गृणंतु। इमा। ब्रह्म। पीपिहि।

सौभगाय ॥२॥ स्वैः । दक्षैः । दक्षपितेति दक्षऽपिता । इह । सीद । देवानाम् ।
सुम्ने । बृहते । रणाय । पितेवेति पिताऽइव । एधि । सूनवे । आ । सुशेवेति सुऽ
शेवा । स्वावेशेति सुऽआवेशा । तन्वा । सम् । विशस्व ॥३॥ पृथिव्याः । पुरी
षम् । असि । अप्सः । नाम । ताम् । त्वा । विश्वे । अभि । गृणंतु । देवाः । स्तोमपृ
ष्ठेति स्तोमऽपृष्ठा । घृतवतीति घृतऽवती । इह । सीद । प्रजावदिति प्रजाऽ
५३ वत् । अस्मे इत्यस्मे । द्रविणा । आ । यजस्व ॥४॥ अदित्याः । त्वा । पृष्ठे । सा
दयामि । अंतरिक्षस्य । धर्त्रीम् । विष्टंभनीम् । दिशाम् । अधिपत्नीम्

सधिऽपत्नीम्।भुवनानाम्।ऊर्मिः।द्रप्सः।अपाम्।असि।विश्वक
र्मेतिविश्वऽकर्मा।ते।ऋषिः।शुक्रः।शुचिः।ग्रैष्मौ।ऋतूइत्यृतू॥५॥स
जूरितिसऽजूः।ऋतुभिरित्यृतुभिः।विधाभिरितिविऽधाभिः।देवैः।
देवैः।वयोनाधैरितिवयःऽनाधैः।अग्नये।त्वा।वैश्वानराय।वसु
भिरितिवसुऽभिः।रुद्रैः।आदित्यैः।विश्वैः।देवैः॥६॥प्राणम्।मे।पा
हि।अपानमित्यपऽआनम्।व्यानमितिविऽआनम्।चक्षुः।मे।उर्व्या।
वि।भाहि।श्रोत्रम्।मे।श्लोकया॥७॥अपः।पिन्व।ओषधीः।जिन्व।

॥५५॥

द्विपादितिद्विऽपात्।अव।चतुष्पात्।चतुःपादितिचतुःऽपात्।दिवः।

पाहि

वृष्णिम्।आ।रुरय॥८॥मूर्द्धा।वय।प्रजापतिरितिप्रजाऽपतिः।छं
दः।क्षत्रम्।मयंदम्।विष्टंभः।अधिपतिरित्यधिऽपतिः।विश्वकर्मे
तिविश्वऽकर्मा।परमेष्ठी।परमेष्ठीतिपरमेऽस्थी॥९॥बस्तः।विव
लमितिविऽवलम्।वृष्णिः।विशालमितिविऽशालम्।पुरुषः।तंद्रम्।
व्याघ्रः।अनाधृष्टम्॥१०॥सिंहः।छंदिः।पष्ठवाडितिपष्ठऽवाट्।
बृहती।उक्षा।ककुप्।ऋषभः।सतोबृहतीतिसतःऽबृहती॥११॥

॥५५॥

अनड्वान्। पंक्तिः। धेनुः। जगती। त्र्यविरिति त्रिऽअविः। त्रिष्टुप्। त्रि
स्तुबिति त्रिऽस्तुप्। दित्यवाडिति दित्यऽवाट्। विराडिति विऽराट्॥१२॥
पंचाविरिति पंचऽअविः। गायत्री। त्रिवत्स इति त्रिऽवत्सः। उष्णिक्।
तुर्यवाडिति तुर्यऽवाट्। अनुष्टुप्। अनुस्तुबित्यनुऽस्तुप्। छंदः॥१३॥
इंद्राग्नी इतींन्द्राग्नी। अव्यथमानाम्। इष्टकाम्। दृंहतम्। युवम्। पृष्ठे
न। द्यावापृथिवी इति द्यावापृथिवी। अंतरिक्षम्। च। वि। बाधसे॥१४॥
विश्वकर्मेति विश्वऽकर्मा। त्वा। सादयतु। अंतरिक्षस्य। अंतरिक्षम्।

वायुः ॥१५॥ राज्ञी। असि। प्राची। दिक्। । विराडिति विऽराट्।
दक्षिणा। सम्राडिति सम्ऽराट्। प्रतीची। स्वराडिति स्वऽराट्। उदी
ची। अधिपत्नीत्यधिऽपत्नी। असि। बृहती। दिक्। नभः। नभस्यः।
वार्षिकौ। इषः। ऊर्जः। शारदौ। ऋतू इत्यृतू ॥१६॥ आयुः। मे। पाहि।
प्राणम्। अपानमित्यपऽआनम्। व्यानमिति विऽआनम्। चक्षुः।
श्रोत्रम्। वाचम्। पिन्व। मनः। जिन्व। आत्मानम्। पाहि। ज्योतिः। मे।
यच्छ ॥१७॥ मा। छन्दः। प्रमेति प्रऽमा। प्रतिमेति प्रतिऽमा। अस्रीव

यः।पंक्तिः।उच्छिक्॥१८॥बृहती।अनुष्टुप्।अनुस्तुबित्यनुऽस्तुप्।
विराडिति विऽराट्।गायत्री।त्रिष्टुप्।त्रिस्तुबिति त्रिऽस्तुप्।जगती॥१९॥
पृथिवी।अंतरिक्षम्।द्यौः।समाः।नक्षत्राणि।वाक्॥२०॥मनः।कृ
षिः।हिरण्यम्।गोः।अजा।अश्वः।छंदः॥२१॥अग्निः।देवता।वातः।
सूर्यः।चंद्रमाः।वसवः।रुद्राः।आदित्याः।मरुतः।विश्वे।देवाः।बृह
स्पतिः।इन्द्रः।वरुणः।देवता॥२२॥मूर्द्धा।असि।राट्।ध्रुवा।धरुणा।
धर्त्री।धरणी।आयुषे।व र्चसे।कृष्यै।क्षेमाय॥२३॥यंत्री।राट्।

यंत्री।यमनीं।ध्रुवा।धरित्री।इषे।ऊर्जे।रय्यै।पोषाय।त्वा॥२४॥आ
शुः।त्रिवृदिति त्रिऽवृत्।भांतः।पंचदशइति पंचऽदशः।व्योमेति विऽ
ओम।सप्तदशइतिसप्तऽदशः।धरुणः।एकविंशइत्येकऽविंशः।
प्रतूर्त्तिरितिप्रऽतूर्त्तिः।अष्टादशइत्यष्टाऽदशः।तपः।नवदशइतिनवऽ न४
दशः।अभीवर्तः।अभिवर्तइत्यभिऽवर्तः।सविंशइतिसऽविंशः।
वर्चः।द्वाविंशः।संभरणइतिसम्ऽभरणः।त्रयोविंशइतित्र
यःऽविंशः।योनिः।चतुर्विंशइतिचतुःऽविंशः॥२५॥गर्भाः।

पंचविꣳशइतिपंचऽविꣳशः।ओजः।त्रिणवः।त्रिनवइतित्रिऽन
वः।क्रतुः।एकत्रिꣳशइत्येकऽत्रिꣳशः।प्रतिष्ठा।प्रतिस्थेतिप्रतिऽ
स्था।त्रयस्त्रिꣳशइतित्रयःऽत्रिꣳशः।ब्रध्नस्य।विष्टपम्।चतुस्त्रि
ꣳशइतिचतुःऽत्रिꣳशः।नाकः।षट्त्रिꣳशइतिषट्ऽत्रिꣳशः।विवर्त्त
इतिविऽवर्त्तः।अष्टाचत्वारिꣳशइत्यष्टाऽचत्वारिꣳशः।धर्त्रम्।
चतुष्टोमः।चतुस्तोमइतिचतुःऽस्तोमः॥२३॥अग्नेः।भागः।असि।
दीक्षायाः।आधिपत्यमित्याधिऽपत्यम्।ब्रह्म।स्पृतम्।त्रिवृदिति

त्रिऽवृत्। स्तोमः। इन्द्रस्य। भागः। असि। विष्णोः। आधिपत्यमि
त्याधिऽपत्यम्। क्षत्रम्। स्पृतम्। पंचदशइति पंचऽदशः। स्तोमः॥२७॥
नृचक्षसामिति नृऽचक्षसाम्। भागः। असि। धातुः। आधिपत्य
मित्याधिऽपत्यम्। जनित्रम्। स्पृतम्। सप्तदशइति सप्तदशः। स्तो
मः। मित्रस्य। भागः। असि। वरुणस्य। आधिपत्यमित्याधिऽपत्य
म्। दिवः। वृष्टिः। वाताः। स्पृताः। एकविंशइत्येकऽविंशः। स्तो
मः॥२८॥ वसूनाम्। भागः। असि। रुद्राणाम्। आधिपत्यमित्याधिऽ

पत्यम्।चतुष्पात्।चतुःपादितिचतुःऽपात्।स्पृतम्।चतुर्विꣳश
इतिचतुःऽविꣳशः।स्तोमः।आदित्यानाम्।भागः।असि।मरुताम्।
आधिपत्यमित्याधिऽपत्यम्।गर्भाः।स्पृताः।पंचविꣳशइतिपंचऽ
विꣳशः।स्तोमः॥२९॥अदितेः।भागः।असि।पूष्णः।आ धिपत्य
मित्याधिऽपत्यम्।ओजः।स्पृतम्।त्रिणवः।त्रिनवइतित्रिऽनवः।
स्तोमः।देवस्य।सवितुः।भागः।बृहस्पतेः।आधिपत्यमित्याधिऽ
पत्यम्।समीचीः।दिशः।स्पृताः।चतुष्टोमः।चतुःस्तोमइतिचतुःऽ

अस्ति ६

स्तोमः । स्तोमः ॥ ३० ॥ यवानाम् । भागः । असि । अयवानाम् । आधिप
त्यमित्याधिऽपत्यम् । प्रजा इति प्रऽजाः । स्पृताः । चतुश्चत्वारिꣳशा
इति चतुःऽचत्वारिꣳशः । स्तोमः । ऋभूणाम् । भागः । असि । विश्वे
षाम् । देवानाम् । आधिपत्यमित्याधिऽपत्यम् । भूतम् । स्पृतम् । त्र
यस्त्रिꣳशा इति त्रयःऽत्रिꣳशः । स्तोमः । सहः । सहस्यः । हेमंतिकौ ।
ऋतू इत्यृतू ॥ ३१ ॥ एकया । अस्तुवत । प्रजा इति प्रऽजाः । अधीयंत । प्रजा
७.ति पतिरिं प्रजाऽपतिः । अधिपतिरित्यधिऽपतिः । आसीत् । तिसृभिरिति

॥५१॥

तिसृऽभिः। अस्तुवत। ब्रह्म। असृज्यत। ब्रह्मणः। पतिः। अधिप
तिरित्यधिऽपतिः। आसीत्। पंचभिरिति पंचऽभिः। अस्तुवत। भूता
नि। असृज्यंत। भूतानाम्। पतिः। अधिपतिरित्यधिऽपतिः। आसी
त्। सप्तभिरिति सप्तऽभिः। अस्तुवत। सप्तऋषय इति सप्तऽऋष
यः। असृज्यंत। धाता। अधिपतिरित्यधिऽपतिः। आसीत्॥ २८॥
नवभिरिति नवऽभिः। अस्तुवत। पितरः। असृज्यंत। अदितिः। अ
धिपत्नीत्यधिऽपत्नी। आसीत्। एकादशभिरित्येकादशऽभिः। अस्तु

वत । ऋतवः । असृज्यंत । आर्त्तवाः । अधिपतय इत्यधिऽपतयः ।
आसन् । त्रयोदशभिरिति त्रयोदशऽभिः । अस्तुवत । मासाः । असृ
ज्यंत । संवत्सरः । अधिपतिरित्यधिऽपतिः । आसीत् । पंचदशभि
रिति पंचदशऽभिः । अस्तुवत । क्षत्रम् । असृज्यत । इन्द्रः । अधिप
तिरित्यधिऽपतिः । आसीत् । ३३ । सप्तदशभिरिति सप्तदशऽभिः ।
अस्तुवत । ग्राम्याः । पशवः । असृज्यंत । बृहस्पतिः । अधिपतिरित्य
८ दश धिऽपतिः । आसीत् । नवँभिरिति नवदशऽभिः । अस्तुवत । शूद्र

र्यौ। असृज्येताम्। अहोरात्रे इत्यहोरात्रे। अधिपत्नी इत्यधिऽपत्नी।
आस्ताम्। एकविꣳशत्येत्येकऽविꣳशत्या। अस्तुवत। एकशफा इत्ये
कऽशफाः। पशवः। असृज्यंत। वरुणः। अधिपतिरित्यधिऽपतिः।
आसीत्। त्रयोविꣳशत्येति त्रयःऽविꣳशत्या। अस्तुवत। क्षुद्राः। पश
वः। असृज्यंत। पूषा। अधिपतिरित्यधिऽपतिः। आसीत्॥ २४॥ पंचवि
ꣳशत्येति पंचऽविꣳशत्या। अस्तुवत। आरण्याः। पशवः। असृज्यंत।
वायुः। अधिपतिरित्यधिऽपतिः। आसीत्। सप्तविꣳशत्येति सप्तऽविꣳ

॥६१॥

शत्या। अस्तुवत। द्यावापृथिवी इति द्यावापृथिवी। वि। ऐतान्। वसवः।
रुद्राः। आदित्याः। अनुव्यायन्नित्यनुऽव्यायन्। ते। एव। अधिपतय इ
त्यधिऽपतयः। आसन्। नवविंशत्येति नवऽविंशत्या। अस्तुवत।
वनस्पतयः। असृज्यन्त। सोमः। अधिपतिरित्यधिऽपतिः। आसीत्।
एकत्रिंशतेत्येकऽत्रिंशता। अस्तुवत। प्रजा इति प्रऽजाः। असृज्यन्त।
६५ यवाः। च। अयवाः। च। अधिपतय इत्यधिऽपतयः। आसन्। त्रयस्त्रि
ंशतेति त्रयःऽत्रिंशता। अस्तुवत। भूतानि। अशाम्यन्। प्रजापति

॥६१॥

रितिप्रजाऽपतिः। परमेष्ठी। परमेस्थीतिपरमेऽस्थी। अधिपतिरि
त्यधिऽपतिः। आसीत्॥ ३५॥ ४॥ इतिशुक्लयजुःकाण्वपदसंहितायांपं
चदशमोध्यायः॥ ४॥ हरिः ॐम्॥ अग्ने। जातान्। प्र। नुद। नः। सपत्ना
नितिसऽपत्नान्। प्रति। अजातान्। जातवेद इतिजातऽवेदः। नुदस्व।
अधि। नः। ब्रूहि। सुमना इतिसुऽमनाः। अहेळन्। तव। स्याम। शर्मन्।
त्रिवरूथ इतित्रिऽवरूथे। उद्भाइत्युत्ऽभौ॥ १॥ सहसा। जातान्। प्र। नु
द। नः। सपत्नानितिसऽपत्नान्। प्रति। अजातान्। जातवेद इतिजातऽ

नुद। १

वेदः।अधि।नः।ब्रूहि।सुमनस्यमान इति सुऽमनस्यमानः।वयम्।स्या
म।प्र।नुद।नः।सपत्नानिति सऽपत्नान्।षोळशी।स्तोमः।ओजः।द्रवि
णम्।चतुश्चत्वारिंश इति चतुःऽचत्वारिंशः।स्तोमः।वर्चः।द्रवि
णम्॥२॥अग्नेः।पुरीषम्।असि।अप्सः।नाम।ताम्।त्वा।विश्वे।अभि।
गृणंतु।देवाः।स्तोमपृष्ठेति स्तोमऽपृष्ठा।घृतवतीति घृतऽवती।इह।
सीद।प्रजावदिति प्रजाऽवत्।अस्मे इत्यस्मे।द्रविणा।आ।यजस्व॥ए
वः।छंदः।वरिवः।शंभूरिति शम्ऽभूः।परिभूरिति परिऽभूः।आ

छन्दिस्याऽछत्। मनः। व्यचः॥ ५॥ सिंधुः। समुद्रः। सरिरम्। ककुप्।
त्रिककुबिति त्रिऽककुप्। काव्यम्। अंकुपम्। अक्षरपंक्तिरित्यक्ष
रऽपंक्तिः। पदपंक्तिरिति पदऽपंक्तिः। विष्टारपंक्तिः। विस्तारपंक्ति
रिति विस्तारऽपंक्तिः। क्षुरः। भ्रजः। आच्छदित्याऽछत्। प्रछदिति प्रऽ
छत्। संयदिति सम्ऽयत्। वियदिति विऽयत्॥ ६॥ बृहत्। रथंतर
मिति रथम्ऽतरम्। निकाय इति निऽकायः। विवध इति विऽवधः।
गिरः। भ्रजः। संस्तुबिति सम्ऽस्तुप्। अनुष्टुप्। अनुस्तुबित्यनुऽ

स्तृप्॥७॥एव॥ वरिवः। वयः। वयस्कृत्। वयःकृदिति वयःऽकृत्।
विष्पर्द्धाः। विस्पर्द्धा इति विऽस्पर्द्धाः। विशालमिति विऽशालम्। छर्दिः।
दूरोहणमिति दुःऽरोहणम्। तंद्रम्। अङ्काङ्कमित्यंकऽअङ्कम्। छंदः॥८॥
रस्मिना। सत्याय। सत्यम्। जिन्व। प्रेतिनेति प्रऽइतिना। धर्मणा। धर्मम्। अ
न्वित्येत्यनुऽइत्या। दिवा। दिवम्। संधिनेति सम्ऽधिना। अन्तरिक्षेण।
अन्तरिक्षम्॥९॥प्रतिधिनेति प्रतिऽधिना। पृथिव्या। पृथिवीम्। वि
ष्टंभेन। वृष्ट्या। वृष्टिम्। प्रवयेति प्रऽवया। अन्हा। अहः। अनुयेत्यनुऽ

या । राज्ञ्या । राज्ञीम् ॥ १० ॥ उशिजो । वसुभ्य इति वसुऽभ्यः । वसून् ।
प्रकेतेनेति प्रऽकेतेन । आदित्येभ्यः । आदित्यान् । तंतुना । रायः । पो
षेण । रायः । पोषम् । सꣳसर्पेणेति सम्ऽसर्पेण । श्रुताय । श्रुतम् ॥ ११ ॥
ऐव्हेन । ओषधीभिः । ओषधीः । उत्तमेनेत्युत्ऽतमेन । तनूभिः ।
तनूः । वयोधसेति वयःऽधसा । आधीतेनेत्याऽधीतेन । आधीतु
मित्याऽधीतम् । अग्निजितेत्यग्निऽजिता । तेजसा । तेजः । जिन्व ॥ १२ ॥
७ ति प्रतिपदिति प्रतिऽपत् । असि । प्रतिपद इति प्रतिऽपदे । त्वा । अनुपदि

संनुऽपत्। अनुपद इत्यनुऽपदे। संपदिति सम्ऽपत्। संपद इति
सम्ऽपदे। तेजः। तेजसे ॥ १२ ॥ त्रिवृदिति त्रिऽवृत्। त्रिवृत इति त्रिऽ
वृते। प्रवृदिति प्रऽवृत्। प्रवृत इति प्रऽवृते। विवृदिति विऽवृत्।
विवृत इति विऽवृते। सवृदिति सऽवृत्। सवृत इति सऽवृते ॥ १३ ॥
आक्रम इत्याऽक्रमः। आक्रमायेत्याऽक्रमाय। संक्रम इति सम्ऽक्र
मः। संक्रमायेति सम्ऽक्रमाय। उत्क्रम इत्युत्ऽक्रमः। उत्क्रमा
येत्युत्ऽक्रमाय। उत्क्रांतिरित्युत्ऽक्रांतिः। उत्क्रांत्या इत्युत्ऽक्रांत्यै।

त्वा। अधिपतिनेत्यधिऽपतिना। ऊर्ज्जा। ऊर्ज्जम्। वेषश्रीरिति वेषऽ
श्रीः। क्षत्राय। क्षत्रम्। जिन्व ॥१५॥ राज्ञी। असि। प्राची। दिक्। वसवः।
ते। देवाः। अधिपतय इत्यधिऽपतयः। अग्निः। हेतीनाम्। प्रतिधर्त्तेति प्र ति३
तिऽधर्त्ता ॥१६॥ त्रिवृदिति त्रिऽवृत्। त्वा। स्तोमः। पृथिव्याम्। श्रयतु।
आज्यम्। उक्थम्। अव्यथायै। स्तभ्नातु। रथंतरमिति रथम्ऽतरम्।
साम। प्रतिष्ठित्यै। प्रतिस्थित्या इति प्रतिऽस्थित्यै। अंतरिक्षे ॥१७॥ ऋ
षयः। त्वा। प्रथमजा इति प्रथमऽजाः। देवेषु। दिवः। मात्रया। वरिम्णा।

प्रथंतु।विधर्त्तेतिविऽधर्त्ता।च।अयम्।अधिपतिरित्यधिऽपतिः।च।
ते।त्वा।सर्वे।संविदाना इतिसम्ऽविदानाः।नाकस्य।पृष्ठे।स्वर्ग इति
स्वःऽगे।लोके।यजमानम्।च।सादयंतु॥१८॥विराडितिविऽराट्।असि।
दक्षिणा।दिक्।रुद्राः।ते।देवाः।अधिपतय इत्यधिऽपतयः।इंद्रः।हेती
नाम्।प्रतिधर्त्तेतिप्रतिऽधर्त्ता॥१९॥पंचदश इति पंचऽदशः।त्वा।स्तो
मः।पृथिव्याम्।श्रयतु।प्रउगम्।उक्थम्।अव्यथायै।स्तभ्नातु।बृहत्।
साम।प्रतिष्ठित्यै।प्रतिष्ठित्या इतिप्रतिऽस्थित्यै।अंतरिक्षे॥२०॥संमा

ड्ढितिसम्ऽराट्। असि। प्रतिची। दिक्। आदित्याः। ते। देवाः। अधिपत
यऽइत्यधिऽपतयः। वरुणः। हेती। नाम। प्रतिधर्त्तेति प्रतिऽधर्त्ता॥२१॥
सप्तदशऽइतिसप्तऽदशः। त्वा। स्तोमः। पृथिव्याम्। श्रयतु। मरुत्वतीयम्।
उक्थम्। अव्यथायै। स्तभ्नातु। वैरूपम्। साम। प्रतिष्ठित्यै। प्रतिस्थित्या
ऽइति प्रतिऽस्थित्यै। अंत्तरिक्षे॥२२॥ स्वराड्ढितिस्वऽराट्। असि। उदी
ची। दिक्। मरुतः। ते। देवाः। अधिपतयऽइत्यधिऽपतयः। सोमः। हेती
नाम। प्रतिधर्त्तेति प्रतिऽधर्त्ता॥२३॥ एकविंशऽइत्येकऽविंशः। त्वा।

स्तोमः। पृथिव्याम्। श्रयतु। निष्केवल्यम्। निःकेवल्यमिति निःऽकेवल्यम्।
उक्थम्। अव्यथायै। स्तभ्नातु। वैराजम्। साम। प्रतिष्ठित्यै। प्रतिस्थित्या
इति प्रतिऽस्थित्यै। अन्तरिक्षे॥२४॥ अधिपत्नीत्यधिऽपत्नी। असि।
बृहती। दिक्। विश्वे। ते। देवाः। अधिपतय इत्यधिऽपतयः। बृहस्पतिः।
हेतीनाम्। प्रतिधर्त्तेति प्रतिऽधर्त्ता॥२५॥ त्रिणवत्रयस्त्रिंशौ। त्रि
नवत्रयस्त्रिंशा इति त्रिनवत्रयस्त्रिंशौ। त्वा। स्तोमौ। पृथिव्याम्।
श्रयताम्। वैश्वदेवाग्निमारुते इति वैश्वदेवाग्निमारुते। उक्थय इत्

क्ये।अव्यथायै।स्तुभ्नीताम।शाध्वररैवते इति शाक्वररैवते।साम
नी इति सामनी।प्रतिष्ठिस्ये।प्रतिस्थिस्या इति प्रतिऽस्थिस्ये:।अन्तरि
क्षे॥२६॥अयम।पुर:।हरिकेशा इति हरिऽकेशा:।सूर्यरश्मिरिति सू
र्यऽरश्मि:।तस्य।रथगृत्स इति रथऽगृत्स:।च।रथौजा इति रथऽओ
जा:।च।सेनानीग्रामण्यौ।सेनानीग्रामन्या इति सेनानीग्रामन्यौ।पुं
जिकस्थले इति पुंजिकऽस्थला।च।ऋतुस्थले इति ऋतुऽस्थला।च।अ
प्सरसौ।दंक्ष्णव:।पशव:।हेति:।पौरुषेय:।वध:।प्रहेतिरिति प्रऽ

हेतिः॥२७॥तेभ्यः।नमः।अस्तु।ते।नः।मृळयंतु।ते।नः।अवंतु।ते।य
म्।द्विष्मः।यः।च।नः।द्वेष्टि।तम्।एषाम्।जंभे।दध्मः॥२८॥अयम्।
दक्षिणा।विश्वकर्मेति विश्वऽकर्मा।तस्य।रथस्वन इति रथऽस्वनः।र
थेचित्र इति रथेऽचित्रः।मेनका।सहजन्येति सहऽजन्या।अप्सरसौ।
यातुधाना इति यातुऽधानाः।हेतिः।रक्षांसि।प्रहेतिं प्रऽहेतिः॥२९॥ रिति ५
अयम्।पश्चात्।विश्वव्यचा इति विश्वऽव्यचाः।तस्य।रथप्रोत इ
ति रथऽप्रोत :।असमरथ इत्यसमऽरथः।प्रम्लोचंतीति प्रऽम्लो

चंती। अनुम्लोचंतीत्यनुऽम्लोचंती। अप्सरसौ। व्याघ्राः। हेतिः। सर्पाः।
प्रहेतिरिति प्रऽहेतिः॥ २०॥ अयम्। उत्तरात्। संय्यद्वसुरिति संय्यत्ऽ
वसुः। तस्य। तार्क्ष्यः। अरिष्टनेमिरित्यरिष्टऽनेमिः। विश्वाची। घृता
ची। अप्सरसौ। आपः। हेतिः। वातः। प्रहेतिरिति प्रऽहेतिः॥ २१॥ अ
यम्। उपरि। अर्वाग्वसुरित्यर्वाक्ऽवसुः। तस्य। सेनजिदिति सेनऽ
जित्। सुषेणः। सुसेन इति सुऽसेनः। उर्वशी। पूर्वच्चित्तिरिति पूर्वऽ
चित्तिः। अप्सरसौ। अवस्फुर्जन्नित्यवऽस्फुर्जन्। हेतिः। विद्युदिति

विऽश्रुत्। प्रहेतिरितिप्रऽहेतिः॥ ३२॥ ६॥ अयम्। अग्निः। सहस्रिणः। वाजस्य। शतिनः। पतिः। मूर्द्धा। कविः। रयीणाम्॥ ३३॥ अबोधि। अग्निः। समिधेतिसम्ऽइधा। जनानाम्। प्रति। धेनुमिवेतिधेनुंऽइव। आयतीमित्याऽयतीम्। उषासम्। उषसमित्युषसम्। यह्वाइवेतियह्वाःऽइव। प्र। वयाम्। उज्जिहानाइत्युत्ऽजिहानाः। प्र। भानवः। सिस्रते। नाकम्। अच्छ॥ ३४॥ अवोचाम। कवये। मेध्याय। वचः। वंदारु। वृषभाय। वृष्णे। गविष्ठिरः। नमसा। स्तोमम्। अग्नौ। दि

वीवेति दिविऽइव । रुक्मम् । उरुव्यंचमित्युरुऽव्यंचम् । अश्रेत् ॥ ३५ ॥
जनस्य । गोपाः । अजनिष्ट । जागृविः । अग्निः । सुदक्ष इति सुऽदक्षः । सु
विताय । नव्यसे । घृतप्रतीक इति घृतऽप्रतीकः । बृहता । दिविस्पृशे
ति दिविऽस्पृशा । द्युमदिति द्युऽमत् । वि । भाति । भरतेभ्यः । शुचिः ॥ ३६ ॥
त्वाम् । अग्ने । अंगिरसः । गुहा । हितम् । अनु । अविंदन् । शिश्रियाणम् ।
वनेवन इति वनेऽवने । सः । जायसे । मथ्यमानः । सहः । महत् । त्वाम् ।
आहुः । सहसः । पुत्रम् । अंगिरः ॥ ३७ ॥ सखायः । सम् । वः । सम्यंचम् ।

रघम्।स्तोमम्।च्चु।अग्नये।वर्षिष्ठाय।क्षितीनाम्।ऊर्जः।नप्त्रे।सहस्व
ते॥२८॥संसमितिसम्ऽसम्।इत्।युवसे।वृषन्।अग्ने।विश्वानि।
अर्यः।आ।इळः।पदे।सम्।इध्यसे।सः।नः।वसूनि।आ।भर॥२९॥
त्वाम्।अग्ने।हविष्मंतः।देवम्।मर्तासः।ईळते।मन्ये।त्वा।जातवे
दसमितिजातऽवेदसम्।सः।हव्या।वक्षि।आनुषक्॥३०॥त्वाम्।
चित्रश्रवस्तमेतिचित्रश्रवःऽतम।हवंते।विक्षु।जंतवः।शोचिष्के
शम्।शोचिःकेशमितिशोचिःऽकेशम्।पुरुप्रियेतिपुरुऽप्रिय।अ

ग्ने । तुभ्याय । वोळ्हवे ॥ ५१ ॥ एना । वः । अग्निम् । नमसा । ऊर्जः । नपातम् ।
आ । हुवे । प्रियम् । चेतिष्ठम् । अरतिम् । स्वध्वरमिति सुऽअध्वरम् । वि
श्वस्य । दूतम् । अमृतम् ॥ ५२ ॥ विश्वस्य । दूतम् । अमृतम् । सः । योज
ते । अरुषा । विश्वभोजसेति विश्वऽभोजसा । सः । दुद्रवत् । स्वाहुत इ
ति सुऽआहुतः ॥ ५३ ॥ सः । दुद्रवत् । स्वाहुत इति सुऽआहुतः । सुब्रह्मेति
सुऽब्रह्मा । यज्ञः । सुशमीति सुऽशमी । वसूनाम् । देवम् । राधः । जनाना
७ स्य म् ॥ ५४ ॥ अग्ने । वाजस्य । गोमत इति गोऽमतः । ईशानः । सहसः । यहो इ

त्तियहो। असे इत्यस्मे। धेहि। जात वेद इति जातऽवेदः। महि। श्रवः॥ ८५॥
सः। इधानः। वसुः। कविः। अग्निः। ईळेन्यः। गिरा। रेवत्। अस्मभ्यम्।
पुर्वणीक। पुर्व नीकेति पुरुऽअनीक। दीदिहि॥ ८६॥ क्षपः। राज
न्। उत। त्मना। अग्ने। वस्तोः। उत। उषसः। सः। तिग्मजंभेति तिग्मऽजं
भ। रक्षसः। दह। प्रति॥ ८७॥ भद्रः। नः। अग्निः। आहुत इत्याऽहुतः।
भद्रा। रातिः। सुभगेति सुऽभग। भद्रः। अध्वरः। भद्राः। उत। प्रशस्त
यइति प्रऽशस्तयः॥ ८८॥ भद्राः। उत। प्रशस्तयइति प्रऽशस्तयः। भद्र

म्रा।नमः।हृणुष्व।वृत्रतूर्येइतिवृत्रऽतूर्ये।येन।समत्स्वितिसमत्ऽ
सु।सासहः।सुसहइतिसुसहः॥४९॥येन।समत्स्वितिसमत्ऽसु।सा
सहः।सुसहइतिसुसहः।अव।स्थिरा।तनुहि।भूरि।शर्द्धताम्।वने
म।ते।अभिष्टिभिरित्यभिष्टिऽभिः॥५०॥अग्निम्।तम्।मन्ये।यः।व
सुः।अस्तम्।यम्।यंति।धेनवः।अस्तम्।अर्वंतः।आशवः।अस्तम्।
नित्यासः।वाजिनः।इषम्।स्तोतृभ्यइतिस्तोतृऽभ्यः।आ।भर॥५१॥सः।
अग्निः।यः।वसुः।गृणे।सम्।यम्।आयंतीत्याऽयंति।धेनवः॥सम्।

अर्वंतः। रघुद्रुवः इति रघुऽद्रुवः। सम्। सुजातास इति सुऽजातासः।
सूरयः। इषम्। स्तोतृभ्य इति स्तोतृऽभ्यः। आ। भर॥ ८२॥ उभे इत्यु
भे। सुश्चंद्र। सुचंद्रेति सुऽचंद्र। सर्पिषः। दर्वीइति दर्वी। श्रीणीषे। आ
सनि। उतो इत्युतो। नः। उत्। पुपूर्याः। उक्थेषु। शवसः। पते। इषम्।
स्तोतृभ्य इति स्तोतृऽभ्यः। आ। भर॥ ८३॥ अग्ने। तम्। अद्य। अश्वम्।
न। स्तोमैः। क्रतुम्। न। भद्रम्। हृदिस्पृशमिति हृदिऽस्पृशम्। ऋध्या
म। ते। ओहैः॥ ८४॥ अध। हि। अग्ने। क्रतोः। भद्रस्य। दक्षस्य। सा

घोः। रथीः। ऋतस्य। बृहतः। बभूथ॥ ५५॥ एभिः। नः। अर्कैः। भ
व। नः। अर्वाङ्। स्वः। न। ज्योतिः। अग्ने। विश्वेभिः। सुमना इति सुऽमनाः।
अनीकैः॥ ५६॥ अग्निम्। होतारम्। मन्ये। दास्वंतम्। वसुम्। सूनुम्। स
हसः। जातवेदसमिति जातऽवेदसम्। विप्रम्। न। जातवेदसमिति
जातऽवेदसम्। यः। ऊर्ध्वया। स्वध्वर इति सुऽअध्वरः। देवः। देवाच्या।
कृपा। घृतस्य। विभ्राष्टिमिति विऽभ्राष्टिम्। अनु। वष्टि। शोचिषा। आ
जुह्वानस्येत्याऽजुह्वानस्य। सर्पिषः॥ ५७॥ येन। ऋषयः। सत्रम्। आय
७ तपसा

भ्रातृभिरिति ३

नू।इंधानाः।अग्निम्।आस्वः।आ।नरंत हव्याऽभरंतः।तस्मिन्।अहम्।
नि।दधे।नाके।अग्निम्।यम्।आहुः।मनवः।स्तीर्णबर्हिषमिति स्तीर्णऽ
बर्हिषम्॥५८॥तम्।पत्नीभिः।अनु।गच्छेम।देवाः।पुत्रैः।भ्रातृभिः।
उत।वा।हिरण्यैः।नाकम्।गृभ्णानाः।सुहृतस्येति सुऽहृतस्य।लोके।
तृतीये।पृष्ठे।अधि।रोचने।दिवः॥५९॥आ।वाचः।मध्यम्।अरु
हत्।भुरंण्युः।अयम्।अग्निः।सत्पतिरिति सत्ऽपतिः।चेकितानः।
पृष्ठे।पृथिव्याः।निहित इति निऽहितः।दविद्युतत्।अधस्पदम्।

अप्सःपदमित्यप्सःऽपदम्। कृणुताम्। ये। पृतन्यवः॥ ५०॥ अयम्। अ
ग्निः। वीरतमइति वीरऽतमः। वयोधाइति वयःऽधाः। सहस्रियः। द्यो
तताम्। अप्रयुछन्नित्यप्रऽयुछन्। विभ्राजमानइति विऽभ्राजमा
नः। सरिरस्य। मध्ये। उप। प्र। याहि। दिव्यानि। धाम॥ ५१॥ सं प्रच्यवध्व
मितिसम्ऽप्रच्यवध्वम्। उप। संप्रयातेतिसम्ऽप्रयात। अग्ने। पथः।
देवयानानितिदेवऽयानान्। कृणुध्वम्। पुनरितिपुनः। कृण्वाना। पित
रा। युवाना। अन्वाताꣳसीदित्यनुऽआताꣳसीत्। त्वयि। तंतुम्। एत

मृधः॥ उत्। बुध्यस्व। अग्ने। प्रति। जागृहि। त्वम्। इष्टापूर्त्ते इतीष्टा।
पूर्त्ते। सम्। सृजेथाम्। अयम्। च। अस्मिन्। सधस्थ इति सधऽस्थे।
अधि। उत्तरस्मिन्नित्युत्ऽतरस्मिन्। विश्वे। देवाः। यजमानः। च।
सीदत॥ ५७॥ येन। वहसि। सहस्रम्। येन। अग्ने। सर्ववेदसमिति
सर्वऽवेदसम्। तेन। इमम्। यज्ञम्। नः। नय। स्वः। देवेषु। गंतवे॥ ५८॥
तपः। तपस्यः। शैशिरौ। परमेष्ठी। परमेस्थीत्ति परमेऽस्थी। दिवः।
सूर्यः॥ ५९॥ प्रोथत्। अश्वः। न। यवसे। अविष्यन्। यदा। महः। सं

वरणादितिसम्ऽवरणात्। वि। अस्थात्। आ। अस्य। वातः। अनु। वा
ति। शोचिः। अध। स्म। ते। व्रजनम्। कृष्णम्। अस्ति॥६६॥ आयोः। त्वा। स
दने। सादयामि। अवतः। छायाम्। समुद्रस्य। हृदये। रश्मिवतीम्। र
श्मिवतीमितिरश्मिऽवतीम्। भास्वतीम्। आ। या। द्याम्। भासि। आ। पृ
थिवीम्। आ। उरु। अंतरिक्षम्। दिवम्॥६७॥ सहस्रस्य। प्रमेतिप्रऽमा।
प्रतिमेतिप्रतिऽमा। उन्मेत्युत्ऽमा। साहस्रः। असि। सहस्राय। त्वा॥६८॥
इतिशुक्लयजुः काण्वपदपाठे षोडशोध्यायः॥१६॥ १६॥ १६॥ १६॥

हरिः॥ ओम्॥ नमः। ते। रुद्र। मन्यवे। उतोइत्युतो। ते। इषवे। नमः। बाहु
भ्यामिति बाहुऽभ्याम्। उत। ते। नमः॥ १॥ या। ते। रुद्र। शिवा। तनूः। अ
घोरा। अपापकाशिनीत्यपापऽकाशिनी। तया। नः। तनुवा। शंतमयेतिश
म्ऽतमया। गिरिशंतेति गिरिऽशंत। अभि। चाकशीहि॥ २॥ याम्। इषुम्।
गिरिशंतेति गिरिऽशंत। हस्ते। बिभर्षि। अस्तवे। शिवाम्। गिरित्रेति
गिरिऽत्र। ताम्। कुरु। मा। हिंसीः। पुरुषम्। जगत्॥ ३॥ शिवेन। वच
सा। त्वा। गिरिशेति गिरिऽश। अच्छ। वदामसि। यथा। नः। सर्वम्। इत्।

जगत्।अयक्ष्मम्।सुमना इति सुऽमनाः।असत्॥४॥अधि।अवोचत्।
अधिवक्तेत्यधिऽवक्ता।प्रथमः।दैव्यः।भिषक्।अहीन्।च।सर्वान्।जंभ
यन्।सर्वाः।च।यातुधान्य इति यातुऽधान्यः।अधराचीः।परा।सुव॥५॥
असौयः।ताम्रः।अरुणः।उत।बभ्रुः।सुमंगल इति सुऽमंगलः।ये।च।
एनम्।रुद्राः।अभितः।दिक्षु।श्रिताः।सहस्रश इति सहस्रऽशः।अ
ईळः व।एषाम्।हेडः।ईमहे॥६॥असौ।यः।अवसर्पतीत्यवऽसर्पति।नी
लग्रीव इति नीलऽग्रीवः।विलोहित इति विलोहितः।उत।एनम्।गो

पाः। अदृश्रन्। अदृश्रन्। उदुहार्यु इत्युदऽहार्यः। सः। दृष्टः। मृडयाति।
नः॥ ७॥ नमः। अस्तु। नीलग्रीवायेति नीलऽग्रीवाय। सहस्राक्षायेति स-
हस्रऽअक्षाय। मीढुषे। अथो इत्यथो। ये। अस्य। सत्वानः। अहम्। तेभ्यः।
अकरम्। नमः॥ ८॥ प्र। मुंच। धन्वनः। त्वम्। उभयोः। आर्त्न्योः। ज्याम्।
याः। च। ते। हस्ते। इषवः। परा। ताः। भगव इति भगऽवः। वप॥ ९॥ विज्य-
मिति विऽज्यम्। धनुः। कपर्दिनः। विशल्य इति विऽशल्यः। बाणवानि-
ति बाणऽवान्। उत। अनेशन्। अस्य। याः। इषवः। आभुः। अस्य। नि-

षंगधिरिति निषंगऽधिः ॥१०॥ परि। ते। धन्वनः। हेतिः। अस्मान्। वृण
क्तु। विश्वतः। अथो इत्यथो। यः। इषुधिरितीषुऽधिः। तव। आरे। अस्म
त्। नि। धेहि। तम् ॥११॥ या। ते। हेतिः। मीढुष्टम। मीढुष्टमेति मीढुःऽ
तम। हस्ते। बभूव। ते। धनुः। तया। अस्मान्। विश्वतः। त्वम्। अयक्ष्मया।
परि। भुज ॥१२॥ अवतत्येत्यवऽतत्य। धनुः। त्वम्। सहस्राक्षेति सहस्रऽ
अक्ष। शतेषुधे इति शतऽइषुधे। निशीर्येति निऽशीर्य। शल्यानाम्। मु
खा। शिवः। नः। सुमना इति सुऽमनाः। भव ॥१३॥ नमः। ते। आयुधाय। अ

॥७६॥

नातताय । धृष्णवे । उभाभ्याम् । उत । ते । नमः । बाहुभ्यामिति बाहुऽभ्या
म् । तव । धन्वने ॥१४॥ मा । नः । महान्तम् । उत । मा । नः । अर्भकम् । मा । नः ।
उक्षन्तम् । उत । मा । नः । उक्षितम् । मा । नः । वधीः । पितरम् । मा । उत । मातर
म् । मा । नः । प्रियाः । तन्वः । रुद्र । रीरिषः । रिरिषइति रिरिषः ॥१५॥ तो
के । तनये । [illegible] आयुषि । गोषु । अश्वेषु । रीरिषः । रिरिषइति रिरिषः ।
वीरान् । रुद्र । भामिनः । वधीः । हविष्मन्तः । सदम् । इत् । त्वा । हवामहे ॥१६॥
हिरण्यबाहवइति हिरण्यऽबाहवे । सेनान्यइति सेनाऽन्ये । दिशाम् ।

॥७६॥

चापतये। नमः। नमः। वृक्षेभ्यः। हरिकेशेभ्य इति हरिऽकेशेभ्यः। पशू
नाम्। शष्पिंजराय। त्विषीमते। त्विषिमत इति त्विषिऽमते। पथीनाम्।
हरिकेशायेति हरिऽकेशाय। उपवीतिन इत्युपऽवीतिने। पुष्टानाम्॥ १७॥
बभ्लुशाय। आव्याधिन इत्याऽव्याधिने। अन्नानाम्। भवस्य। हेत्यै। जग
ताम्। रुद्राय। आततायिन इत्याततऽआयिने। क्षेत्राणाम्। सूताय। अ
हंत्यै। वनानाम्॥ १८॥ रोहिताय। स्थपतये। वृक्षाणाम्। भुवंतये। वा
रिवस्कृताय। वारिवःकृतायेति वारिवःऽकृताय। ओषधीनाम्। मं

त्रिणे।वाणिजाय।कक्षाणाम्।उच्चैर्घोषायेत्युच्चैःऽघोषाय।आक्रं
दयत इत्याऽक्रंदयते।पत्तीनाम्॥१९॥ कृत्स्नायतायेति कृत्स्नाऽआ
यताय।धावते।सत्वनाम्।सहमानाय।निव्याधिन इति निऽव्याधिने।
आव्याधिनीनामित्याऽव्याधिनीनाम्।ककुभाय।निषंगिणे।स्तेना
नाम्।निचेरव इति निऽचेरवे।परिचरायेति परिऽचराय।अरंण्या
नाम्॥२०॥वंचते।परिवंचत इति परिऽवंचते।स्तायूनाम्।निषंगि
णे।इषुधिमत इतीषुधिऽमते।तस्कराणाम्।सृकायिभ्य इति सृका

यिभ्यः। जिघाꣳसद्भ्य इति जिघाꣳसत्ऽभ्यः। मुष्णताम्। असिमद्भ्य
इत्यसिमत्ऽभ्यः। नक्तम्। चरद्भ्य इति चरत्ऽभ्यः। विकृंतानामिति विऽ
कृंतानाम्॥२१॥ उष्णीषिणे। गिरिचरायेति गिरिऽचराय। कुलुंचाना
म्। इषुमद्भ्य इतीषुमत्ऽभ्यः। धन्वायिभ्य इति धन्वायिऽभ्यः। च। वः।
आतन्वानेभ्य इत्याऽतन्वानेभ्यः। प्रतिदधानेभ्य इति प्रतिऽदधानेभ्यः।
आयच्छद्भ्य इत्याऽयच्छत्ऽभ्यः। अस्यद्भ्य इत्यस्यत्ऽभ्यः॥२२॥ विसृजद्भ्य
इति विसृजत्ऽभ्यः। विध्यद्भ्य इति विध्यत्ऽभ्यः। स्वपद्भ्य इति स्वपत्ऽ

भ्यः। जाग्रद्भ्य इति जाग्रत्ऽभ्यः। शयानेभ्यः। आसीनेभ्यः। तिष्ठ
द्भ्य इति तिष्ठत्ऽभ्यः। धावद्भ्य इति धावत्ऽभ्यः ॥ २३ ॥ सभाभ्यः।
सभा पतिभ्य इति सभापतिऽभ्यः। अश्वेभ्यः। अश्वपति भ्य
इत्यश्वपतिऽभ्यः। आव्याधिनीभ्य इत्याऽव्याधिनीभ्यः। विविध्यं
तीभ्य इति विऽविध्यंतीभ्यः। उगणाभ्यः। तृंहतीभ्यः ॥ [illegible] गणेभ्यः। २४
गणपतिभ्य इति गणपतिऽभ्यः। व्रातेभ्यः। व्रातपतिभ्य इति व्रातप
तिऽभ्यः। गृत्सेभ्यः। गृत्सपतिभ्य इति गृत्सपतिऽभ्यः। विरूपेभ्य

इतिविऽरूपेभ्यः। विश्वरूपेभ्यइतिविश्वऽरूपेभ्यः॥२५॥ सेनाभ्यः।
सेनानिभ्यइतिसेनानिऽभ्यः। रथिभ्यइतिरथिऽभ्यः। अरथेभ्यः। क्ष
त्तृभ्यइतिक्षत्तृऽभ्यः। संग्रहीतृभ्यइतिसंग्रहीतृऽभ्यः। महद्भ्यइति
महत्ऽभ्यः। अर्भकेभ्यः॥२६॥ तक्षभ्यइतितक्षऽभ्यः। रथकारेभ्य
इतिरथऽकारेभ्यः। कुलालेभ्यः। कर्मारेभ्यः। निषादेभ्यः। निसादेभ्य
इतिनिऽसादेभ्यः। पुंजिष्ठेभ्यः। श्वनिभ्यइतिश्वनिऽभ्यः। मृगयुभ्य
इतिमृगयुऽभ्यः॥२७॥ श्वभ्यइतिश्वऽभ्यः। श्वपतिभ्यइतिश्वप

तिऽभ्यः। भवाय। रुद्राय। शर्वाय। पशुपतय इति पशुऽपतये। नीलग्री
वायेति नीलऽग्रीवाय। शितिकंठायेति शितिऽकंठाय॥२८॥ कपर्दिने। व्यु
प्तकेशायेति व्युप्तऽकेशाय। सहस्राक्षायेति सहस्रऽअक्षाय। शतधन्वन इ
ति शतऽधन्वने। गिरिशयायेति गिरिऽशयाय। शिपिविष्टायेति शिपिऽ
विष्टाय। मीढुष्टमाय। मीढुस्तमायेति मीढुःऽतमाय। इषुमत इतीषुऽ
मते॥२९॥ ह्रस्वाय। वामनाय। बृहते। वर्षीयसे। वृद्धाय। सवृध इति
सऽवृधे। अग्र्याय। प्रथमाय॥३०॥ आशवे। अजिराय। शीघ्र्याय। शीभ्या

या। ऊर्म्याय। अवस्वन्यायेत्यवऽस्वन्याय। नादेयाय। द्वीप्याय॥ ३१॥ ज्ये
ष्ठाय। कनिष्ठाय। पूर्वजायेतिपूर्वऽजाय। अपरजायेत्यपरऽजाय। मध्य
माय। अपगल्भायेत्यपऽगल्भाय। जघन्याय। बुध्न्याय॥ ३२॥ सोभ्याय।
प्रतिसर्यायेतिप्रतिऽसर्याय। याम्याय। क्षेम्याय। श्लोक्याय। अवसा
न्यायेत्यवऽसान्याय। उर्वर्याय। खल्याय॥ ३३॥ वन्याय। कक्ष्याय। श्रवा
य। प्रतिश्रवायेतिप्रतिऽश्रवाय। आशुषेणाय। आशुसेनायेत्याशुऽसे
नाय। आशुरथायेत्याशुऽरथाय। शूराय। अवभेदिन इत्यवऽभेदिने॥ ३४॥

बिल्मिने । कवचिने । वर्मिणे । वरूथिने । श्रुताय । श्रुतसेनायेति श्रुतऽसे
नाय । दुंदुभ्याय । आहनन्यायेत्याऽहनन्याय ॥ ३५ ॥ धृष्णवे । प्रमृशायेति प्रऽमृ
शाय । निषंगिणे । इषुधिमत इतीषुधिऽमते । तीक्ष्णेषव इति तीक्ष्णऽइषवे । आ
युधिने । स्वायुधायेति सुऽआयुधाय । सुधन्वन इति सुऽधन्वने ॥ ३६ ॥ स्रुत्याय ।
पथ्याय । काट्याय । नीप्याय । कुल्याय । सरस्याय । नादेयाय । वैशंताय ॥ ३७ ॥
कूप्याय । अवट्याय । ईध्र्याय । आतप्यायेत्याऽतप्याय । मेघ्याय । विद्युत्यायेति
विऽद्युत्याय । वर्ष्याय । अवर्ष्याय ॥ ३८ ॥ वात्याय । रेष्म्याय । वास्तव्याय । वास्तु

पायेतिवास्तुऽपाय। सोमाय। रुद्राय। ताम्राय। अरुणाय॥ ३९॥ शंगवइति
शम्ऽगवे। पशुपतयइतिपशुऽपतये। उग्राय। भीमाय। अग्रेवधायेत्यग्रेऽ
वधाय। दूरेवधायेतिदूरेऽवधाय। हन्त्रे। हनीयसे॥ ४०॥ वृक्षेभ्यः। हरिके
शेभ्यइतिहरिऽकेशेभ्यः। ताराय। शंभवइतिशम्ऽभवे। मयोभवइतिम
यःऽभवे। शंकरायेतिशम्ऽकराय। मयस्कराय। मयःकरायेतिमयःऽक
राय। शिवाय। शिवतरायेतिशिवऽतराय॥ ४१॥ पार्याय। अवार्याय।
प्रतरणायेतिप्रऽतरणाय। उत्तरणायेत्युत्ऽतरणाय। तीर्थ्याय। कूल्याय।

शष्प्याय।फेन्याय॥४२॥सिकत्याय।प्रवाह्यायेतिप्रऽवाह्याय।किंशिलाय।
क्षयणाय।कपर्दिने।पुलस्तिने।इरिण्याय।प्रपथ्यायेतिप्रऽपथ्याय॥४३॥
व्रजाय।गोष्ठ्याय।गोस्थ्यायेतिगोऽस्थ्याय।तल्प्याय।गेह्याय।हृद्याय।निवेष्प्या
येतिनिऽवेष्प्याय।काट्याय।गह्वरेष्ठाय।गह्वरेस्थायेतिगह्वरेऽस्थाय॥४४॥
शुष्क्याय।हरित्याय।पांसव्याय।रजस्याय।लोप्याय।उलप्याय।ऊर्व्याय।
सूर्व्यायेतिसुऽउर्व्याय॥४५॥पर्ण्याय।पर्णशदायेतिपर्णऽशदाय।उद्गुरमाणा
येत्युत्ऽगुरमाणाय।अभिघ्नतइत्यभिऽघ्नते।आखिदतइत्याऽखिदते।

प्रखिदत इति प्रऽखिदतो। इषुकृद्भ्य इतीषुकृत्ऽभ्यः। धनुष्कृद्भ्यः। धनुः
कृद्भ्य इति धनुःकृत्ऽभ्यः। च। वः। किरिकेभ्यः। देवानाम्। हृदयेभ्यः। विचि
न्वत्केभ्य इति विऽचिन्वत्केभ्यः। विक्षिणत्केभ्य इति विऽक्षिणत्केभ्यः। आनि
र्हतेभ्य इत्यानिःऽहतेभ्यः॥४६॥ द्रापे। अंधसः। पते। दरिद्र। नीललोहितेति नी
लऽलोहित। आसाम्। प्रजानामिति प्रऽजानाम्। एषाम्। पशूनाम्। मा। भेः। मो
इति मो। रोक्। मो इति मो। च। नः। किम्। चन। आममत्॥४७॥ इमाः। रुद्राय।
तवसे। कपर्दिने। क्षयद्वीरायेति क्षयत्ऽवीराय। प्र। भरामहे। मतीः। यथा।

शम्। असत्। द्विपद इति द्विऽपदे। चतुष्पदे। चतुःपद इति चतुःऽपदे। वि
श्वम्। पुष्टम्। ग्रामे। अस्मिन्। अनातुरम्॥ ४८॥ या। ते। रुद्र। शिवा। तनूः। शि
वा। विश्वाहा। भेषजी। शिवा। रुतस्य। भेषजी। तया। नः। मृड। जीवसे॥ ४९॥
परि। नः। हेतिः। रुद्रस्य। वृज्यात्। परि। त्वेषस्य। दुर्मतिरिति दुःऽमतिः। मही।
गात्। अव। स्थिरा। मघवद्भ्य इति मघवत्ऽभ्यः। तनुष्व। मीढ्वः। तोकाय।
तनयाय। मृड॥ ५०॥ मीढुष्टम। मीढुष्टमेति मीढुःऽतम। शिवतमेति
शिवऽतम। शिवः। नः। सुमना इति सुऽमनाः। भव। परमे। वृक्षे। आयुध

म्। निधायेतिनिऽधाय। कृत्तिम्। वसानः। आ। चर। पिनाकम्। बिभ्रत्।
आ। गहि॥५१॥ विकिरिद्रेतिविऽकिरिद्र। विलोहितेतिविऽलोहित। नमः।
ते। अस्तु। भगवइतिभगऽवः। याः। ते। सहस्रम्। हेतयः। अन्यम्। अस्मत्।
नि। वपंतु। ताः॥५२॥ सहस्राणि। सहस्रशइतिसहस्रऽशः। बाह्वोः। तव। हेतयः।
तासाम्। ईशानः। भगवइतिभगऽवः। पराचीना। मुखा। कृधि॥५३॥ असंख्या
तेससंऽख्याता। सहस्राणि। ये। रुद्राः। अधि। भूम्याम्। तेषाम्। सहस्रयोजन
इतिसहस्रऽयोजने। अव। धन्वानि। तन्मसि॥५४॥ अस्मिन्। महति।

अर्णवे।अंतरिक्षे।भवाः।अधि॥५५॥नीलग्रीवा इति नीलऽग्रीवाः।शिति
कंठा इति शितिऽकंठाः।दिवम्।रुद्राः।उपश्रिता इत्युपऽश्रिताः॥५६॥शर्वाः।
अधः।क्षमाचरा इति क्षमाऽचराः॥५७॥वृक्षेषु।शष्पिंजराः।नीलग्रीवा
इति नीलऽग्रीवाः।विलोहिता इति विऽलोहिताः॥५८॥भूतानाम्।अधिप
तय इत्यधिऽपतयः।विशिखास इति विऽशिखासः।कपर्दिनः॥५९॥पथाम्।
पथिरक्षिण इति पथिऽरक्षिणः।ऐलबदाः।आयुर्युध इत्यायुःऽयुधः॥६०॥
तीर्थानि।प्रचरंतीति प्रऽचरंति।सृकाहस्ता इति सृकाऽहस्ताः।निषंगिणः॥६१॥

अन्नेषु। विविध्यंतीतिविऽविध्यंति। पात्रेषु। पिबतः। जनान्॥ ६२॥ एतावं
तः। च। भूयाꣳसः। च। दिशः। रुद्राः। वितस्थिरइतिविऽतस्थिरे॥ ६३॥ नमः।
अस्तु। रुद्रेभ्यः। ये। दिवि। येषाम्। वर्षम्। इषवः। तेभ्यः। दश। प्राचीः। दक्षिणा।
प्रतीचीः। उदीचीः। ऊर्ध्वाः। अंतरिक्षे। वातः। पृथिव्याम्। अन्नम्॥ ६४॥ ६९॥
इतिशुक्लयजुःकाण्वपदपाठेसप्तदशोऽध्यायः॥ ६९॥ हरिः ॐ म्॥ अश्मन्।
ऊर्जम्। पर्वते। शिश्रियाणाम्। अभ्यइत्यत्ऽभ्यः। ओषधीभ्यः। वनस्पतिंइ भ्य
तिवनस्पतिऽभ्यः। अधिसंभृतमितिसंऽभृतं। पयः। ताम्। नः। इषम्। ऊर्जम्।

॥८४॥

यन्त्ना।मरुतः।सुऽरराणाऽइतिसुम्ऽरराणाः।अरमन्।तेऽस्कृत।मयि।ते।उर्वः।
यम्।द्विष्मः।तम्।ते।शुक्।ऋच्छतु॥१॥इमाः।मे।अग्ने।इष्टकाः।धेनवः।संतु।
एका।च।दश।शतम्।सहस्रम्।अयुतम्।नियुतमितिनिऽयुतम्॥२॥अर्बु
दम्।न्यर्बुदमितिनिऽअर्बुदम्।समुद्रः।मध्यम्।अंतः।परार्द्धइतिपरऽ
अर्द्धः।एताः।मे।अग्ने।इष्टकाः।धेनवः।संतु।अमुत्र।अमुष्मिन्।लोके॥३॥
ऋतवः।स्थ।ऋतावृधः।ऋतवृधइत्यृतऽवृधः।ऋतुष्ठाः।ऋतुस्थाइत्यृ
तुऽस्थाः।स्थ।ऋतावृधः।ऋतवृधइत्यृतऽवृधः।घृतश्चुतइतिघृतऽ

॥८४॥

श्चुतः। मधुश्चुत इति मधुऽश्चुतः। विराज इति विऽराजः। नाम। कामदुघा
इति कामऽदुघाः। अक्षीयमाणाः॥ ४॥ समुद्रस्य। त्वा। अवकया। अग्ने। परि।
व्ययामसि। पावकः। अस्मभ्यम्। शिवः। भव॥ ५॥ हिमस्य। त्वा। जरायुणा।
अग्ने। परि। व्ययामसि। पावकः। अस्मभ्यम्। शिवः। भव॥ ६॥ उप। ज्मन्।
उप। वेतसे। अव। तर। नदीषु। आ। अग्ने। पित्तम्। अपाम्। असि। मंडूकि।
ताभिः। आ। गहि। सा। इमम्। नः। यज्ञम्। पावकवर्णमिति पावकऽवर्णम्।
शिवम्। कृधि॥ ७॥ अपाम्। इदम्। न्ययनमिति निऽअयनम्। समुद्रस्य।

निवेशनमिति निऽवेशनम्। अन्यान्। ते। अस्मत्। तपंतु। हेतयः। पावकः।
अस्मभ्यम्। शिवः। भव॥८॥ अग्ने। पावक। रोचिषा। मंद्रया। देव। जिह्वया।
आ। देवान्। वक्षि। यक्षि। च॥९॥ सः। नः। पावक। दीदिव इति दीदिऽवः। अग्ने।
देवान्। इह। आ। वह। उप। यज्ञम्। हविः। च। नः॥१०॥ पावकया। यः। चितयंत्या।
कृपा। क्षामन्। रुरुचे। उषसः। न। भानुना। तूर्वन्। न। यामन्। एतशस्य। नु।
रणे। आ। यः। घृणे। न। ततृषाणः। अजरः॥११॥ नमः। ते। हरसे। शोचिषे।
नमः। ते। अस्तु। अर्चिषे। अन्यान्। ते। अस्मत्। तपंतु। हेतयः। पावकः। अस्म

न्यम्। त्रिवः। नृव। नृषदे। नृसद इति नृऽसदे। वेट्। अप्सुषदे। अप्सु
सद इत्यप्सुऽसदे। बर्हिषदे। बर्हिसद इति बर्हिंऽसदे। वनसद इति वनऽस
दे। स्वर्विद इति स्वःऽविदे। वेट्॥ १२॥ ये। देवाः। देवानाम्। यज्ञियाः। यज्ञि
यानाम्। संवत्सरीणम्। उप। भागम्। आसते। अहुताद इत्यहुतऽअदः। हु
विषः। यज्ञे। अस्मिन्। स्वयम्। पिबंतु। मधुनः। घृतस्य॥ १३॥ ये। देवाः। देवे
षु। अधि। देवत्वमिति देवऽत्वं। आयन्। ये। ब्रह्मणः। पुरएतार इति पुरःऽ
एतारः। अस्य। येभ्यः। न। ऋते। पवते। धाम। किम्। चन। न। ते। दिवः। न।

पृथिव्याः। अधि। स्नुषु। १४। प्राणदा इति प्राणऽदाः। अपानदा इत्यपानऽदाः।
व्यानदा इति व्यानऽदाः। वर्चोदा इति वर्चःऽदाः। वरिवोदा इति वरिवःऽदाः।
अन्यान्। ते। अस्मत्। तपंतु। हेतयः। पावकः। अस्मभ्यम्। शिवः। भव। १५।
अग्निः। तिग्मेन। शोचिषा। यासत्। विश्वम्। नि। अत्रिणम्। अग्निः। नः।
वनुते। रयिम्। १६। यः। इमा। विश्वा। भुवनानि। जुह्वत्। ऋषिः। होता।
नि। असीदत्। पिता। नः। सः। आशिषेत्याऽशिषा। द्रविणम्। इच्छमानः।
प्रथमच्छदिति प्रथमऽछत्। अवरान्। आ। विवेश। १७। किं। स्वित्। आ

सीत्। अधिष्ठानम्। अधिस्थानमित्यधिऽस्थानम्। आरंभणमित्याऽरंभ
णम्। कतमत्। स्वित्। कथा। आसीत्। यतः। भूमिम्। जनयन्। विश्वकर्मे
ति विश्वऽकर्मा। वि। द्याम्। और्णोत्। महिना। विश्वचक्षाइति विश्वऽचक्षाः॥१८॥
विश्वतश्चक्षुरिति विश्वतःऽचक्षुः। उत। विश्वतोमुख इति विश्वतःऽमुखः।
विश्वतोबाहुरिति विश्वतःऽबाहुः। उत। विश्वतस्पात्। विश्वतःपादिति वि
श्वतःऽपात्। सम्। बाहुभ्यामिति बाहुऽभ्याम्। धमति। सम्। पतत्रैः। द्यावाभू
मी इति द्यावाभूमी। जनयन्। देवः। एकः॥१९॥ किम्। स्वित्। वनम्। कः।

उँ इत्युँ। सः। वृक्षः। आस। यतः। द्यावापृथिवी इति द्यावापृथिवी। निष्ट
तक्षुः। निस्ततक्षुरिति निः ऽ ततक्षुः। मनीषिणः। मनसा। पृच्छत। इत्। उँ
इत्युँ। तत्। यत्। अध्यतिष्ठदित्यधि ऽ अतिष्ठत्। भुवनानि। धारयन्॥२०॥
याते। धामानि। परमाणि। या। अवमा। या। मध्यमा। विश्वकर्मन्निति वि
श्वऽकर्मन्। उत। इमा॥ शिक्ष। सखिभ्य इति सखिऽभ्यः। हविषि। स्वधाव इ
ति स्वधाऽवः। स्वयम्। यजस्व। तन्वम्। वृधानः॥२१॥ चक्षुसः। पिता। म
नसा। हि। धीरः। घृतम्। एने इत्येने। अजनत्। नम्नमाने इति नम्नमाने।

यदा। इत्। अंताः। अददृहंत। पूर्वे। आत्। इत्। द्यावापृथिवीँ द्यावापृथिवी। इति १
अप्रथेताम्॥२२॥ विश्वकर्मेति विश्वऽकर्मा। विमना इति विऽमनाः। आत्।
विहाया इति विऽहायाः। धाता। विधातेति विऽधाता। उत। संदृगिति सम्ऽदृक्। परमा
तेषाम्। इष्टानि। सम्। इषा। मदंति। यत्र। सप्तऋषीनिति सप्तऽऋषीन्। पर
ः। एकम्। आहुः॥२३॥ यः। नः। पिता। जनिता। यः। विधातेति विऽधाता।
धामानि। वेद। भुवनानि। विश्वा। यः। देवानाम्। नामधा इति नामऽधाः।
एकः। एव। तम्। संप्रश्नमिति सम्ऽप्रश्नम्। भुवना। यंति। अन्या॥२४॥ ते

आ।अयजंत।द्रविणम्।सम्।अस्मै।ऋषयः।पूर्वे।जरितारः।न।भूना।अ
सूर्ते।सूर्ते।रजसि।निषत्ते।निसत्त इति निऽसत्ते।ये।भूतानि।समकृण्व
न्निति सम्ऽअकृण्वन्।इमानि॥२५॥परः।दिवा।परः।एना।पृथिव्या।प
रः।देवेभिः।असुरैः।यत्।अस्ति।कम्।स्वित्।गर्भम्।प्रथमं।दध्रे।आ
पः।यत्र।देवाः।समपश्यंतेति सम्ऽअपश्यंत।पूर्वे॥२६॥तम्।इत्।
गर्भम्।प्रथमम्।दध्रे।आपः।यत्र।देवाः।समगछंतेति सम्ऽअगछंत।
विश्वे।अजस्य।नाभौ।अधि।एकम्।अर्पितम्।यस्मिन्।विश्वानि।भु

वनानि। तस्थुः ॥ २७ ॥ न। तम्। विदाथ। यः। इमा। जजान। अन्यत्। युष्माक
म्। अंतरम्। बभूव। नीहारेण। प्रावृताः। जल्प्या। च। असुतृप इत्यसुऽतृपः।
उक्थशासः। उक्थशास इत्युक्थऽशासः। चरंति ॥ २८ ॥ विश्वकर्मेति विश्वऽ
कर्मा। हि। अजनिष्ट। देवः। आत्। इत्। गंधर्वः। अभवत्। द्वितीयः। तृतीयः।
पिता। जनिता। ओषधीनाम्। अपाम्। वि। अदधात्। पुरुत्रेति पुरुऽत्रा ॥ २९ ॥ गर्भम् ५
आशुः। शिशानः। वृषभः। न। भीमः। घनाघनः। क्षोभणः। चर्षणीनाम् ॥
संक्रंदन इति सम्ऽक्रंदनः। अनिमिष इत्यनिऽमिषः। एकवीर इत्येकऽवी

॥८१॥

रे२

रः।शतम्।सेनाः।अजयत्।साकम्।इंद्रः॥३०॥संक्रंदनेनेतिसम्ऽक्रंद
नेन।अनिमिषेणेत्यनिऽमिषेण।जिष्णुना।युत्कारेणेतियुत्ऽकारेण।दुश्च्य
वनेनेतिदुःच्यवनेन।धृष्णुना।तत्।इंद्रेण।जयत।तत्।सहध्वम्।युधः।
नरः।इषुहस्तेनेतीषुऽहस्तेन।वृष्णा॥३१॥सः।इषुहस्तैरितीषुऽहस्तैः।
सः।निषंगिभिरितिनिषंगिऽभिः।वशी।संस्रष्टेतिसम्ऽस्रष्टा।सः।युधः।
इंद्रः।गणेन।संसृष्टजिदितिसंसृष्टऽजित्।सोमपाइतिसोमऽपाः।बाहु
शर्द्धीतिबाहुऽशर्द्धी।उग्रधन्वेत्युग्रऽधन्वा।प्रतिहिताभिरितिप्रतिऽहिताभिः। प्रति ७

॥८१॥

अस्ता॥ ३२॥ बृहस्पते। परि। दीय। रथेन। रक्षोहेति रक्षःऽहा। अमित्रान्। अप
बाधमान इत्यपऽबाधमानः। प्रभंजन्निति प्रऽभंजन्। सेनाः। प्रमृण इति प्रऽमृ
णः। युधा। जयन्। अस्माकम्। एधि। अविता। रथानाम्॥ ३३॥ बलविज्ञाय इति
बलऽविज्ञायः। स्थविरः। प्रवीर इति प्रऽवीरः। सहस्वान्। वाजी। सहमानः। उग्रः।
अभिवीर इत्यभिऽवीरः। अभिसत्वेत्यभिऽसत्वा। सहोजा इति सहःऽजाः।
जैत्रं। इंद्र। रथम्। आ। तिष्ठ। गोविदिति गोऽवित्॥ ३४॥ गोत्रभिदमिति गोत्रऽभिदम्।
गोविदमिति गोऽविदम्। वज्रबाहुमिति वज्रऽबाहुम्। जयंतम्। अज्मप्रमृ

णंतमितिप्रऽमृणंतम्।ओजसा।इमम्।सजाताइतिसऽजाताः।अनु।वीरय
ध्वम्।इंद्रम्।सखायः।अनु।सम्।रभध्वम्॥३५॥अभि।गोत्राणि।सहसा।गा
हमानः।अदयः।वीरः।शतमन्युरितिशतऽमन्युः।इंद्रः।दुश्च्यवनइतिदुःऽच्यु
वनः।पृतनाषाट्।अयुध्यः।अस्माकम्।सेनाः।अवतु।प्र।युत्स्वितियुत्ऽसु॥३६॥
इंद्रः।आसाम्।नेता।बृहस्पतिः।दक्षिणा।यज्ञः।पुरः।एतु।सोमः।देवसेना
नामितिदेवऽसेनानाम्।अभिभंजतीनामित्यभिऽभंजतीनाम्।जयंती
नाम्।मरुतः।यंतु।अग्रम्॥३७॥इंद्रस्य।वृष्णः।वरुणस्य।राज्ञः।आदित्याना

म्। मरुताम्। शर्द्धः। उग्रम्। महामनसामिति महाऽमनसाम्। भुवनच्यवा-
नामिति भुवनऽच्यवानाम्। घोषः। देवानाम्। जयताम्। उत्। अस्थात्॥ ३८॥
उत्। हर्षय। मघवन्निति मघऽवन्। आयुधानि। उत्। सत्वनाम्। मामकानाम्।
मनांसि। उत्। वृत्रहन्निति वृत्रऽहन्। वाजिनाम्। वाजिनानि। उत्। रथा-
नाम्। जयताम्। यंतु। घोषाः॥ ३९॥ अस्माकम्। इंद्रः। समृतेष्विति समृऽऋते-
षु। ध्वजेषु। अस्माकम्। याः। इषवः। ताः। जयंतु। अस्माकम्। वीराः। उत्तर-
इत्युत्ऽतरे। भवंतु। अस्मान्। ऊँ सँ। देवाः। अवत। हवेषु॥ ४०॥ अमीषाम्।

चित्तम्। प्रतिलोभयंतीतिप्रतिऽलोभयंती। गृहाण। अंगानि। अप्वे। परा।
इहि। अभि। प्र। इहि। निः। दह। हृत्स्वितिहृत्ऽसु। शोकैः। अंधेन। अमित्राः।
तमसा। सचंताम्॥ ४१॥ अवसृष्टेत्यवऽसृष्टा। परा। पत। शरव्ये। ब्रह्मसं-
शितइतिब्रह्मऽसंशिते। गच्छ। अमित्राम्। प्र। पद्यस्व। मा। अमीषाम्। क-
म्। चन। उत्। शिषः॥ ४२॥ प्र। इत। जयत। नरः। इंद्रः। वः। शर्म। यच्छतु। उ-
ग्राः। वः। संतु। बाहवः। अनाधृष्याः। यथा। असथ॥ ४३॥ असौ। या। सेना।
मरुतः। परेषाम्। अभि। आ। एति। नः। ओजसा। स्पर्द्धमाना। ताम्। गूहत।

तमसा। अपव्रतेनेत्यपऽव्रतेन। यथा। अमीइत्यमी। अन्यः। अन्यम्। न। जानन्॥ ४४॥ यत्र। बाणाः। संपतंतीतिसम्ऽपतंति। कुमाराः। विशिखाइवेतिविशिखाःऽइव। तत्। नः। इंद्रः। बृहस्पतिः। अदितिः। शर्म। यच्छतु। विश्वाहा। शर्म। यच्छतु॥ ४५॥ मर्माणि। ते। वर्मणा। छादयामि। सोमः। त्वा। राजा। अमृतेन। अनु। वस्ताम्। उरोः। वरीयः। वरुणः। ते। कृणोतु। जयंतम्। त्वा। अनु। देवाः। मदंतु॥ ४६॥ ७॥ उत्। एनम्। उत्तरामित्युत्ऽतराम्। नय। अग्ने। घृतेन। आहुतेत्याऽहुत। रायः। पोषेण। सम्। सृज। प्रजयेतिप्रऽ

ति

जया । च । बहुम् । इह । चित् ॥ ४७ ॥ इंद्र । इमम् । प्रतरामिप्रऽतराम् । नय । सजा
तानामिति सऽजातानाम् । असत् । वशी । सम् । एनम् । वर्चसा । सृज । देवा
नां । भागदा इति भागऽदाः । असत् ॥ ४८ ॥ यस्य । कुर्मः । गृहे । हविः । तम् । अग्ने ।
वर्द्धय । त्वम् । तस्मै । देवाः । अधि । ब्रुवन् । अयम् । च । ब्रह्मणः । पतिः ॥ ४९ ॥
पंच । दिशः । देवीः । यज्ञम् । अवंतु । देवीः । अप । अमतिम् । दुर्मतिमिति दुःऽ
मतिम् । बाधमानाः । रायः । पोषे । यज्ञपतिमिति यज्ञऽपतिम् । आभजन्ती
रित्याऽभजंतीः । रायः । पोषे । अधि । यज्ञः । अस्थात् ॥ ५० ॥ समिद्ध इति स

मऽइद्धे । अग्नो । अधि । मा । महानः । ममहान इति ममहानः । उक्थपत्र
इस्फऽपत्रः । ईड्यः । गृभीतः । तप्तम् । घर्मम् । परिगृह्येति परिऽगृह्य । अजं यर
त । ऊर्जा । यत् । यज्ञम् । अयजंत । देवाः ॥ ५१ ॥ दैव्याय । धर्त्रे । जोष्ट्रे । देवश्री
रिति देवऽश्रीः । श्रीमणाः । श्रीमना इति श्रीऽमनाः । शतपया इति शतऽ
पयाः । परिगृह्येति परिऽगृह्य । देवाः । यज्ञम् । देवाः । देवेभ्यः । अध्वर्यंतः । आयन् ।
अस्थुः ॥ ५२ ॥ वीतम् । हविः । शमितम् । शमिता । यजध्यै । तुरीयः । यज्ञः ।
यत्र । हव्यम् । एति । ततः । वाकाः । आशिष इत्याऽशिषः । नः । जुषंताम् ॥ ५३ ॥
″ ″

सूर्यरश्मिरितिसूर्यऽरश्मिः। हरिकेशइतिहरिऽकेशः। पुरस्तात्। सवि
ता। ज्योतिः। उत्। अयान्। अजस्रम्। तस्य। पूषा। प्रसवइतिप्रऽसवे। या
ति। विद्वान्। संपश्यन्नितिसम्ऽपश्यन्। विश्वा। भुवनानि। गोपाः॥५७॥
विमानइतिविऽमानः। एषः। दिवः। मध्ये। आस्ते। आपप्रिवानित्याऽपप्रिऽ
वान्। रोदसीइतिरोदसी। अंतरिक्षम्। सः। विश्वाचीः। अभि। चष्टे। घृ
ताचीः। अंतरा। पूर्वं। अपरम्। च। केतुं॥५८॥ उक्षा। समुद्रः। अरुणः।
सुपर्णइतिसुऽपर्णः। पूर्वस्य। योनिम्। पितुः। आ। विवेश। मध्ये। दिवः।

निहित इति निऽहितः।पृश्निः।अजस्रमा।वि।चक्रमे।रजसः।पाति।अंतौ॥५६॥
दिवहूरिति दिवऽहूः।यज्ञः।आ।च।वक्षत्।सुम्नहूरिति सुम्नऽहूः।यज्ञः।
आ।च।वक्षत्।यक्षत्।अग्निः।देवः।देवान्।आ।च।वक्षत्॥५७॥वाज
स्य।मा।प्रसवइति प्रऽसवः।उद्ग्राभेणेत्युत्ऽग्राभेण।उत्।अग्रभीत्।अ
धा।सपत्नानिति सऽपत्नान्।इंद्रः।मे।निग्राभेणेति निऽग्राभेण।अधरा
न्।अकरित्यकः॥५८॥उद्ग्राभमित्युत्ऽग्राभम्।च।निग्राभमिति निऽग्रा
भम्।च।ब्रह्म।देवाः।अवीवृधन्।अध।सपत्नानिति सऽपत्नान्।इंद्रा

ग्नीऽइती प्राग्नी। मे। विषूचीनानाम्। वि। अस्यतां॥ ५९ ॥ क्रमध्वम्। अग्निना।
नाकम्। उख्यं। हस्तेषु। बिभ्रतः। दिवः। पृष्ठं। स्वः। गत्वा। मिश्राः। देवेभिः। आ
ध्वम्॥ ६०॥ प्राचीम्। अनु। प्रदिशमिति प्रऽदिशं। प्र। इहि। विद्वान्। अग्नेः।
अग्ने। पुरोअग्निरितिपुरःऽअग्निः। भव। इह। विश्वाः। आशाः। दीद्यानः।
वि। भाहि। ऊर्ज्जम्। नः। धेहि। द्विपद इति द्विऽपदे। चतुष्पदे। चतुःपद इ
तिचतुःऽपदे॥ ६१॥ पृथिव्याः। अहम्। उत्। अंतरिक्षम्। आ। अरुहम्।
अंतरिक्षात्। दिवं। आ। अरुहम्। दिवः। नाकस्य। पृष्ठात्। स्वः। ज्योतिः। अ

गां। अहं ॥ ६२ ॥ स्वः। यंतः। न। अप। ईक्षंते। आ। द्यां। रोहंति। रोदसी इति रो
दसी। यज्ञं। ये। विश्वतोधारमिति विश्वतःऽधारं। सुविद्वांस इति सुऽवि
३९ द्वांसः। वितेनिर इति विऽतेनिरे ॥ ६३ ॥ अग्ने। प्र। इहि। प्रथमः। देवयतामि
ति देवऽयतां। चक्षुः। देवानां। उत। मर्त्यानां। इयक्षमाणाः। भृगुभिरिति भृ
गुऽभिः। सजोषा इति सऽजोषाः। स्वः। यंतु। यजमानाः। स्वस्ति ॥ ६४ ॥ अग्ने।
सहस्राक्षेति सहस्रऽअक्ष। शतमूर्द्धन्निति शतऽमूर्द्धन्। शतं। ते। प्राणाः। सह
स्रं। व्याना इति विऽआनाः। त्वं। साहस्रस्य। रायः। ईशिषे। तस्मै। ते। विधेम।

॥९५॥

२ति

वाजाय। स्वाहा॥ ६५॥ सुपर्ण इति सुऽपर्णः। असि। गरुत्मान्। पृष्ठे। पृथिव्याः। सी
द। भासा। अंतरिक्षम्। आ। पृण। ज्योँषा। दिवम्। उत्। स्तभान। तेजसा। दिशः।
उत्। दृंह॥ ६६॥ आजुह्वान इत्याऽजुह्वानः। सुप्रतीक इति सुऽप्रतीकः। पुरस्ता
त्। अग्ने। स्वम्। योनिम्। आ। सीद। साध्येति साधुऽया॥ ६७॥ तां। सवितुः।
वरेण्यस्य। चित्रां। आ। अहम्। वृणे। सुमतिमिति सुऽमतिम्। विश्वजन्यामि
ति विश्वऽजन्याम्। यां। अस्य। कण्वः। अदुहत्। प्रपीनामिति प्रऽपीनां। सहस्र
धारामिति सहस्रऽधाराम्। पयसा। महीम्। गां॥ ६८॥ विधेम। ते। परमे।

॥९५॥

जन्मन्। अग्ने। विधेम। स्तोमैः। अवरे। सधस्थ इति सधऽस्थे। यस्मात्।
योनेः। उदारिथेत्युत्ऽआरिथ। येजे। तम्। प्र। त्वे इति त्वे। हवीꣳषि। जुहुरे। स
मिद्ध इति समऽइद्धे॥ ६९॥ प्रेद्ध इति प्रऽइद्धः। अग्ने। दीदिहि। पुरः। नः। अजस्र
या। सूर्म्या। यविष्ठ। त्वां। शश्वंतः। उप। यंति। वाजाः॥ ७०॥ चित्तिं। जुहोमि। म
नसा। घृतेन। यथा। देवाः। इह। आगमंनित्याऽगमन्। वीतिहोत्रा इति वीतिऽ
६३ होत्राः। ऋतावृधः। ऋतवृधँसँवृधः। पत्ये। विश्वस्य। भूमनः। जुहोमि। वि
श्वकर्मण इति विऽकर्मणे। विश्वाहा। अदाभ्यं। हविः॥ ७१॥ सप्त। ते। अग्ने। स
६तऽ

॥१६॥

मिध इति सम्ऽइधः। सप्त। जिह्वाः। सप्त। ऋषयः। सप्त। धाम। प्रियाणि।
सप्त। होत्राः। सप्तधा। त्वा। यजंति। सप्त। योनीः। आ। पृणस्व। घृतेन। स्वाहा॥७२॥
शुक्रज्योतिरिति शुक्रऽज्योतिः। च। चित्रज्योतिरिति चित्रऽज्योतिः। सत्यज्योति
रिति सत्यऽज्योतिः। ज्योतिष्मान्। शुक्रः। ऋतपा इत्यृतऽपाः। अत्यंहा इत्यतिऽ
अंहाः॥७३॥ ईदृङ्। अन्यादृङ्। सदृङ्ङिति सऽदृङ्। प्रतिसदृङ्ङिति प्रतिऽ
सदृङ्। मितः। सम्मित इति सम्ऽमितः। सभरा इति सऽभराः॥७४॥ ऋतजि
दित्यृतऽजित्। सत्यजिदिति सत्यऽजित्। सेनजिदिति सेनऽजित्। सुषेणः।

॥१६॥

त्र १

सुसेनइतिसुऽसेनः।अंन्तिमित्रइत्यंन्तिऽमित्रः।दूरेअमित्रँइतिदूरेऽअमि
त्रः।गणः॥७५॥ऋतः।सत्यः।ध्रुवः।धरुणः।धर्त्ता।विधर्त्तेतिविऽधर्त्ता।विधा
रयइतिविऽधारयः॥७६॥ईदृक्षासः।एतादृक्षासः।ऊँइत्यूँ।सु।नः।सदृक्षा
४६ सइतिसऽदृक्षासः।प्रतिसँदृक्षासइतिँऽसदृक्षासः।आ।इतन।मितासः।सं प्रति ४
मितासइतिसम्ऽमितासः।नः।अद्य।सभरसइतिसऽभरसः।मरुतः।
यज्ञे।अस्मिन्॥७७॥स्वतवानितिस्वऽतवान्।प्रघासीतिप्रऽघासी।सांत
पनइतिसाम्ऽतपनः।गृहमेधीतिगृहऽमेधी।क्रीडी।शाकी।उज्जेषीत्य

नूऽर्जेषी ॥ ७८ ॥ इंद्रं । देवीः । विशः । मरुतः । अनुवर्त्मान इत्यनुऽवर्त्मानः ।
अभवन् । यथा । इंद्रम् । देवीः । विशः । मरुतः । अनुवर्त्मान इत्यनुऽवर्त्मानः ।
अभवन् । एवं । इमम् । यजमानम् । देवीः । च । विशः । मानुषीः । च । अनु
वर्त्मान इत्यनुऽवर्त्मानः । भवंतु ॥ ७९ ॥ इति शुक्लयजुर्वेदकाण्वपद
संहितायां अष्टदशोध्यायः ॥ १८ ॥ हरिः ॐ ॥ इमम् । स्तनम् । ऊर्जस्वंतम् ।
धय । अपाम् । प्रपीनमिति प्रऽपीनम् । अग्ने । सरिरस्य । मध्ये । उत्सं ।
जुषस्व । शतधारमिति शतऽधारम् । अर्वन् । समुद्रियम् । सदनम् ।

आ । विशस्व ॥ १ ॥ घृतम् । मिमिक्षे । घृतं । अस्य । योनिः । घृते । श्रितः ।
घृतम् । उँ इ सँ । अस्य । धाम । अनुष्वधम् । अनुस्वधमित्यनु ऽ स्वधम् ।
आ । वह । मादयस्व । स्वाहाकृतमिति स्वाहा ऽ कृतम् । वृषभ । वक्षि । हव्य
म् ॥ २ ॥ समुद्रात् । ऊर्मिः । मधुमानिति मधु ऽ मान् । उत् । आरत् । उप ।
अंशुना । सम् । अमृतत्वमित्यमृत ऽ त्वम् । आनट् । घृतस्य । नाम । गु
ह्यम् । यत् । अस्ति । जिह्वा । देवानाम् । अमृतस्य । नाभिः ॥ ३ ॥ वयम् । नाम । प्र ।
ब्रवाम । घृतस्य । अस्मिन् । यज्ञे । धारयाम । नमोभिरिति नमः ऽ भिः । उ ।

॥२२॥

इधः । नसंत । ताः । जुषाणः । हर्यति । जातवेदा इति जातऽवेदाः ॥९॥ कन्या
इवेति कन्याःइव । वहतुं । एतवे । उँ इतिँ । अंजि । अंजानाः । अभि । चाक
शीमि । यत्र । सोमः । सूयते । यत्र । यज्ञः । घृतस्य । धाराः । अभि । तत् । पवंते ॥१०॥
ति अभि । अर्षत । सुष्टुतिम् । सुस्तूमिति सुऽस्तुतिं । गव्यं । आजिं । अस्मासु ।
भद्रा । द्रविणानि । धत्त । इमं । यज्ञं । नयत । देवता । नः । घृतस्य । धाराः ।
मधुमदिति मधुऽमत् । पवंते ॥११॥ धामन् । ते । विश्वम् । भुवनम् । अ
धि । श्रितं । अंतरित्यंतः । समुद्रे । हृदि । अंतः । आयुषि । अपाम् । अनी

॥२२

३ प्रसितिरितिप्रऽसितिः।

के।समिथइतिसम्ऽइथे।यः।आनतइत्याऽनतः।तम्।उत्स्याम।मधुमं
तमितिमधुऽमंतं।ते।ऊर्मिं॥१२॥वाजः।चमे।प्रसवइतिप्रऽसवः।प्रयति
रितिप्रऽयतिः।धीतिः।क्रतुः।स्वरः।श्लोकः।श्रावः।श्रुतिः।ज्योतिः।स्वरि
तिस्वः।चमे।यज्ञेन।कल्पंतां॥१३॥प्राणः।अपानइत्यपऽआनः।व्यान
इतिविऽआनः।असुः।चित्तम्।आधीतमित्याऽधीतं।वाक्।मनः।चक्षुः।
श्रोत्रम्।दक्षः।बलम्॥१४॥ओजः।सहः।आत्मा।तनूः।शर्म।वर्म।अंगा
नि।अस्थीनि।परूंषि।शरीराणि।आयुः।जरा॥१५॥ज्यैष्ठ्यम्।आ

त्विपसमित्य। त्विऽपसं। मन्युः। भामः। अमः। अनः। जेमा। महिमा। वरिमा।
प्रथिमा। वर्षिमा। द्राघिमा। वृधं। वृद्धिः ॥१६॥ सस्यं। स्वधा। जगत्। घनं।
विश्वं। महः। क्रीळा। मोदः। जातं। जनिष्यमाणम्। सूक्तमिति सुऽउक्तं। सुहु
तमिति सुऽहुतं ॥१७॥ वित्तं। वेद्यं। नूतम्। भविष्यत्। सुगमिति सुऽगं। सु
पथ्यमिति सुऽपथ्यम्। ऋद्धं। ऋद्धिः। क्लृप्तं। क्लृप्तिः। मतिः। सुमतिरिति सुऽ
मतिः ॥१८॥ यंता। धर्त्ता। क्षेमः। धृतिः। विश्वं। महः। संविदिति सम्ऽवि
त्। क्षात्रं। सीरम्। लुपः। सूः। प्रसूरिति प्रऽसूः ॥१९॥ शम्। मयः। प्रियम्।

अनुकामइत्यनुऽकामः। कामः। सौमनसः। भगः। द्रविणम्। श्रेयः। वसी
यः। यशः।।२०।। ऊर्क्। सूनृता। पयः। रसः। घृतम्। मधु। सग्धिः। सपीति
रितिसऽपीतिः। कृषिः। वृष्टिः। जैत्रम्। औद्भिद्यमित्यौत्ऽभिद्यम्।।२१।।
ऋतम्। अमृतम्। अयक्ष्मं। अनामयत्। जीवातुः। दीर्घायुत्वमितिदी
र्घायुऽत्वम्। अनमित्रम्। अभयम्। सुगमितिसुऽगम्। शयनम्। सूषाइ
तिसुऽउषाः। सुदिनमितिसुऽदिनम्।।२२।। रयिः। रायः। पुष्टम्। पुष्टिः। वि
भ्वितिविऽभु। प्रभ्वितिप्रऽभु। पूर्णम्। पूर्णतरमितिपूर्णऽतरम्। कुयवम्।

॥१॥

अक्षितम्।अन्नम्।अक्षुत्॥२३॥व्रीहयः।यवाः।माषाः।तिलाः।मुद्गाः।
खल्वाः।प्रियंगवः।अणवः।श्यामाकाः।नीवाराः।गोधूमाः।मसूराः॥२४॥
अश्मा।मृत्तिका।गिरयः।पर्वताः।सिकताः।वनस्पतयः।हिरण्यम्।अ
यः।सीसम्।त्रपु।श्यामम्।लोहम्॥२५॥अग्निः।आपः।वीरुधः।ओष
धयः।कृष्टपच्याः।इति।कृष्टऽपच्याः।अकृष्टपच्याः।इत्यकृष्टऽपच्याः।ग्रा
म्याः।पशवः।आरंण्याः।वित्तं।वित्तिः।भूतम्।भूतिः॥२६॥वसु।व
सतिः।कर्म।शक्तिः।अर्थः।यामः।इत्या।गतिः॥२७॥अग्निः।इंद्रः।सो

॥१॥

मः। सविता। सरस्वती। पूषा। ब्रहस्पतिः॥ २८॥ मित्रः। वरुणः। धाता।
त्वष्टा। मरुतः। विश्वे। देवाः॥ २९॥ पृथिवी। अंतरिक्षम्। द्यौः। समाः। नक्ष
त्राणि। दिशः। इंद्रः॥ ३०॥ अंशुः। रश्मिः। अदाभ्यः। अधिपतिरित्यधिऽ
पतिः। उपांशुरित्युपऽअंशुः। अंतर्याम इत्यंतःऽयामः। ऐंद्रवायवः।
मैत्रावरुणः। आश्विनः। प्रतिप्रस्थान इति प्रतिऽप्रस्थानः। शुक्रः। मंथी॥ ३१॥
आग्रयणः। वैश्वदेव इति वैश्वऽदेवः। ध्रुवः। वैश्वानरः। ऐंद्राग्नः। महा
वैश्वदेव इति महाऽवैश्वदेवः। मरुत्वतीयाः। निष्केवल्यः। निःऽकेवल्य

इति निःऽकेवल्यः । सावित्रः । स्वारस्वतः । पात्नीवत इति पात्नीऽवतः ।
हारियोजन इति हारिऽयोजनः ॥ २२ ॥ स्रुचः । चमसाः । वायव्यानि । द्रो
णकलश इति द्रोणऽकलशः । ग्रावाणः । अधिषवणे । अधिसवने इ
त्यधिऽसवने । पूतभृदिति पूतऽभृत् । आधवनीय इत्याऽधवनीयः ।
वेदिः । बर्हिः । स्वगाकार इति स्वगाऽकारः । अवभृथ इत्यवऽभृथः ॥ २३ ॥
अग्निः । घर्मः । अर्कः । सूर्यः । प्राणः । अश्वमेध इत्यश्वऽमेधः । पृथिवी ।
अदितिः । दितिः । द्यौः । अंगुलयः । शाक्वरयः । दिशः ॥ २४ ॥ व्रतम् । ऋत

वः। संवत्सरः। तपः। अहोरात्रे इत्यहोरात्रे। उर्वष्ठीवे इत्यूर्वष्ठीवे। बृह
द्रथंतरे इति बृहत्ऽरथंतरे। ३५ एका। तिस्रः। पंच। सप्त। नव। एका
दश। त्रयोदशेति त्रयःऽदश। पंचदशेति पंचऽदश। सप्तदशेति स
प्तऽदश। नवदशेति नवऽदश। एकविꣳशतिरित्येकऽविꣳशतिः। त्रयो
विꣳशतिरिति त्रयःऽविꣳशतिः। पंचविꣳशतिरिति पंचऽविꣳशतिः।
सप्तविꣳशतिरिति सप्तऽविꣳशतिः। नवविꣳशतिरिति नवऽविꣳश
तिः। एकत्रिꣳशदित्येकऽत्रिꣳशत्। त्रयस्त्रिꣳशदिति त्रयःऽत्रिꣳशत्॥ ३५॥

॥३॥

चतस्रः। अष्टौ। द्वादश। षोडश। विंशतिः। चतुर्विंशतिरिति चतुःऽ
विंशतिः। अष्टाविंशतिरित्यष्टाऽविंशतिः। द्वात्रिंशत्। षड्त्रिंश
दिति षट्त्रिंशत्। चत्वारिंशत्। चतुश्चत्वारिंशदिति चतुःऽच
त्वारिंशत्। अष्टाचत्वारिंशदित्यष्टाऽचत्वारिंशत्॥२७॥ त्र्यवि
रिति त्रिऽअविः। त्र्यवीति त्रिऽअवी। दित्यवाडिति दित्यऽवाट्। दित्यौ
ही। पंचाविरिति पंचऽअविः। पंचावीति पंचऽअवी। त्रिवत्स इति त्रिऽ
वत्सः। त्रिवत्सेति त्रिऽवत्सा। तुर्यवाडिति तुर्यऽवाट्॥ तुर्यौही॥२८॥

॥३॥

पष्ठवाडिति पष्ठऽवाट्।पष्ठौही।उक्षा।वशा।ऋषभः।वेहत्।अनड्वान्।
धेनुः।च।मे।यज्ञेन।कल्पंताम्॥२७॥वाजाय।स्वाहा।प्रसवायेति प्रऽसवा
य।अपिजायेत्यपिऽजाय।क्रतवे।वसवे।अहर्पतये।अहःपतय इत्य
हःऽपतये।अह्ने।मुग्धाय।मुग्धाय।वैनꣳशिनाय।विनꣳशिन इति विऽ
नꣳशिने।आंत्यायनायेत्यांत्यऽआयनाय।अंत्याय।भौवनाय।भुवन
स्य।पतये।अधिपतय इत्यधिऽपतये।प्रजापतय इति प्रजाऽपतये॥२८॥
इयम्।ते।राट्।मित्राय।यंता।असि।यमनः।ऊर्जे।त्वा।वृष्ट्यै।त्वा।प्रजा

नामिति प्रऽजानाम् । त्वा । आधिपत्यायेत्याधिऽपत्याय ॥ ७१ ॥ आयुः । यज्ञेन । कल्पतां । प्राणः । चक्षुः । श्रोत्रम् । वाक् । मनः । आत्मा । पृष्ठं । ब्रह्म । यज्ञः । ज्योतिः । स्वः । यज्ञेन । कल्पतां ॥ ७२ ॥ स्तोमः । यजुः । ऋक् । साम । बृहत् । रथंतरमिति रथंऽतरं । स्वः । देवाः । अगन्म । अमृताः । अभूम । प्रजापतेरिति प्रजाऽपतेः । प्रजा इति प्रऽजाः । अभूम । वेट् । स्वाहा ॥ ७३ ॥ इति शुक्लयजुर्वेदकाण्वपदसंहितायां एकोनविंशतिमोध्यायः ॥ १९ ॥ १९ ॥

हरिः ॐ । म ॥ विश्वे । अद्य । मरुतः । विश्वे । ऊती ॥ विश्वे । भवंतु । अग्नयः । स

मिद्धा इति सम्ऽइद्धाः । विश्वे । नः । देवाः । अवसा । आ । गमंतु । विश्वं । अ
स्तु । द्रविणं । वाजः । अस्मे इत्यस्मे ॥२॥ वाजः । नः । सप्त । प्रदिशः इति प्रऽ
दिशः । चतस्रः । वा । परावत इति पराऽवतः । वाजः । नः । विश्वैः । देवैः ।
धनसाता इति धनऽसातौ । इह । अवतु ॥३॥ वाजः । नः । अद्य । प्र । सुवा
ति । दानम् । वाजः । देवान् । ऋतुभिरित्यृतुऽभिः । कल्पयाति । वाजः । हि । मा ।
सर्ववीरमिति सर्वऽवीरम् । चकार । सर्वाः । आशाः । वाजपतिरिति वाजऽ
पतिः । भवेयम् । वाजः । पुरस्तात् । उत । मध्यतः । नः । वाजः । देवान् । हवि

षावर्पयाणि । वाजः । हि । मा । सर्वंवीरमितिसर्वऽवीरम् । चकार । विश्वाः ।
आशाः । वाजपतिरितिवाजऽपतिः । जयेयम् ॥ ४ ॥ सं । मा । सृजामि । पयसा ।
पृथिव्याः । सम् । मा । सृजामि । अद्भिरित्यप्ऽभिः । ओषधीभिः । सः । अह
म् । वाजं । सनेयं । अग्ने ॥ ५ ॥ पयः । पृथिव्याम् । पयः । ओषधीषु । पयः । दि
वि । अंतरिक्षे । पयः । धाः । पयस्वतीः । प्रदिश इतिप्रऽदिशः । संतु । मह्यम ॥ ६ ॥
सरस्वत्यै । वाचः । यंतुः । यंत्रेण । अग्नेः । साम्राज्येनेतिसाम्ऽराज्येन । अ
भि । सिंचामि ॥ ७ ॥ ऋताषाट् । ऋतधामेत्यृतऽधामा । अग्निः । गंधर्वः ।

तस्य। ओषधयः। अप्सरसः। मुदः। नाम। सः। नः। इदम्। ब्रह्म। क्षत्रम्।
पातु। तस्मै। स्वाहा। वाट्। ताभ्यः। स्वाहा॥ ८॥ सꣳहित इति सम्ऽहितः। वि
श्वसामेति विश्वऽसामा। सूर्यः। गंधर्वः। तस्य। मरीचयः। अप्सरसः। आ
युवः। नाम॥ ९॥ सुषुम्नः। सुसुम्न इति सुऽसुम्नः। सूर्यरश्मिरिति सूर्यऽ
रश्मिः। चंद्रमाः। गंधर्वः। तस्य। नक्षत्राणि। अप्सरसः। भेकुरयः। ना
म॥ १०॥ इषिरः। विश्वव्यचा इति विश्वऽव्यचाः। वातः। गंधर्वः। तस्य।
आपः। अप्सरसः। ऊर्जः। नाम॥ ११॥ भुज्युः। सुपर्ण इति सुऽपर्णः। यज्ञः।

॥६॥

गंधर्वः। तस्य। दक्षिणाः। अप्सरसः। स्तावाः। नाम॥ ४२॥ प्रजापतिरिति
प्रजाऽपतिः। विश्वकर्मेति विश्वऽकर्मा। मनः। गंधर्वः। तस्य। ऋक्सामानी
ऋक्ऽसामानि। अप्सरसः। एष्टय इत्याईष्टयः। नाम॥ ४३॥ सः। नः। भु
वनस्य। पते। प्रजापत इति प्रजाऽपते। यस्य। ते। उपरि। गृहाः। यस्य।
वा। इह। अस्मै। ब्रह्मणे। क्षत्राय। महि। शर्म। यच्छ। स्वाहा॥ ४४॥ समुद्रः।
असि। नभस्वान्। आर्द्रदानुरित्यार्द्रऽदानुः। शंभूरिति शम्ऽभूः। मयोभूरि
ति मयःऽभूः। अभि। मा। वाहि। स्वाहा। मारुतः। मरुतां। गणः। अवस्यूः। दुव

॥६॥

स्यानू॥१८॥ रूचम्। नः। धेहि। ब्राह्मणेषु। रूचम्। राज्स्विति राजऽसु। नः।

कृधि। रूचम्। विश्येषु। शूद्रेषु। मयि। धेहि। रूचा। रूचम्॥१८॥ तत्। त्वा।

यामि। ब्रह्मणा। वंदमानः। तत्। आ। शास्ते। यजमानः। हविर्भिरितिहविःऽ

भिः। अहेळमानः। वरुण। इह। बोधि। उरुशंसेत्युरुऽशंस। मा। नः। आ

युः। प्र। मोषीः॥१९॥ स्वः। न। घर्मः। अर्कः। शुक्रः। ज्योतिः। सूर्यः। स्वाहा॥२०॥

अग्निम्। युनज्मि। शवसा। घृतेन। दिव्यं। सुपर्णमितिसुऽपर्णम्। वयसा।

बृहंतं। तेन। गमेम। ब्रध्नस्य। विष्टपम्। स्वरितिस्वः। रुहाणाः। अधि। ना

॥७॥

क्रम। उत्तममित्युत्ऽतमम्॥ २१॥ इमौ। ते। पक्षौ। अजरौ। पतत्रिणः।
याभ्याम्। रक्षांसि। अपहंसीत्यपऽहंसि। अग्ने। ताभ्याम्। पतेम।
सुकृतामिति सुऽकृताम्। उँ इत्यूँ। लोकं। यत्र। ऋषयः। प्रथमजा इति प्रथ जग्मुः।३
मऽजाः। पुराणाः॥ २२॥ इंदुः। दक्षः। श्येनः। ऋतावा। ऋतवेत्यृतऽवा। हि
रंण्यपक्ष इति हिरण्यऽपक्षः। शकुनः। भुरण्युः। महान्। सधस्थ इति स
धऽस्थे। ध्रुवः। आ। निषत्तः। निसत्त इति निऽसत्तः। नमः। ते। अस्तु।
मा। मा। हिंसीः॥ २३॥ दिवः। मूर्द्धा। असि। पृथिव्याः। नाभिः। ऊर्क्। अपां।

॥७॥

ओषधीनाम्।विश्वायुरितिविश्वऽआयुः।शर्म।सप्रथाइतिसऽप्र
थाः।नमः।पथे॥२४॥विश्वस्य।मूर्धन्।अधि।तिष्ठसि।श्रितः।समु
द्रे।ते।हृदयं।अप्स्वित्यप्ऽसु।आयुः।अपः।दत्त।उ दधिमित्युदऽधि
म्।भिंत।दिवः।पर्जन्यात्।अंतरिक्षात्।पृथिव्याः।ततः।नः।वृष्ट्या।
अव॥२५॥इष्टः।यज्ञः।भृगुभिरितिभृगुऽभिः।आशीर्दाइत्याशीःऽ
दाः।वसुभिरितिवसुऽभिः।तस्य।नः।इष्टस्य।प्रीतस्य।द्रविण।इह।
आ।गमेः॥२६॥इष्टः।अग्निः।आहुतइत्याऽहुतः।पिपर्तु।नः।इष्टंह

विः। स्वगेतिस्वःऽगाः। दुदं। देवेभ्यः। नमः। ॥५७॥ यत्। आकूतादित्याऽकू
तात्। समसुस्रोदितिसम्ऽअसुस्रोत्। हृदः। वा। मनसः। वा। सँत्तमितिस भृ २
म्ऽभृतम्। चक्षुषः। वा। तत्। अनुप्रेतेत्यनुऽप्रेत। सुकृतामितिसुऽकृ
ताम्। उँ। इत्यूँ। लोकम्। यत्र। ऋषयः। जग्मुः। प्रथमजाइतिप्रथमऽजाः।
पुराणाः ॥५८॥ एतम्। सधस्थेतिसधऽस्थ। परि। ते। ददामि। यम्। आव
हादित्याऽवहात्। शेवधिमितिशेवऽधिं। जातवेदाइतिजातऽवेदाः।
अन्वागंतेत्यनुऽआगंता। यज्ञपतिरितियज्ञऽपतिः। वः। अत्र। तं।

स्म। जानीत। परमे। व्योमन्निति वि ऽ ओमन्। ५९॥ एतम्। जानाथ। प
रमे। व्योमन्निति वि ऽ ओमन्। देवाः। सधस्था इति सध ऽ स्थाः॥ विद।
रूपम्। अस्य। यत्। आगच्छादित्याऽ गच्छात्। पथिभिरिति पथि ऽ भिः।
देवयानैरिति देव ऽ यानैः। इष्टापूर्त्ते इतीष्टापूर्त्ते। कृणवथ। आविः।
अस्मै ॥ ६० ॥ प्रस्तरेणेति प्र ऽ स्तरेण। परिधिनेति परिऽधिना। स्रुचा। वे
द्या। च। बर्हिषा। ऋचा। इमम्। यज्ञम्। नः। नय। स्वः। देवेषु। गंतवे ॥ ६१ ॥
यत्। दत्तं। यत्। परादानमिति परा ऽ दानम्। यत्। पूर्त्तं। याः। च। दक्षि

णाः।तनूः।अग्निः।वैश्वकर्मणइतिवैश्वऽकर्मणः।स्वः।देवेषु।नः।दधत्॥३४॥
यत्र।धाराः।अनपेताइत्यनपऽइताः।मध्वः।घृतस्य।च।याः।तत्।अग्निः
वैश्वकर्मणइतिवैश्वऽकर्मणः।स्वं।देवेषु।नः।दधत्॥३५॥ये।अग्नयः।
पांचजन्याइतिपांचऽजन्याः।अस्याम्।पृथिव्यां।अधि।तेषां।असि।त्वं।
उत्तमइत्युत्ऽतमः।प्र।नः।जीवातवे।सुव॥३६॥वार्त्रहत्यायेतिवार्त्रऽ
हत्याय।शवसे।पृतनाषाह्याय।पृतनासह्यायेतिपृतनाऽसह्याय।च।
इंद्र।त्वा।आ।वर्त्तयामसि॥३७॥सहदानुमितिसहऽदानुम्।पुरुहूते

ति पुरुऽहूत। क्षियंतं। अहस्तं। इंद्र। सं। पिणक्। कुणारुं। अभि। वृत्रं। वर्ध
मानं। पियारुम्। अपादं। इंद्र। तवसा। जघंथ॥ ३८॥ मृगः। न। भीमः। कुच
रः। गिरिष्ठाः। गिरिस्था इति गिरिऽस्थाः। परावत इति पराऽवतः। आ। ज
गंथ। परस्याः। सृकम्। संशायेति सम्ऽशाय। पविम्। इंद्र। तिग्मं। वि।
शत्रून्। ताळ्हि। वि। मृधः। नुदस्व॥ ४०॥ वैश्वानरः। नः। ऊतये। आ। प्र।
यातु। परावत इति पराऽवतः। अग्निः। नः। सुष्टुतीः। सुस्तुतीरिति सुऽस्तुतीः।
उप॥ ४१॥ पृष्टः। दिवि। पृष्टः। अग्निः। पृथिव्याम्। पृष्टः। विश्वाः। ओषधीः।

आ। विवेश। वैश्वानरः। सहसा। पृष्टः। अग्निः। सः। नः। दिवा। सः। रिषः।
पातु। नक्तं॥ ५२॥ अश्याम। तम्। कामम्। अग्ने। तव। ऊती। अश्याम। रयिम्।
रयिव इति रयिऽवः। सुवीरमिति सुऽवीरम्। अश्याम। वाजम्। अभि। वाज
यंतः। अश्याम। द्युम्नम्। अजर। अजरम्। ते॥ ५३॥ वयम्। ते। अद्य। ररि
म। हि। कामम्। उत्तानहस्ता इत्युत्तानऽहस्ताः। नमसा। उपसद्येत्युपऽसद्य।
यजिष्ठेन। मनसा। यक्षि। देवान्। अस्रेधता। मन्मना। विप्रः। अग्ने॥ ५४॥
धामछदिति धामऽछत्। अग्निः। इंद्रः। ब्रह्मा। देवः। बृहस्पतिः। सचे

नसइति सऽचैतसः। विश्वै। देवाः। यज्ञम्। आ। अगमंतु। नः। शुन्ने॥ ७५॥
त्वय्यं विष्ट०॥ ७६॥ इति शुक्लयजुर्वेदकाण्वपदसंहितायां विंशतितमोऽध्या
यः समाप्तः॥ श्रीगजाननार्पणमस्तु॥ छ॥ शुभं भवतु॥ छ॥ छ॥

इति गणपते दशक समाप्तः ॥ श्रीगजाननार्पणमस्तु ॥ छ ॥ शुभं भवतु

स्वाद्धिंत्सादशकप्रा रंभः॥ श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥

॥ १ ॥

श्रीगणेशायनमः ॥ श्रीगुरुभ्योनमः ॥ ध ॥ हरिः ॐ ॥ स्वाद्वीम् । त्वा । स्वादु
ना । तीव्राम् । तीव्रेण । अमृतां । अमृतेन । मधुमतीमिति मधुऽमतीम् । मधु
मतेति मधुऽमता । सृजामि । सम् । सोमेन । सोमः । असि । अश्विभ्यामित्य
श्विऽभ्याम् । पच्यस्व । सरस्वत्यै । इन्द्राय । सुत्राम्ण इति सुऽत्राम्णे । पच्यस्व ॥ १ ॥ प
परि । इतः । सिंचत । सुतम् । सोमः । यः । उत्तममित्युत्ऽतमम् । हविः । दध
न्वान् । यः । नर्य्यः । अप्स्वित्यप्ऽसु । अन्तः । आ । सुषाव । सुसावेति सुसाव ।
सोमम् । अद्रिभिरित्यद्रिऽभिः ॥ २ ॥ वायोः । पूतः । पवित्रेण । प्राङ् । सोमः ।

॥ १ ॥

अतिद्रुत इत्यतिऽद्रुतः । प्रत्यङ् । सोमः । अतिद्रुत इत्यतिऽद्रुतः । इन्द्रस्य ।
युज्यः । सखा ॥ ३ ॥ पुनाति । ते । परिस्रुतमिति परिऽस्रुतम् । सोमम् । सू
र्यस्य । दुहिता । वारेण । शश्वता । तना ॥ ४ ॥ ब्रह्म । क्षत्रम् । पवते । तेजः ।
इन्द्रियम् । सुरया । सोमः । सुतः । आसुत इत्याऽसुतः । मदाय । शुक्रेण ।
देव । देवताः । पिपृग्धि । रसेन । अन्नम् । यजमानाय । धेहि । तेजसे ।
वीर्याय । बलाय । त्वा ॥ ५ ॥ नाना । हि । वाम् । देवहितमिति देवऽहितम् ।
सदः । कृतम् । मा । सम् । सृक्षाथाम् । परमे । व्योमन्निति विऽओमन् ।

सुरा। त्वम्। असि। शुष्मिणी। सोमः। एषः। मा। मा। हिꣳसीः। स्वाम्। योनि
म्। आविशन्तीत्याऽविशन्ती॥६॥ आश्विनम्। तेजः। सारस्वतम्। वीर्य्यम्।
ऐन्द्रम्। बलम्। मोदाय। आनन्दायेत्याऽनन्दाय। महसे। स्वा ॥७॥ तेजः।
असि। तेजः। मयि। धेहि। वीर्यम्। बलम्। ओजः। मन्युः। मन्युम्। सहः।
असि। सहः। मयि। धेहि॥८॥ या। व्याघ्रम्। विषूचिका। उभौ। वृकम्।
चार क्षति। श्येनम्। पतत्रिणम्। सिꣳहम्। सा। इमम्। पातु। अꣳहसः॥९॥
यत्। आपिपेषेत्याऽपिपेष। मातरम्। पुत्रः। प्रमुदित इति प्रऽमुदितः।

जयन्। एतम्। तत्। अग्ने। अनृणः। भवामि। अहतौ। पितरौ। मया॥१०॥
देवाः। यज्ञम्। अतन्वत। भेषजम्। भिषजा। अश्विना। वाचा। सरस्व
ती। भिषक्। इन्द्राय। इंद्रियाणि। दधतः॥११॥ दीक्षायै। रूपम्। शष्पाणि।
प्रायणीयस्य। प्रायणीयस्येति प्रऽअयनीयस्य। तोक्मानि॥ क्रयस्य।
रूपम्। सोमस्य। लाजाः। सोमाꣳशवः। सोमाꣳशव इति सोमऽअꣳशवः। मधु॥१२॥
आतिथ्यरूपम्। मासरम्। महावीरस्येति महाऽवीरस्य। नग्नहुः। रूपम्।
उपसदामित्युपऽसदाम्। एतत्। तिस्रः। रात्रीः। सुरा। आसुतेत्याऽसुत॥१३॥

मित्याति
थ्यऽरूपम्

सोमस्य।रूपम्।क्रीतस्य।परिस्रुदितिपरिऽस्रुत्।परि।सिच्यते।अश्वि
भ्यामित्यश्विऽभ्याम्।दुग्धम्।भेषजम्।इन्द्राय।ऐंद्रम्।सरस्वत्या॥१४॥
आसंदीत्याऽसुदी।रूपम्।राजासंद्याइतिराजऽआसंद्यै।वेद्यै।कुंभी।
सुराधानीतिसुराऽधानी।अन्तरः।उत्तरवेद्याइत्युतरऽवेद्याः।रूप
म्।कारोतरः।भिषक्॥१५॥वेद्या।वेदिः।सम्।आप्यते।बर्हिषा।बर्हिः।
इन्द्रियम्।यूपेन।यूपः।आप्यते।प्रणीतः।प्रनीतइतिप्रऽनीतः।अग्निः।
अग्निना॥१६॥हविर्द्धानमितिहविःऽधानम्।यत्।अश्विना।आग्नी

घर्मम्। यतम्। सरस्वती। इन्द्राय। ऐंद्रम्। सदः। हरतम्। पत्नीशालमिति प

त्नीऽशालम्। गार्हपत्य इति गार्हऽपत्यः॥१७॥ प्रैषेभिरिति प्रऽएषेभिः।

प्रैषानिति प्रऽएषान्। आप्नोति। आप्रीभिरित्याऽप्रीभिः। आप्रीरित्याऽ

प्रीः। यज्ञस्य। प्रयाजेभिरिति प्रऽयाजेभिः। अनुयाजानित्यनुऽया

जान्। वषट्कारेभिरिति वषट्ऽकारेभिः। आहुतीरित्याऽहुतीः॥१८॥

पशुभिरिति पशुऽभिः। पशून्। आप्नोति। पुरोळ्हाशैः। हविंषि। आ।

छंदोभिरिति छंदःऽभिः। सामिधेनीरिति सामऽइधेनीः। याज्याभिः।

वषङ्कारानितिवषट्ऽकारान्॥१९॥ धानाः। करंभः। सक्तवः। परीवा
पः। परिवापइतिपरिऽवापः। पयः। दधि। सोमस्य। रूपम्। हविषः।
आमिक्षा। वाजिनम्। मधु॥२०॥ धानानाम्। रूपम्। कुवलम्। परी
वापस्य। परिवापस्येतिपरिऽवापस्य। गोधूमाः। सक्तूनाम्। रूपम्।
बदरम्। उपवाकाइत्युपऽवाकाः। करंभस्य॥२१॥ पयसः। रूपम्। य
त्। यवाः। दध्नः। रूपम्। कर्कन्धूनि। सोमस्य। रूपम्। वाजिनम्। सौम्य
स्य। रूपम्। आमिक्षा॥२२॥ आ। श्रावय। इति। स्तोत्रियाः। प्रत्याश्राव

इतिप्रतिऽआश्रावः।अनुरूप इत्यनुरूपः।यजा।इति।याज्यारूप
मितियाज्याऽरूपम्।प्रगाथाइतिप्रऽगाथाः।येयजामहाइतियेऽय
जामहाः॥२३॥अर्द्धऋचैरित्यर्द्धऽऋचैः।उक्थानाम्।रूपम्।पदैः।
आप्नोति।निविदइतिनिऽविदः।प्रणवैः।प्रनवैरितिप्रऽनवैः।शा
स्त्राणाम्।रूपम्।आपयसा।सोमः।आप्यते॥२४॥अश्विभ्यामित्यश्विऽ
५स भ्याम्।प्रातःसवनमितिप्रातःऽवनम्।इन्द्रेण।ऐन्द्रम्।माध्यंन्दिनं
म्।वैश्वदेवमितिवैश्वऽदेवम्।सरस्वत्या।तृतीयं।आप्तम्।सवनं॥२५॥

वायव्यैः।वायव्यानि।आप्नोति।सतेन।द्रोणकलशमिति द्रोणऽकलशा
म्।कुंभीभ्याम्।अंभृणौ।सुते।स्थालीभिः।स्थालीः।आप्नोति॥२८॥यजु
र्भिरितियजुःऽभिः।आप्यंते।ग्रहाः।ग्रहैः।स्तोमाः।च।विष्टुतीः।विस्तु
तीरितिविऽस्तुतीः।छंदोभिरितिछंदःऽभिः।उक्थाशस्त्राणि।उक्थशा
स्त्राणीत्युक्थऽशस्त्राणि।साम्ना।अवभृथइत्यवऽभृथः।आप्यते॥२९
इळाभिः।भक्षान्।आप्नोति।सूक्तवाकेनेतिसूक्तऽवाकेन।आशिषइ
त्याऽशिषः।शंयुनेतिशम्ऽयुना।पत्नीसंयाजानितिपत्नीऽसंयाजा

न्।समिष्टयजुषेतिसमिष्टऽयजुषा।सꣳस्थामितिसमऽस्थाम्॥२८॥
व्रतेन।दीक्षाम्।आप्नोति।दीक्षया।आप्नोति।दक्षिणाम्।दक्षिणा।श्रद्धा
म्।आप्नोति।श्रद्धया।सत्यम्।आप्यते॥२९॥एतावत्।रूपम्।यज्ञस्य।य
त्।देवैः।ब्रह्मणा।कृतम्।तत्।एतत्।सर्वम्।आप्नोति।यज्ञे।सौत्राम
णी।सुते॥३०॥सुरावन्तमितिसुराऽवन्तम्।बर्हिषदम्।बर्हिसदमि
तिबर्हिऽसदम्।सुवीरमितिसुऽवीरम्।यज्ञम्।हिन्वंति।महिषाः।न
मोभिरितिनमःऽभिः।दधानाः।सोमम्।दिवि।देवतासु।मदेम।इन्द्रम्।

यजमानाः। स्वर्का इति सुऽअर्काः॥ ३१॥ यः। ते। रसः। संभृत इति सं ऽ
भृतः। ओषधीषु। सोमस्य। शुष्मः। सुरया। सुतस्य। तेन। जिन्व। यजमा
नम्। मदेन। सरस्वतीम्। अश्विनौ। इंद्रम्। अग्निम्॥ ३२॥ यम्। अश्वि
ना। नमुचेः। आसुरात्। अधि। सरस्वती। असुनोत्। इंद्रियाय। इमम्।
तम्। शुक्रम्। मधुमंतमिति मधुऽमन्तम्। इन्दुम्। सोमम्। राजानम्।
इह। भक्षयामि॥ ३३॥ यत्। अत्र। रिप्तम्। रसिनः। सुतस्य। यत्। इन्द्रः।
अपिबत्। शचीभिः। अहम्। तत्। अस्य। मनसा। शिवेन। सोमम्। राजा

४ पुनंतु। मा। पितरः। सोम्यासः।

नम्। इह। भक्षयामि॥ ३४॥ पितृभ्य इति पितृऽभ्यः। स्वधायिभ्य इति स्व
धायिऽभ्यः। स्वधा। नमः। पितामहेभ्यः। प्रपितामहेभ्य इति प्रऽपिताम
हेभ्यः। स्वधायिभ्य इति स्वधायिऽभ्यः। स्वधा। नमः॥ ३५॥ अक्षन्। पि
तरः। अमीमदंत। अतीतृपंत। पितरः। पितरः। शुंध्वम्॥ ३६॥ पुनंतु। धं ४
मा। पितामहाः। पुनंतु। प्रपितामहा इति प्रऽपितामहाः। पवित्रेण। शता
युषेति शतऽआयुषा॥ ३७॥ पुनंतु। मा। पितामहाः। पुनन्तु। प्रपितामहा इ
ति प्रऽपितामहाः। पवित्रेण। शतायुषेति शतऽआयुषा। विश्वम्। आयुः।

वि। अग्नयै॥३९॥ पुनंतु। मा। देवजना इति देवऽजनाः। पुनंतु। मनसा। धि-
यः। पुनन्तु। विश्वा। भूतानि। जातवेद इति जातऽवेदः। पुनीहि। मा॥४०॥
पवित्रेण। पुनीहि। मा। शुक्रेण। देव। दीद्यत्। अग्ने। क्रत्वा। क्रतून्। अनु॥ ॥४१॥
यत्। ते। पवित्रम्। अर्चिषि। अग्ने। विततमिति विऽततम्। अन्तरा। ब्र
ह्म। तेन। पुनातु। मा॥४२॥ पवमानः। सः। अद्य। नः। पवित्रेण। विचर्षणि
रिति विऽचर्षणिः। यः। पोता। सः। पुनातु। मा॥४३॥ उभाभ्याम्। देव। सवि
तरिति सवितः। पवित्रेण। सवेन। च। माम्। पुनीहि। विश्वतः॥४४॥ वै

श्व देवीति विश्व ऽ देवी। पुनती। देवी। आ। अ गात्। यस्याम्। इ माः। बह्व्यः।
तंवः। वीतपृष्ठा इति वीत ऽ पृष्ठाः। तया। मदंतः। सधमादेष्विति सधु ऽ मा
देषु। वयम्। स्याम। पतयः। रयीणाम्॥ ४५॥ ये। समानाः। समनस इति स ऽ
मनसः। पितरः। यमराज्य इति यम ऽ राज्येतिषाम्। लोकः। स्वधा। नमः। य
ज्ञः। देवेषु। कल्पताम्॥ ४६॥ जीवाः। जीवेषु। मामकाः। तेषाम्। श्रीः। म
यि। कल्पताम्। अस्मिन्। लोके। शतम्। समाः॥ ४७॥ द्वे इति द्वे। सृती इति
सृती। अशृणवम्। पितॄणाम्। अहम्। देवानाम्। उत। मर्त्यानाम्। ताभ्या

म्। इदम्। विश्वम्। एजत्। सम्। एति। यत्। अंतरा। पितरम्। मातरम्।
च। ४८। इदम्। हविः। प्रजननमिति प्रऽजननम्। मे। अस्तु। दशवीरमिति द
शऽवीरम्। सर्वगणमिति सर्वऽगणम्। स्वस्तये। आत्मसनीत्यात्मऽसनि।
प्रजासनीति प्रजाऽसनि। पशुसनीति पशुऽसनि। लोकसनीति लोकऽ
सनि। अभयसनीत्यभयऽसनि। अग्निः। प्रजामिति प्रऽजाम्। बहुलाम्।
मे। करोतु। अन्नम्। पयः। रेतः। अस्मासु। धत्त॥ ४९॥ उत्। ईरताम्। अ
वरे। उत्। परासः। उत्। मध्यमाः। पितरः। सोम्यासः। असुम्। ये। ईयुः।

अवृकाः । ऋतज्ञा इत्यृतऽज्ञाः । ते । नः । अवन्तु । पितरः । हवेषु ॥ ५० ॥ त्वम् ।
सोम । प्र । चिकितः । मनीषा । त्वम् । रजिष्ठम् । अनु । नेषि । पंथाम् । तव । प्रणी
ती । प्रनीतीति प्रऽनीती । पितरः । नः । इन्दो इतीन्दो । देवेषु । रत्नम् । अभज
न्त । धीराः ॥ ५१ ॥ त्वया । हि । नः । पितरः । सोम । पूर्वे । कर्माणि । चक्रुः । पव
मान । धीराः । वन्वन् । अवातः । परिधीनिति परिऽधीन् । अप । ऊर्णु । वी
रेभिः । अश्वैः । मघवेति मघऽवा । भव । नः ॥ ५२ ॥ त्वम् । सोम । पितृभिरि
ति पितृऽभिः । संविदान इति सम्ऽविदानः । अनु । द्यावापृथिवी इति द्या

वापृथिवी । आ । ततंथ । तस्मै । ते । इन्दो इतीन्दो । हविषा । विधेम । वयम् ।
स्याम । पतयः । रयीणाम् ॥५३॥ बर्हिषदः । बर्हिसद इति बर्हिऽसदः । पित
रः । ऊती । अर्वाक् । इमा । वः । हव्या । चकृम । जुषध्वम् । ते । आ । गत । अवसा ।
शन्तमेनेति शम्ऽतमेन । अथ । नः । शम् । योः । अरपः । दधात ॥५४॥ उप
हूता इत्युपऽहूताः । पितरः । सोम्यासः । बर्हिँषु । निधिष्विति निऽधिषु । प्रि षे५
येषु । ते । आ । गमन्तु । ते । इह । श्रुवंतु । अधि । ब्रुवन्तु । ते । अवंतु । अस्मान् ॥५५॥
आ । अहम् । पितॄन् । सुविदत्रानिति सुऽविदत्रान् । अवित्सि नपातम् ।

च्चा। विक्रमणमिति विऽक्रमणम्। चा। विष्णोः। बर्हिषदः। बर्हिसद इति
बर्हिऽसदः। ये। स्वधया। सुतस्य। भजन्त। पित्वः। ते। इह। आगमिष्ठा इत्याऽ
गमिष्ठाः॥ ५६॥ अग्निषाताः। अग्निस्वात्ता इत्यग्निऽस्वात्ताः। पितरः। आ।
इह। गच्छत। सदः सद इति सदःऽसदः। सदत। सुप्रणीतयः। सुप्रनीतय
इति सुऽप्रनीतयः। अत्त। हवींषि। प्रयतानीति प्रऽयतानि। बर्हिषि। अ
था। रयिम्। सर्ववीरमिति सर्वऽवीरम्। दधातन॥ ५७॥ आ। यंतु। नः। पि
तरः। सोम्यासः। अग्निष्वात्ताः। अग्निस्वात्ता इत्यग्निऽस्वात्ताः। पथिभिरि

ति पथिऽभिः । देवयानैरिति देवऽयानैः । अस्मिन् । यज्ञे । स्वधया । मद
न्तः । अधि । ब्रुवंतु । ते । अवंतु । अस्मान् ॥ ५८ ॥ ये । अग्निष्वात्ताः ।
ः । अग्निस्वात्ता इत्यग्निऽस्वात्ताः । ये । अनग्निष्वात्ताः । अनग्निस्वात्ता
इत्यनग्निऽस्वात्ताः । मध्ये । दिवः । स्वधया । मादयंते । तेभ्यः । स्वराडिति स्वऽ
राट् । असुनीतिमित्यसुऽनीतिम् । एताम् । यथावशमिति यथाऽवशम् ।
तन्वम् । कल्पयाति ॥ ५९ ॥ अग्निष्वात्तान् । अग्निस्वात्तानित्यग्निऽस्वात्ता
न् । ऋतुमत इत्यृतुऽमतः । हवामहे । नाराशꣳसे । सोमपीथमिति सोमऽ

पीथम्।ये।आसुः।ते।नः।विप्रासः।सुहवाइतिसुऽहवाः।भवंतु।वय
म्।स्याम।पतयः।रयीणाम्॥६०॥आच्येत्याऽअच्य।जानु।दक्षिणतः।नि
षद्य।निसद्येतिनिऽसद्य।इमम्।यज्ञम्।अभि।गृणीत।विश्वे।मा।हि
ंसिष्ट।पितरः।केन।चित्।नः।यत्।वः।आगः।पुरुषता।कराम॥६१॥
आसीनासः।अरुणीनाम्।उपस्थइत्युपऽस्थे।रयिम्।धत्त।दाशुषे।मर्त्या
य।पुत्रेभ्यः।पितरः।तस्य।वस्वः।प्र।यच्छत।ते।इह।ऊर्जं॥६२॥यं।अग्ने। दध्यात ६
कव्यवाहनेतिकव्यऽवाहन।त्वम्।चित्।मन्यसे।रयिम्।तम्।नः।गीर्भि

६ स्वधया। ते। अक्षन्। अद्धि। त्वम्। देव। प्रयुतेतिप्रऽयंत। हविंषि। ईदम्।

पितृभ्यइतिपितृऽभ्यः।

रितिगीःऽभिः। श्रवाय्यम्। देवत्रेतिदेवऽत्रा। पनया। युजम्।।६३।। यः।
अग्निः। कव्यवाहनइतिकव्यऽवाहनः। पितॄन्। यक्षत्। ऋतावृधः। ऋ
तवृधइत्यृतऽवृधः।। प्र। इत्। ऊँ इति ऊँ। हव्यानि। वोचति। देवेभ्यः। च। पि
तृभ्यइतिपितृऽभ्यः। आ।।६४।। त्वम्। अग्ने। ईळितः। जातवेदइतिजा
तऽवेदः। अवाट्। हव्यानि। सुरभीणि। कृत्वि।। प्र। अदाः। पितृभ्यइति
पितृभ्यः। ^नमः। अस्तु। अद्य। ये। पूर्वासः। ये। उपरासः। ईयुः। ये। पार्थि
वे। रजसि। आ। निषत्ताः। निसत्ताइतिनिऽसत्ताः। ये। वा। नूनम्। सु

१३४

स्वजनास्वितिसुऽस्वजनासु। विद्धु। इह। ये। च। इह। पितरः। ये। च। न।
इह। यान्। च। विद्म। यान्। उँ इतिँ। च। न। प्रविद्मेतिप्रऽविद्म। त्व
म्। वेत्थ। यति। ते। जातवेद इति जातऽवेदः। स्वधाभिः। यज्ञम्। सुकृत
मिति सुऽकृतम्। जुषस्व॥६७॥ अध। यथा। नः। पितरः। परासः। प्रत्नासः।
अग्ने। ऋतम्। आशुषाणाः। शुचि। इत्। अयन्। दीध्यतम्। उक्थशा
सः। उक्थशासइत्युक्थऽशासः। क्षाम। भिन्दन्तः। अरुणीः। अप। व्रन्॥६८॥
उशन्तः। त्वा। नि। धीमहि। उशन्तः। सम्। इधीमहि। उशन्। उशतः। आ। व

ह। पितॄन्। हविषे। अत्तवे॥ ६९॥ अपाम्। फेनेन। नमुचेः। शिरः। इन्द्र।
उत्। अवर्त्तयः॥ विश्वाः। यत्। अजयः। स्पृधः॥ ७०॥ सोमः। राजा। अमृ
तम्। सुतः। ऋजीषेण। अजहात्। मृत्युम्। ऋतेन। सत्यम्। इंद्रियम्। वि
पानमितिविऽपानम्। शुक्रम्। अंधसः। इन्द्रस्य। इंद्रियम्। इदम्। पयः। अ
मृतम्। मधु॥ ७१॥ अद्भ्यइत्यत्ऽभ्यः। क्षीरम्। वि। अपिबत्। क्रुङ्। आङ्गि
रसः। धिया। सोमम्। अद्भ्यइत्यत्ऽभ्यः। वि। अपिबत्। छन्दसा। हंसः।
शुचिषत्। शुचिसदितिशुचिऽसत्। अंनात्। परिस्रुत इतिपरिऽस्रुतः।

रसम्। ब्रह्मणा। वि। अपिबत्। क्षत्रम्। पयः। सोमम्। प्रजापतिरितिप्र
जाऽपतिः॥७२॥ रेतः। मूत्रम्। वि। जहाति। योनिम्। प्रविशदितिप्रऽविश
त्। इन्द्रियम्। गर्भः। जरायुणा। आवृतइत्याऽवृतः। उल्बम्। जहाति। ज
न्मना॥७२॥ दृष्ट्वा। रूपेइतिरूपे। वि। आ। अकरोत्। सत्यानृतेइतिस
त्यानृते। प्रजापतिरितिप्रजाऽपतिः। अश्रद्धाम्। अनृते। अदधात्। श्रद्धा
म्। सत्ये। प्रजापतिरितिप्रजाऽपतिः॥७३॥ वेदेन। रूपेइतिरूपे। वि। अ
पिबत्। सुतासुतौ। प्रजापतिरितिप्रजाऽपतिः॥७४॥ दृष्ट्वा। परिस्रुत

य ३

इतिपरिऽस्रुतः। रसम्। शुक्रेण। शुक्रम्। वि। अपिबत्। पयः। सोमम्। प्र
जाऽपतिरितिप्रजाऽपतिः॥७५॥ सीसेन। तंत्रम्। मनसा। मनीषिणः। ऊर्णा
सूत्रेणेत्यूर्णासूत्रेण। कवयः। वयंति। अश्विना। यज्ञम्। सविता। सरस्वती।
इन्द्रस्य। रूपम्। वरुणः। भिषज्यन्॥७६॥ तत्। अस्य। रूपम्। अमृतम्।
शचीभिः। तिस्रः। दधुः। देवताः। सꣳरराणाइतिसम्ऽरराणाः। लोमानि।
शष्पैः। बहुधा। न। तोक्मभिरितितोक्मऽभिः। त्वक्। अस्य। माꣳसम्।
अभवत्। न। लाजाः॥७७॥ तत्। अश्विना। भिषजा। रुद्रवर्त्तनीइतिरु

द्रऽवर्त्तनी। सरस्वती। वयति। पेशः। अंतरम्। अस्थि। मज्जानम्। मास
रैः। कारोतरेण। दधतः। गवाम्। त्वचि॥ ७८॥ सरस्वती। मनसा। पेशल
म्। वसु। नासत्याभ्याम्। वयति। दर्शतम्। वपुः। रसम्। परिस्रुतेति प
रिऽस्रुता। न। रोहितम्। नग्नहुः। धीरः। तसरम्। न। वेम॥ ७१॥ पयसा।
शुक्रम्। अमृतम्। जनित्रम्। सुरया। मूत्रात्। जनयन्त। रेतः। अप। अम
१ मिति तिम्। दुर्म्मतिँ दुःऽमतिम्। बाधमानाः। ऊवध्यम्। वातम्॥ तत्। आरात्॥ ८०॥
इन्द्रः। सुत्रामेति सुऽत्रामा। हृदयेन। सत्यम्। पुरोडाशेन। सविता। जजा
१ सब्वम्

॥१५॥

नायद्दरता।क्लोमानम्।वरुणः।भिषज्यन्।मतस्ने इति मतस्ने।वायव्यैः।
न।मिनाति।पित्तम्॥ ८१॥ आंत्राणि।स्थालीः।मधु।पिन्वमानाः।गुदाः।
पात्राणि।सुदुघेति सुऽदुघा।न।धेनुः।श्येनस्य।पत्रम्।न।प्लीहा।शची
भिः।आसंदीत्याऽसन्दी।नाभिः।उदरम्।न।माता॥ ८२॥ कुंभः।वनिष्ठुः।
जनिता।शचीभिः।यस्मिन्।अग्रे।योन्याम्।गर्भः।अंतरित्यन्तः।प्ला
शिः।व्यक्त इति विऽअक्तः।शतधार इति शतऽधारः।उत्सः।दुहे।न।कुं
भी।स्वधाम्।पितृभ्य इति पितृऽभ्यः॥ ८३॥ मुखम्।सत्।अस्य।शिरः।इ

॥१५॥

त्वा । सतेन । जिह्वा । पवित्रम् । अश्विना । आसन् । सरस्वती । चप्यम् । न । पा
युः । भिषक् । अस्य । बालः । वस्तिः । न । शेपः । हरसा । तरस्वी ॥ ८७ ॥ अश्वि
भ्यामित्यश्विभ्याम् । चक्षुः । अमृतम् । ग्रहाभ्याम् । छागेन । तेजः । हविषा ।
शृतेन । पक्ष्माणि । गोधूमैः । कुवलैः । उतानि । पेशः । न । शुक्रम् । असितम् ।
वसाते इति वसाते ॥ ८८ ॥ अविः । न । मेषः । नसि । वीर्य्याय । प्राणस्य । पं
थाः । अमृतः । ग्रहाभ्याम् । सरस्वती । उपवाकैरित्युपऽवाकैः । व्यानमि
ति विऽआनम् । नस्यानि । बर्हिः । बदरैः । जजान ॥ ८९ ॥ इन्द्रस्य । रूपम् ।

ऋषभः।बलाय।कर्णाभ्याम्।श्रोत्रम्।अमृतम्।ग्रहाभ्याम्।यवाः।न।बर्हिः।भ्रुवि।केसराणि।कर्कन्धु।जज्ञे।मधु।सारघम्।मुखात्॥८७॥आत्मन्।उपस्थ इत्युपऽस्थे।न।वृकस्य।लोम।मुखे।श्मश्रूणि।न।व्याघ्रलोमेति व्याघ्रऽलोम।केशाः।न।शीर्षन्।यशसे।श्रियै।शिखा।सिꣳहस्य।लोम।त्विषिः।इन्द्रियाणि॥८८॥अङ्गानि।आत्मन्।भिषजा।तत्।अश्विना।आत्मानम्।अङ्गैः।समम्।अधात्।सरस्वती॥इन्द्रस्य।रूपम्।शतमानमिति शतऽमानम्।आयुः।ज्योतिः।अमृतम्।दधानाः॥८९॥सरस्वती।योन्याम्।

७ चन्द्रेण

गर्भम्।अंतः।अश्विभ्यामित्यश्विऽभ्याम्।पत्नी।सुकृतमितिसुऽकृत
म्।बिभर्त्ति।अपाम्।रसेन।वरूणः।न।साम्ना।इन्द्रम्।श्रियै।जनयन्।
अप्स्वित्यप्ऽसु।राजा॥९०॥ तेजः।पशूनाम्।हविः।इन्द्रियावत्।इन्द्रि
यवदितीन्द्रियऽवत्।परिस्रुतेतिपरिऽस्रुता।पयसा।सारघम्।मधु।
अश्विभ्यामित्यश्विऽभ्याम्।दुग्धम्।भिषजा।सरस्वत्या।सुतासुताभ्या
म्।अमृतः।सोमः।इन्दुः॥९१॥ क्षत्रस्य।नाभिः।असि।क्षत्रस्य।योनिः।
असि।मा।त्वा।हिंसीत्।मा।मा।हिंसीः।मृत्योः।पाहि।विद्योदितिविऽ

घोत्। पाहि॥ २२॥ अश्विनोः। भैषज्येन। तेजसे। ब्रह्मवर्च्चसायेति ब्रह्मऽवर्च्चसाय। अग्निं। सिंचामि। सरस्वत्यै। भैषज्येन। वीर्याय। अन्नाद्यायेत्यन्नऽअद्याय। इन्द्रस्य। इन्द्रियेण। बलाय। श्रियै। यशसे। अग्निं। सिंचामि॥ २३॥ कः। असि। कतमः। कस्मै। काय। त्वा। सुश्लोकेति सुऽश्लोक। सुमङ्गलेति सुऽमङ्गल। सत्यराजन्निति सत्यऽराजन्॥ २४॥ शिरः। मे। श्रीः। यशः। मुखम्। त्विषिः। केशाः। च। श्मश्रूणि। राजा। मे। प्राणः। अमृतम्। सम्राडिति सम्ऽराट्। चक्षुः। विराडिति विऽराट्। श्रोत्रम्॥ २५॥ जिह्वा।

मे।भद्रम्।वाक्।महः।मनः।मन्युः।स्वराडिति स्वःऽराट्।भामः।मोदाः।
प्रमोदा इति प्रऽमोदाः।अंगुलीः।अङ्गानि।मित्रम्।मे।सहः॥१६॥बाहू इ
ति बाहू।मे।बलम्।इंद्रियम्।हस्तौ।मे।कर्म।वीर्यम्।आत्मा।क्षत्रम्।उरः।
मम॥१७॥पृष्ठीः।मे।राष्ट्रम्।उदरम्।अꣳसौ।ग्रीवाः।च।श्रोणी इति श्रोणी।
ऊरू इत्यूरू।अरत्नी इत्यरत्नी।जानुनी इति जानुनी।विशः।मे।अंगानि।स
र्वतः॥१८॥नाभिः।मे।चित्तम्।विज्ञानमिति विऽज्ञानम्।पायुः।मे।अप
चितिरित्यपऽचितिः।भसत्।आनंदनंदौ।आंडौ।मे।भगः।सौभाग्यम्।

पसः ॥ ९९ ॥ जंघाभ्याम् । पद्भ्यामिति पत्ऽभ्याम् । धर्मः । अस्मि । विशि । रा
जा । प्रतिष्ठितः । प्रतिस्थित इति प्रतिऽस्थितः । प्रति । क्षत्रे । प्रति । तिष्ठामि
राष्ट्रे । अश्वेषु । गोषु ॥ १० ॥ अंगेषु । आत्मन् । प्राणेषु । पुष्टे । द्यावापृथि
व्योः । यज्ञे ॥ १ ॥ त्रयाः । देवाः । एकादश । त्रयस्त्रिꣳशा इति त्रयःऽत्रिꣳ
शाः । सुराधस इति सुऽराधसः । बृहस्पतिपुरोहिता इति बृहस्पतिऽ
पुरोहिताः । देवस्य । सवितुः । सवे ॥ देवाः । देवैः । अवंतु । मा ॥ २ ॥ प्रथमाः ।
द्वितीयैः । द्वितीयाः । तृतीयैः । तृतीयाः । सत्येन । सत्यम् । यज्ञेन । यज्ञः ।

यजुर्भिरितियजुःऽभिः।यजूꣳषि।सामभिरितिसामऽभिः।।३।।सामा
नि।ऋग्भिरित्यृक्ऽभिः।ऋचः।पुरोनुवाक्याभिरितिपुरःऽअनुवा
क्याभिः।पुरोनुवाक्याइतिपुरःऽअनुवाक्याः।याज्याभिः।याज्याः।वष
ट्कारैरितिवषट्ऽकारैः।वषट्काराइतिवषट्ऽकाराः।आहुतिभिरित्याहु
तिऽभिः।आहुतयइत्याऽहुतयः।मे।कामान्।सम्।अर्द्धयंतु।भूः।स्वाहा।।७।।
लोमानि।प्रयतिरितिप्रऽयतिः।मम।त्वक्।मे।आनतिरित्याऽनतिः।मा
ꣳसम्।मे।उपनतिरित्युपऽनतिः।वसु।अस्थि।मज्जा।मे।आनतिरित्याऽ

आनतिरित्याऽनतिः।२

नतिः॥१०५॥ इतिशुक्लयजुर्वेदकाण्वसंहितापदपाठेद्वाविंशतिमोध्या
यः॥५९॥ हरिः॥ ॐ॥ यत्। देवाः। देवहेळनम् इति देवऽहेळनम्। देवासः।
चकृम। वयम्। अग्निः। मा। तस्मात्। एनसः। विश्वात्। मुंचतु। अंहसः॥१॥
यदि। दिवा। यदि। नक्तम्। एनांसि। चकृम। वयम्। वायुः। मा। तस्मा
त्। एनसः। विश्वात्। मुंचतु। अंहसः॥२॥ यदि। जाग्रत्। यदि। स्वप्ने।
एनांसि। चकृम। वयम्। सूर्यः। मा। तस्मात्। एनसः। विश्वात्। मुंच
तु। अंहसः॥३॥ शूद्रे। अर्ये। एकस्य। अधि। धर्मणि। तस्य। अवय

जनमित्यवऽयजनम् । असि । यत् । आपः । एनः । अयद्धि[illegible] द्रुपदादि
वेति द्रुपदात्ऽइव । मुमुचानः । स्विन्नः । स्नातः । मलादिवेति मलात्ऽइव ।
पूतम् । पवित्रेणेवेति पवित्रेणऽइव । आज्यम् । आपः । शुंधंतु । मा । एनसः ॥५॥
उत् । वयम् । तमसः । परि । स्वरिति स्वः । पश्यंतः । उत्तरमित्युत्ऽतरम् । देव 22
म् । देवत्रेति देवऽत्रा । सूर्यम् । अगन्म । ज्योतिः । उत्तममित्युत्ऽतमम् ॥६॥
अपः । अद्य । अनु । अचारिषम् । रसेन । सम् । असृक्ष्महि । पयस्वान् ।
अग्ने । आ । अगमम् । तम् । मा । सम् । सृज । वर्चसा । प्रजयेति प्रऽजया ।

च।धनेन।च।एधः।असि।एधिषीमहि।समिदितिसम्ऽइत्।असि।तेजः।असि।तेजः।मयि।धेहि॥७॥समाववर्त्तीतिसम्ऽआववर्त्ति।पृथिवी।सं।उषाः।सम्।उँइत्यूँ।सूर्यः।सम्।उँइत्यूँ।विश्वं।इदम्।जगत्।वैश्वानरज्योतिरितिवैश्वानरऽज्योतिः।भूयासम्।विभूनितिविऽभून्।कामान्।वि।अश्नवै।भूः।स्वाहा॥८॥अग्निम्।आ।दधामि।समिधमितिसम्ऽइधम्।अग्ने।व्रतपतइतिव्रतऽपते।त्वयि।व्रतम्।च।श्रद्धाम्।च।उप।एमि।इन्धे।त्वा।दीक्षितः।अहम्॥९॥यत्र।ब्रह्म।च।क्षत्रम्।च।सम्यं

१५

चौॅरतः। सह। तम्। लोकम्। पुण्यम्। प्र। ज्ञेषम्। यत्र। देवाः। सह। अग्निना॥ १०॥
यत्र। इंद्रः। च। वायुः। च। सम्यंचौ। चरतः। सह। तम्। लोकम्। पुण्यम्। प्र। ज्ञे
षम्। यत्र। सेदिः। न। विद्यते॥ ११॥ अंशुना। ते। अंशुः। पृच्यताम्। परुषा।
परुः। गंधः। ते। सोमम्। अवतु। मदाय। रसः। अच्युतः॥ १२॥ सिंचंति। प
रि। सिंचंति। उत्। सिंचन्ति। पुनंति। च। सुरायै। बभ्र्वै। मदे। किंत्वः। वद
ति। किंत्वः॥ १३॥ धानावंतमिति धानाऽवंतम्। करम्भिणं। अपूपवंतमि
त्यपूपऽवंतम्। उक्थिनम्। इंद्र। प्रातः। जुषस्व। नः॥ १४॥ बृहत्। इंद्राय।

गायत। मरुत्वतः। वृत्रहंतममितिवृत्रहम्ऽतमम्। येन। ज्योतिः। अजनयन्।
ऋतावृधः। ऋतवृध इत्यृतऽवृधः। देवम्। देवाय। जागृवि॥१५॥ अध्व
र्यो इत्यध्वर्यो। अद्रिभिरित्यद्रिऽभिः। सुतम्। सोमम्। पवित्रे। आ। नय। पु
नीहि। इंद्राय। पातवे॥१६॥ यः। भूतानाम्। अधिपतिरित्यधिऽपतिः। य
स्मिन्। लोकाः। अधि। श्रिताः। यः। ईशे। महतः। महान्। तेन। गृह्णामि।
त्वाम्। अहम्। मयि। गृह्णामि। त्वाम्। अहम्॥१७॥ प्राणपा इति प्राणऽपाः।
मे। अपानपा इत्यपानऽपाः। चक्षुष्पाः। चक्षुःपा इति चक्षुःऽपाः। श्रो

त्रपा इति श्रोत्र ऽ पाः। च्चा। मे। वाचः। मे। विश्वभेषज इति विश्व ऽ भेषजः।
मनसः। असि। विलायक इति वि ऽ लायकः॥ १८॥ अश्विनकृतस्येत्यश्वि
न ऽ कृतस्य। ते। सरस्वतिकृतस्येति सरस्वति ऽ कृतस्य। इंद्रेण। सुत्राम्णे
२५ ति सु ऽ त्राम्णा। कृतस्य। उपहूत इत्युप ऽ हूतः। उपहूतस्येत्युप ऽ हूतस्य। भक्ष उ २
यामि॥ १९॥ समिद्ध इति सम् ऽ इद्धः। इंद्रः। उषसाम्। अनीके। पुरोरुचेति पु
रः ऽ रुचा। पूर्वकृदिति पूर्व ऽ कृत्। वावृधानः। ववृधान इति ववृधानः। त्रि
भिरिति त्रि ऽ भिः। देवैः। त्रिंशता। वज्रबाहुरिति वज्र ऽ बाहुः। जघान।

वृत्रमा।विदुरः।बवार॥२०॥नराशंसः।प्रति।शूरः।मिमानः।तनूनपा
दितितनूनपात्।प्रति।यज्ञस्य।धाम।गोभिः।वपावानितिवपाऽवान्।मधु
ना।समंजन्नितिसम्ऽअंजन्।हिरण्यैः।चंद्री।यजति।प्रचेताइतिप्रऽ
चेताः॥२१॥ईळितः।देवैः।हरिवानितिहरिऽवान्।अभिष्टिः।आजुह्वान
इत्याऽजुह्वानः।हविषा।शर्द्धमानः।पुरंदरइतिपुरंऽदरः।गोत्रभिदितिगोत्रऽ
भित्।वज्रबाहुरितिवज्रऽबाहुः।आ।यातु।यज्ञम्।उप।नः।जुषाणः॥२२॥
जुषाणः।बर्हिः।हरिवानितिहरिऽवान्।नः।इंद्रः।प्राचीनं।सीदत।प्रदि

शीतिश्रुऽदिशा। पृथिव्याः। उरुप्रथाइत्युरुऽप्रथाः। प्रथमानम्। स्योनम्।
आदित्यैः। अक्तम्। वसुभिरितिवसुऽभिः। सजोषाइतिसऽजोषाः॥२३॥ इं
द्रम्। दुरः। कवष्यः। धावमानाः। वृषाणम्। यंतु। जनयः। सुपत्नीरितिसुऽ
पत्नीः। द्वारः। देवीः। अभितः। वि। श्रयंताम्। सुवीराइतिसुऽवीराः। वी
रम्। प्रथमानाः। महोभिरितिमहःऽभिः॥२४॥ उषासानक्ता। उषसा
नक्तेत्युषसानक्ता। बृहतीइतिबृहती। बृहंतम्। पयस्वतीइतिपय
स्वती। सुदुघेइतिसुऽदुघे। शूरम्। इंद्रम्। तंतुम्। ततम्। पेशसा। सं

वयंतीइतिसम्ऽवयंती। देवानाम्। देवम्। यजतः। सुरुक्मेइतिसुऽ
रुक्मे॥२५॥ देव्या। मिमाना। मनुषः। पुरुत्रेतिपुरुऽत्रा। होतारौ। इंद्रम्।
प्रथमा। सुवाचेतिसुऽवाचा। मूर्द्धन्। यज्ञस्य। मधुना। दधाना। प्रा
चीनम्। ज्योतिः। हविषा। वृधातः॥२६॥ तिस्रः। देवीः। हविषा। वर्द्ध
मानाः। इंद्रम्। जुषाणाः। जनयः। न। पत्नीः। अच्छिन्नम्। तंतुम्। पयसा।
सरस्वती। इळा। देवी। भारती। विश्वतूर्त्तिरितिविश्वऽतूर्तिः॥२७
त्वष्टा। दधत्। सुष्मम्। इंद्राय। वृष्णे। अपाकः। अचिष्टुः। यशसे। पुरूणि।

वृषा।यजन्।वृषणम्।भूरिरेता इति भूरिऽरेताः।मूर्द्धन्।सम्।अन
तु।देवान्॥२८॥वनस्पतिः।अवसृष्ट इत्यवऽसृष्टः।न।पाशैः।त्मन्या।समंज
न्निति सम्ऽअंजन्।शमिता।न।देवः।इंद्रस्य।हव्यैः।जठरम्।पृणानः।स्व
धाति।यज्ञम्।मधुना।घृतेन॥२९॥स्तोकानाम्।इंदुम्।प्रति।शूरः।इं
द्रः।वृषायमाणः।वृषयमान इति वृषऽयमानः।वृषभः।तुराषाट्।घृत
प्रुषेति घृतऽप्रुषा।मनसा।मोदमानाः।स्वाहा।देवाः।अमृताः।मादयं
ताम्॥३०॥आ।यातु।इंद्रः।अवसे।उप।नः।इह।स्तुतः।सधमादिति स

२१

युऽमान्। अस्त। शूरः। वावृधानः। ववृधानइति वृधानः। तविषीः। यस्य।
पूर्वीः। द्यौः। न। क्षत्रम्। अभिभूतीत्यभिऽभूति। पुष्यात्॥ २१॥ आ। नः। इंद्रः।
दूरात्। आ। नः। आसात्। अभिष्टिकृदित्यभिष्टिऽकृत्। अवसे। यासत्। उग्रः।
ओजिष्ठेभिः। नृपतिरितिनृऽपतिः। वज्रबाहुरितिवज्रऽबाहुः। संगइति
सम्ऽगे। समत्स्वितिसमत्ऽसु। तुर्वणिः। पृतन्यून्॥ २२॥ आ। नः। इंद्रः। हरि
भिरितिहरिऽभिः। यातु। अच्छ। अर्वाचीनः। अवसे। राधसे। च। तिष्ठाति।
वज्री। मघवेतिमघऽवा। विरप्शीतिविऽरप्शी। इमम्। यज्ञम्। अनु। नः।

वाजसाताविति वाजऽसातौ ॥ ३३ ॥ त्रातारम् । इंद्रम् । अवितारम् । हवेहव
इतिहवेऽहवे । सुहवमितिसुऽहवम् । शूरम् । इंद्रम् । ह्वयामि । शक्रम् । पुरु
हूतमितिपुरुऽहूतम् । इंद्रम् । स्वस्ति । नः । मघवेतिमघऽवा । धातु । इंद्रः ॥ ३४ ॥
इंद्रः । सुत्रामेतिसुऽत्रामा । स्ववानितिस्वऽवान् । अवोभिरित्यवःऽभिः । सुमृ
ळीक इतिसुऽमृळीकः । भवतु । विश्ववेदा इतिविश्वऽवेदाः । बाधतां । द्वे
षः । अभयम् । कृणोतु । सुवीर्य्यस्येतिसुऽवीर्य्यस्य । पतयः । स्याम ॥ ३५ ॥ त
स्य । वयम् । सुमताविति सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ।

सः।सुऽत्रामेति सुऽत्रामा।स्ववानिति स्वऽवान्।इंद्रः।अस्मेइत्य स्मे।आ
रात्।चित्।द्वेषः।सनुतः।युयोतु॥३६॥आ।मंद्रैः।इंद्र।हरिभिरिति ह
रिऽभिः।याहि।मयूररोमभिरिति मयूररोमऽभिः।मा।त्वा।केचित्।
नि।यमन्।विम्।न।पाशिनः।अति।धन्वेवेति धन्वेऽइव।तान्।इहि॥३७॥
एव।इत्।इंद्रम्।वृषणम्।वज्रबाहुमिति वज्रऽबाहुम्।वसिष्ठासः।अ
भि।अर्चंति।अर्कैः।सः।नः।स्तुतः।वीरवदिति वीरऽवत्।पातु।गोमदि
ति गोऽमत्।यूयम्।पात।स्वस्तिभिरिति स्वस्तिऽभिः।सदा।नः॥३८॥समि

द्धऽइति सम्ऽइद्धः। अग्निः। अश्विना। तप्तः। घर्म्मः। विराडिति विऽराट्।
सुतः। दुहे। धेनुः। सरस्वती। सोमम्। शुक्रम्। इह। इंद्रियम्॥ ४९॥ तनूपे
ति तनूऽपा। भिषजा। सुते। अश्विना। उभा। सरस्वती। मध्वा। रजांसि।
इंद्रियम्। इंद्राय। पथिभिरिति पथिऽभिः। वहान्॥ ५०॥ इंद्राय। इंदुम्।
५ नग्नहुम सरस्वती। नराशंसेन। अधाताम्। अश्विना। मधु। भेषजम्। भिषजा।
सुते॥ ५१॥ आजुह्वानेत्याऽजुह्वाना। सरस्वती। इंद्राय। इंद्रियाणि। वीर्यम्।
इळाभिः। अश्विनौ। इषम्। सम्। ऊर्ज्जम्। सम्। रयिम्। दधुः॥ ५२॥ अश्वि

ना। नमुचेः। सुतम्। सोमम्। शुक्रम्। परिस्रुतेति परिऽस्रुता। सरस्वती।
तम्। आ। अभरत्। बर्हिषा। इंद्राय। पातवे॥५९॥ कवष्यः। न। व्यचस्व
तीः। अश्विभ्यामित्यश्विऽभ्याम्। न। दुरः। दिशः। इंद्रः। न। रोदसीइतिरो
दसी। दुघेइदुघे। दुहे। कामान्। सरस्वती॥६०॥ उषासानक्तम्। उष
सानक्तमित्युषसानक्तम्। अश्विना। दिवा। इंद्रम्। सायम्। इंद्रियैः। सं
जानानेइतिसम्ऽजानाने। सुपेशसेति सुऽपेशसा। सम्। अंजातेइत्यं
जाते। सरस्वत्या॥६१॥ पातम्। नः। अश्विना। दिवा। पाहि। नक्तम्।

सरस्वति । दैव्या । होतारा । भिषजा । पातम् । इंद्रम् । सचा । सुते ॥ ६६ ॥
तिस्रः । त्रेधा । सरस्वती । अश्विना । भारती । इडा । तीव्रम् । परिस्रुतेति
परिस्रुता । सोमम् । इंद्राय । सुषुवुः । सुसुवुरिति सुसुवुः । मदम् ॥ ६७ ॥
अश्विना । भेषजम् । मधु । भेषजम् । नः । सरस्वती । इंद्रे । त्वष्टा । यशः ।
श्रियम् । रूपंरूपमिति रूपम्ऽरूपम् । अधुः । सुते ॥ ६८ ॥ ऋतुथेस
तुऽथा । इंद्रः । वनस्पतिः । शशमानः । परिस्रुतेति परिऽस्रुता । कीला
लम् । अश्विभ्यामित्यश्विऽभ्याम् । मधु । दुहे । धेनुः । सरस्वती ॥ ६९ ॥

॥२६॥

गोभिः।न।सोमम्।अश्विना।मासरेण।परिस्रुतेति परिऽस्रुता।सम्।
अधातम्।सरस्वत्या।स्वाहा।इंद्रे।सुतम्।मधु॥५०॥अश्विना।हविः।इं
द्रियम्।नमुचेः।धिया।सरस्वती।आ।शुक्रम्।आसुरात्।वसु।मघ
म्।इंद्राय।जभ्रिरे॥५१॥यम्।अश्विना।सरस्वती।हविषा।इंद्रम्।अ
वर्द्धयन्।सः।बिभेद।वलम्।मघम्।नमुचौ।आसुरे।सचा॥५२॥त
म्।इंद्रम्।पशवः।सचा।अश्विना।उभा।सरस्वती।दधानाः।अभि।
अनूषत।हविषा।यज्ञे।इंद्रियैः॥५३॥ये।इंद्रे।इंद्रियम्।दधुः।सवि

॥२६॥

ता।वरुणः।भगः।सः।सुत्रामेति सुऽत्रामा।हविष्पतिः।हविःपति
रिति हविःऽपतिः।यजमानाय।सश्चत॥५४॥सविता।वरुणः।दध
त्।यजमानाय।दाशुषे।आ।अदत्त।नमुचेः।वसु।सुत्रामेति सुऽत्रा
मा।बलम्।इंद्रियम्॥५५॥वरुणः।क्षत्रम्।इंद्रियम्।भगेन।सविता।
श्रियम्।सुत्रामेति सुऽत्रामा।यशसा।बलम्।दधानाः।यज्ञम्।आशत॥५६॥
अश्विना।गोभिः।इंद्रियं।अश्वेभिः।वीर्यम्।बलम्।हविषा।इंद्रम्।
सरस्वती।यजमानम्।अवर्द्धयन्॥५७॥ता।नासत्या।सुपेशसेति सुऽ

पेशसा। हिरण्यवर्त्तनीरितिहिरण्यऽवर्त्तनी। नरा। सरस्वती। हविष्म
ती। इंद्र। कर्मस्वितिकर्मऽसु। नः। अवत॥५८॥ ता। भिषजा। सुकर्मणेति
सुऽकर्मणा। सा। सुदुघेतिसुऽदुघा। सरस्वती। सः। वृत्रहेतिवृत्रऽहा। श
तक्रतुरितिशतऽक्रतुः। इंद्राय। दधुः। इंद्रियम्॥५९॥ युवम्। सुरामम्।
अश्विना। नमुचौ। आसुरे। सचा। विपिपानाइतिविऽपिपानाः। सर
स्वती। इंद्रम्। कर्मस्वितिकर्मऽसु। आवत॥६०॥ यस्मिन्। अश्वासः। ऋ
षभासः। उक्षणः। वशाः। मेषाः। अवसृष्टासइत्यवऽसृष्टासः। आहु

ताइत्याऽहुताः। कीलालपइति कीलालऽपो सोमपृष्ठायेति सोमऽपृष्ठा
य। वेधसे। हृदा। मतिम्। जनय। चारुम्। अग्नये॥ ६१॥ अहावि। अग्ने।
हविः। आस्ये। ते। स्रुचीवेति स्रुचिऽइव। घृतम्। चम्वीवेति चम्विऽइव।
सोमः। वाजसनिमिति वाजऽसनिम्। रयिम्। अस्मेइत्यस्मे। सुवीरमिति सुऽ
वीरम्। प्रशस्तमिति प्रऽशस्तम्। धे हि। यशसम्। बृहंतम्॥ ६२॥ अ
श्विना। तेजसा। चक्षुः। प्राणेन। सरस्वती। वीर्यम्। वाचा। इंद्रः। बलेन।
इंद्राय। दधुः। इंद्रियम्॥ ६३॥ गोमदिति गोऽमत्। ऊँइत्यूँ। सु। नासत्या। अ

ष्मावत्। अश्ववदित्यश्वऽवत्। यातम्। अश्विना। वर्त्तिः। रुद्रा। नृपाय्य
मितिनृऽपाय्यम्॥ ५४॥ नायत्। परः। न। अंतरः। आदधर्षदित्याऽदधर्ष
त्। वृषण्वसूइति वृषण्ऽवसु। दुःशंसइति दुःऽशंसः। मर्त्यः। रिपुः॥ ५५॥
ता। नः। आ। वोळ्हम्। अश्विना। रयिम्। पिशंगसंदृशमिति पिशंगऽसंदृ
शम्। धिष्ण्या। वरिवोविदमिति वरिवःऽविदम्॥ ५६॥ पावका। नः। सर
स्वती। वाजेभिः। वाजिनीवतीति वाजिनीऽवती। यज्ञम्। वष्टु। धियावसु
रिति धियाऽवसुः॥ ५७॥ चोदयित्री। सूनृतानाम्। चेतंती। सुमतीना

मितिसुऽमतीनाम्।यज्ञम्।दधे।सरस्वती॥६८॥महः।अर्णः।सरस्वती।
प्र।चेतयति।केतुना।धियः।विश्वाः।वि।राजति॥६९॥इंद्र।आ।याहि।चि
त्रभानोइतिचित्रऽभानो।सुताः।इमे।त्वायवइतित्वाऽयवः।अण्वीभिः।
तना।पूतासः॥७०॥धिया।इषितः।विप्रजूतइतिविप्रऽजूतः।सुतावतः।
सुतवतइतिसुतऽवतः।उप।ब्रह्माणि।वाघतः॥७१॥तूतुजानः।उप।ब्र
ह्माणि।हरिवइतिहरिऽवः।सुते।दधिष्व।नः।चनः॥७२॥अश्विना।पिबता
म्।मधु।सरस्वत्या।सजोषसेतिसऽजोषसा।इंद्रः।सुत्रामेतिसुऽत्रामा॥

यज्ञहेतियज्ञऽहा। जुषंताम्। सोम्यम्। मधु॥ ७४॥ इतिशुक्लयजुःकाण्व
पदपाठेद्वाविंशत्तितमोध्यायः॥ छ॥ हरिः ॐम्॥ इमम्। मे। वरुण। श्रुधि।
हवम्। अद्य। चा। मृळया। त्वाम्। अवस्युः। आ। चके॥ १॥ त्वम्। नः। अग्ने।
वरुणस्य। विद्वान्। देवस्य। हेळः। अव। यासिसीष्ठाः। यजिष्ठः। वन्हितम
इति वन्हिऽतमः। शोशुचानः। विश्वा। द्वेषांसि। प्र। मुमुग्धि। अस्मत्॥ २॥
सः। त्वम्। नः। अग्ने। अवमः। भवा। ऊती। नेदिष्ठः। अस्याः। उषसः। व्यु
ष्टाविति विऽउष्टौ। अव। यक्ष्व। नः। वरुणम्। रराणः। वीहि। मृळीकम्। सु

हव्यइतिसुऽहव्यः। नः। शाधि॥ ३॥ महीम्। ऊँइत्यूँ। सु। मातरम्। सुव्रता
नामितिसुऽव्रतानाम्। ऋतस्य। पत्नीम्। अवसे। हुवेम। तुविक्षत्रामिति
तुविऽक्षत्राम्। अजरंतीम्। उरूचीम्। सुशर्माणमितिसुऽशर्माणम्। अ
दितिम्। सुप्रणीतिम्। सुप्रनीतिमितिसुऽप्रनीतिम्॥ ५॥ सुत्रामाणमि
तिसुऽत्रामाणम्। पृथिवीम्। द्याम्। अनेहसम्। सुशर्माणमितिसुऽश
र्माणम्। अदितिम्। सुप्रणीतिम्। सुप्रनीतिमितिसुऽप्रनीतिम्। दैवीम्।
नावम्। स्वरित्रामितिसुऽअरित्राम्। अनागसम्। अस्रवंतीम्। आ। रु

॥३०॥

हेमास्वस्तये ॥५॥ सुनावमितिसुऽनावम् । आ । रुहेयम् । अस्रवंतीम् ।
अनागसम् । त्रातारित्रामितित्रातऽअरित्राम् । स्वस्तये ॥६॥ आ । नः ।
मित्रावरुणा । घृतैः । गव्यूतिम् । उक्षतम् । मध्वा । रजांसि । सुक्रतू इ
तिसुऽक्रतू ॥७॥ प्र । बाहवा । सिसृतम् । जीवसे । नः । आ । नः । गव्यूति
म् । उक्षतम् । घृतेन । आ । मा । जने । श्रवयतम् । युवाना । श्रुतम् । मे । मि
त्रावरुणा । हवा । इमा ॥८॥ समिद्धइतिसम्ऽइद्धः । अग्निः । समिधे
तिसम्ऽइधा । सुसमिद्धइतिसुऽसमिद्धः । वरेण्यः । गायत्री । छंदः

॥३०॥

इंद्रियम्। त्र्यविरितित्रिऽअविः। गोः। वयः। दधुः॥९॥ तनूनपादि
तितनूऽनपात्। शुचिव्रतइतिशुचिऽव्रतः। तनूपाइतितनूऽपाः।
च। सरस्वती। उष्णिहा। छंदः। इंद्रियम्। दित्यवाडितिदित्यऽवाट्। गौः।
४ को वयः। दधुः॥१०॥ ईन्निः। अग्निः। ईञ्जः। सोमः। देवः। अमर्त्यः। अनु
ष्टुप्। अनुस्तुबित्यनुऽस्तुप्। छंदः। इंद्रियम्। पंचाविरितिपंचऽअ
विः। गौः। वयः। दधुः॥११॥ सुबर्हिरितिसुऽबर्हिः। अग्निः। पूषण्वानि
तिपूषण्ऽवान्। स्तीर्णबर्हिरितिस्तीर्णऽबर्हिः। अमर्त्यः। बृहती। छंदः।

इंद्रियम्। त्रिवत्सइति त्रिऽवत्सः। गौः। वयः। दधुः॥१२॥ दुरः। देवीः।
दिशः। महीः। ब्रह्मा। देवः। बृहस्पतिः॥ पंक्तिः। छंदः। इह। इंद्रियम्। तुर्य-
वाडिति तुर्यऽवाट्। गौः। वयः। दधुः॥१३॥ उषेइत्युषे। यह्वीइति यह्वी।
सुपेशसेति सुऽपेशसा। विश्वे। देवाः। अमर्त्याः। त्रिष्टुप्। त्रिस्तुबिति
त्रिऽस्तुप्। छंदः। इह। इंद्रियम्। पष्ठवाडिति पष्ठऽवाट्। गौः। वयः। दधुः॥१४॥
दैव्या। होतारा। भिषजा। इंद्रेण। सयुजेति सऽयुजा। युजा। जगती। छं-
दः। इंद्रियम्। अनड्वान्। गौः। वयः। दधुः॥१५॥ तिस्रः। इडा। सरस्व-

ती।भारती।मरुतः।विशः।विराडिति विऽराट्।छंदः।इह।इंद्रियम्।
धेनुः।गौः।न।वयः।दधुः॥१६॥ त्वष्टा।तुरीपः।अद्भुतः।इंद्राग्नी।इतीं
द्राग्नी।पुष्टिवर्द्धनेति पुष्टिऽवर्द्धनी।द्विपदेति द्विऽपदा।छंदः।इंद्रिय
म्।उक्षा।गौः।न।वयः।दधुः॥१७॥ शमिता।नः।वनस्पतिः।सविता।
प्रसुवन्निति प्रऽसुवन्।भगम्।ककुप्।छंदः।इह।इंद्रियम्।वशा।वे
हत्।वेहत्।वयः।दधुः॥१८॥ स्वाहा।यज्ञम्।वरुणः।सुक्षत्र इति सु
क्षत्रः।भेषजम्।करत्।अतिछंदा इत्यतिऽछंदाः।इंद्रियम्।बृहत्।

ऋषभः। गौः। वयः। दधुः॥१९॥ वसंतेन। ऋतुना। देवाः। वसवः। त्रिवृ
तेति त्रिऽवृता। स्तुताः। रथंतरेणेति रथम्ऽतरेण। तेजसा। हविः। इंद्रे।
वयः। दधुः॥२०॥ ग्रीष्मेण। ऋतुना। देवाः। रुद्राः। पंचदश इति पंचऽदशे।
स्तुताः। बृहता। यशसा। बलम्। हविः। इंद्रे। वयः। दधुः॥२१॥ वर्षाभिः।
ऋतुना। आदित्याः। स्तोमे। सप्तदश इति सप्तऽदशे। स्तुताः। विरूपेण।
विशा। ओजसा। हविः। इंद्रे। वयः। दधुः॥२२॥ शारदेन। ऋतुना। दे
वाः। एकविꣳश इत्येकऽविꣳशे। ऋभवः। स्तुताः। वैराजेन। श्रिया।

श्रियम्।हविः।इंद्रे।वयः।दधुः॥२३॥हेमंतेन।ऋतुना।देवाः।त्रिणवे।
त्रिनवइतित्रिनवे।मरुतः।स्तुताः।बलेन।शक्वरीः।सहः।हविः।इं
द्रे।वयः।दधुः॥२४॥शैशिरेण।ऋतुना।देवाः।त्रयस्त्रिंशइतित्रयःऽ
त्रिंशे।अमृताः।स्तुताः।सत्येन।रेवतीः।क्षत्रम्।हविः।इंद्रे।वयः।
दधुः॥२५॥होता।यक्षत्।समिधेतिसम्ऽइधा।अग्निम्।इडः।पदे।
अश्विना।इंद्रम्।सरस्वतीम्।अजः।धूम्रः।न।गोधूमैः।कुवलैः।भे
षजम्।मधु।शष्पैः।न।तेजः।इंद्रियम्।पयः।सोमः।परिस्रुतेतिपरिऽ

स्कृता। घृतम्। मधु। व्यंतु। आज्यस्य। होतः। यज ॥२६॥ तनूनपादिति
तनूऽनपात्। सरस्वतीम्। अविः। मेषः। न। भेषजम्। पथा। मधुमतेतिम
धुऽमता। भरन्। अश्विना। इंद्राय। वीर्यम्। बदरैः। उपवाकाभिरित्युपऽ
वाकाभिः। भेषजम्। तोक्मभिरितितोक्मऽभिः। पयः ॥२७॥ नराशंस
व्याय । कर्मणे । शुंधध्वं । देवयज्याया इति देवऽयज्यायै । यत् । व: । अशुद्धा: ।
पराजघानेति पराऽजघान । एतत् । व: । तत् । शुंधामि ।। १९ ।। शर्म । असि ।
अवधूतमित्यवऽधूतं । रक्ष: । अवधूता इत्यवऽधूता: । अरातय: । अदि
त्या: । त्वक् । असि । प्रति । त्वा । अदिति: । वेत्तु ।। २० ।। अद्रि: । असि । वानस्पत्य: ।
ग्रावा । असि । पृथुबुध्न इति पृथुऽबुध्न: । प्रति । त्वा । अदित्या: । त्वक् । वेत्तु ।। २१ ।।

॥३॥ अग्नेः। तनूः। असि। वाचः। विसर्जनमिति विऽसर्जनं। देववीतय इति देव
वीतये। त्वा। गृह्णामि॥२२॥ बृहन्। ग्रावा। असि। वानस्पत्यः। सः। इदं। देवे
भ्यः। हव्यं। शमीष्व। शमिष्वेति शमिष्व। सुशमीति सुऽशमि। शमीष्व। शमिष्वे
ति शमिष्व। हविष्कृत्। हविःकृदिति हविःऽकृत्। आ। इहि॥२३॥ कुक्कुटः। असि।
मधुजिह्व इति मधुऽजिह्वः। इषं। ऊर्जं। आ। वद। वयं। संघातेसंघाते इति सं
घातेऽसंघाते। जेष्म॥२४॥ वर्षवृद्धमिति वर्षऽवृद्धं। असि। प्रति। त्वा। वर्षवृद्ध
मिति वर्षऽवृद्धं। वेत्तु। परापूतमिति पराऽपूतं। रक्षः। परापूता इति पराऽपू
ताः। अरातयः॥२५॥ अपहतमित्यपऽहतं। रक्षः। वायुः। वः। वि। विनक्तु। देवः। ॥३॥

वः।सविता।प्रति।गृह्णातु।हिरंण्यपाणिरितिहिरंण्यऽपाणिः।अछिद्रेण।पाणि
ना॥१६॥धृष्टिः।असि।अप।अग्ने।अग्निं।आमादमित्यामऽअदं।जहि।निः।
क्रव्यादमिति।क्रव्यऽअदं।सेध।आ।देवयजमितिदेवऽयजं।वह॥१७॥ध्रुवं।
असि।पृथिवीं।दृंह।ब्रह्मवनीतिब्रह्मऽवनि।त्वा।क्षत्रवनीतिक्षत्रऽवनि।स
जातवनीतिसजातऽवनि।उप।दधामि।द्विषतः।वधाय॥१८॥अग्ने।ब्रह्म।गृ
भ्णीष्व।धरुणं।असि।अंतरिक्षं।दृंह।धर्त्रं।दिवं॥१९॥विश्वाभ्यः।त्वा।आशा
भ्यः।उप।दधामि।द्विषतः।वधाय।चितः।स्थ।ऊर्ध्वचितइत्यूर्ध्वऽचितः।भृगू
णां।अंगिरसां।तपसा।तप्यध्वं॥१९॥धिषणा।असि।पर्वती।प्रति।त्वा।अदित्याः

त्वक्। वेत्तु। दिवः। स्कम्भनी। असि। धिषणा। असि। पार्वतेयी। प्रति। त्वा। प[illegible]। वे-
त्तु॥२०॥ धान्यं। असि। धिनुहि। देवान्। धिनुहि। यज्ञं। धिनुहि। यज्ञपतिमिति
यज्ञऽपतिं। धिनुहि। मां। यज्ञन्यमिति यज्ञऽन्यं॥२१॥ प्राणाय। त्वा। उदानायेत्यु-
त्ऽआनाय। व्यानायेति विऽआनाय। दीर्घां। अनु। प्रसितिमिति प्रऽसितिं। आ-
युषे। धां। चक्षुषे। त्वा। महीनां। पयः। असि॥२२॥ वेदः। असि। वेदायेन। त्वं। देव।
वेद। देवेभ्यः। वेदः। अभवः। तेन। मह्यं। वेदः। भव॥२३॥ सं। वपामि। सं। आ-
पः। ओषधीभिः॥२[illegible]षधयः। रसेन। सं। रेवतीः। जगतीभिः। सं। मधुमतीरि-
ति मधुऽमतीः। मधुमतीभिरिति मधुऽमतीभिः। पृच्यन्तां॥ जनयत्यै। त्वा। सं। यो

मि॥२४॥ इदं। अग्नेः। इदं। अग्नीषोमयोः। इषे। त्वा। घर्मः। असि। विश्वायुरितिवि
श्वऽआयुः। उरुप्रथाइत्युरुऽप्रथाः। उरु। प्रथस्व। उरु। ते। यज्ञपतिरितियज्ञऽ
पतिः। प्रथतां॥२५॥ अग्निः। ते। त्वचं। मा। हिंसीत्। अंतरितमित्यंतःऽइतं।
रक्षः। अंतरिताइत्यंतःऽइताः। अरातयः। देवः। त्वा। सविता। श्रपयतु। वर्षि
ष्ठे। अधि। नाके॥२६॥ मा। भेः। मा। सं। विक्थाः। अतमेरुः। यज्ञः। अतमेरुः। य
जमानस्य। प्रजेतिप्रऽजा। भूयात्। त्रिताय। द्विताय। एकताय। त्वा॥२७॥ आ
ददे। अध्वरकृतमित्यध्वरऽकृतं। देवेभ्यः। इंद्रस्य। बाहुः। असि। दक्षिणः।
सहस्रभृष्टिरितिसहस्रऽभृष्टिः। शततेजाइतिशतऽतेजाः। वायुः। असि। ति

॥२॥ ग्मतेजा इति ग्म ऽ तेजाः । द्विषतः । वधः । २४ । पृथिव्यै । वर्म्म । असि । पृथिवि । देवय
जनीति देव ऽ यजनि । ओषध्याः । ते । मूलं । मा । हिꣳसिषं । २५ । व्रजं । गच्छ । गोष्ठानं ।
गोस्थानमिति गोः ऽ स्थानं । वर्षतु । ते । द्यौः । बधान । देव । सवितरिति सवितः । परम
स्यां । पृथिव्यां । शतेन । पाशैः । यः । अस्मान् । द्वेष्टि । ये । च । वयं । द्विष्मः । तं । अतः ।
मा । मोक् । २६ । अप । अररुं । वध्यासं । पृथिव्यै । देवयजनादिति देव ऽ यजना
त् । अररो । इत्यररो । दिवं । मा । पप्तः । द्रप्सः । ते । द्यां । मा । स्कन् । २७ । गायत्रेण । त्वा ।
छंदसा । परि । गृह्णामि । त्रैष्टुभेन । त्रैष्टुभेनेति त्रैष्टुभेन । जागतेन । त्वा । छंदसा ।
परि । गृह्णामि । सुक्ष्मा । च । असि । शिवा । च । असि । स्योना । च । असि । सुषदा । सु ॥५॥

सदेतिसुऽसदा । च । असि । ऊर्जस्वती । च । असि । पयस्वती । च ।२७। पुरा । क्रूर
स्य । विसृप इति विऽसृपः । विरप्शिन्निति विऽरप्शिन् । उदादायेत्युत्ऽआदाय ।
पृथिवीं । जीवदानुमिति जीवऽदानुं ॥ यां । ऐरयन् । चंद्रमसि । स्वधाभिः । तां । धी
रासः । अनुदिश्येत्यनुऽदिश्य । यजंते । द्विषतः । वधः । असि ।२८। अनिशित
इत्यनिऽशितः । असि । सपत्नक्षिदिति सपत्नऽक्षित् । वाजिनं । त्वा । वाजेध्या
या इति वाजऽइध्यायै । सं । मार्ज्मि । अनिशितेत्यनिऽशिता । असि । सपत्नक्षि
दिति सपत्नऽक्षित् । वाजिनीं । त्वा । वाजेध्याया इति वाजऽइध्यायै । सं । मार्ज्मि ॥२९॥
अदित्यै । रास्ना । असि । इंद्राण्यै । संनहनमिति संऽनहनं । विष्णोः । वेष्पः । असि ।

जुष्टं। त्वा। अदब्धेन। त्वा। चक्षुषा। अव। पश्यामि।।३०।।अग्नेः। जिह्वा। असि।
सुभूरिति सुऽभूः। देवेभ्यः। धाम्नेधाम्नइति धाम्नेऽधाम्ने। मे। भव। यजुषेयजुषइ
ति यजुषेऽयजुषे। सवितुः। त्वा। सवितुः। वः।।३१।। तेजः। असि। शुक्रं। अमृतं।
धाम। नाम। असि। प्रियं। देवानां। अनाधृष्टं। देवयजनमिति देवऽयजनं।।३२।।
यः। ते। प्राणः। पशुषु। प्रविष्ट इति प्रऽविष्टः। देवानां। विष्ठां। विस्थामिति विऽस्थां
अनु। यः। वि। तस्थ इति विऽतस्थे। आत्मन्वानि सोत्मनऽवान् [illegible] सोम। घृतवानिति
घृतऽवान्। हि। भूत्वा। अग्निं। गच्छ। स्वः। यजमानाय। विंद।।३३।। ।इति प[illegible]
ठे प्रथमोध्यायः। श्री। हरिः। ॐम्। कृष्णः। असि। आखरेष्ठः। आखरेस्थ

इत्याखरेऽस्थः। अग्नये। त्वा। जुष्टं। प्र। उक्षामि। वेदिः। असि। बर्हिषे। त्वा। जुष्टं।
प्र। उक्षामि। बर्हीः। असि। स्रुग्भ्य इति स्रुक्ऽभ्यः। त्वा। जुष्टं। प्र। उक्षामि। १। अ
दित्यै। युंदना। मिति विस्तुरईवं। असि। विष्णोः। स्तूपः। असि। ऊर्णम्रदसमि
त्यूर्णऽम्रदसं। त्वा। स्तृणामि। स्वासस्थमिति सुऽआसस्थं। देवेभ्यः। २। भू
वपतयऽइति भुवऽपतये। स्वाहा। भुवनपतयऽइति भुवनऽपतये। भूतानां। पतये। स्वा
हा। गंधर्वः। त्वा। विश्वावसुः। विश्वावसुरिति विश्वऽवसुः। परि। दधातु। विश्वस्य।
अरिष्ट्यै। ३। यजमानस्य। परिधिरिति परिऽधिः। असि। अग्निः। इळः। ईळितः।
असि इंद्रस्य। बाहुः। दक्षिणः। मित्रावरुणौ। त्वा। उत्तरतः। परि। धत्तां। ध्रुवेण। धर्मणा।

॥७॥ ॥४॥ वीतिहोत्रमितिवीतिऽहोत्रं। त्वा। कवे। द्युमंतमितिद्युऽमंतं। सं। इधीमहि। अ
ग्ने। बृहंतं। अध्वरे॥५॥ समिदितिसंऽइत्। असि। सूर्यः। त्वा। पुरस्तात्। पातु।
कस्याः। चित्। अभिशस्त्या इत्यभिऽशस्त्यै। सवितुः। बाहूइतिबाहू। स्थः॥ ऊ।
ऊर्णम्रदसमित्यूर्णऽम्रदसं। त्वा। स्तृणामि। स्वासस्थमितिसुऽआसस्थं। देवे
भ्यः। आ। त्वा। वसवः। रुद्राः। आदित्याः। सदंतु॥७॥ घृताची। असि। जुहूः।
नाम्ना। सा। इदं। प्रियेण। धाम्ना। प्रियं। सदः। आ। सीद। उपभृदित्युपऽभृत्। घृता। ध्रु
वा। प्रियेण। धाम्ना। प्रियं। सदः। आ। सीद॥८॥ ध्रुवाः। असदन्। ऋतस्य। योनौ। ॥७॥
ता। विष्णो इति विष्णो। पाहि। पाहि। यज्ञं। पाहि। यज्ञपतिमितियज्ञऽपतिं। पाहि। मां।

सीदध्रुवा°

सीदघृता° सीदध्रुवा°

यज्ञन्यमिति यज्ञऽन्यं ।९। अग्ने । वाजजिदिति वाजऽजित् । वाजं । त्वा । सरिष्यंतं ।
वाजजितमिति वाजऽजितं । सं । मार्ज्मि । नमः । देवेभ्यः । स्वधा । पितृभ्य इति पितृऽ
भ्यः । सुयमे इति सुऽयमे । मे । भूयास्तं ॥१०॥ अस्कन्नं । अद्य । आज्यं । देवेभ्यः । संभ्रि
यासं । अंघ्रिणा । विष्णो इति विष्णो । मा । त्वा । अव । क्रमिषं ॥११॥ वसुमतीमिति व
सुऽमतीं । अग्ने । ते । छायां । उप । स्थेषं । विष्णोः । स्थानं । असि । इतः । इंद्रः । वी
र्यं । अकृणोत् । ऊर्ध्वः । अध्वरः । आ । अस्थात् ॥१२॥ अग्ने । वेः । होत्रं । वेः । दूत्यं ।
अवतां । त्वां । द्यावापृथिवी इति द्यावापृथिवी । अव । त्वं । द्यावापृथिवी इति द्या
वापृथिवी ॥१३॥ स्विष्टकृदिति स्विष्टऽकृत् । देवेभ्यः । इंद्रः । आज्येन । हविषा ।

अस्यादमे

अस्यादमे

अस्यादमे

॥८॥ भृता। स्वाहा। सं। ज्योतिषा। ज्योतिः॥१४॥ अत्र। पितरः। मादयध्वं। यथाभाग
मिति यथा ऽभागं। आ। वृषायध्वं। वृषयध्वमिति वृषऽयध्वं। अमीमदंत।
पितरः। यथाभागमिति यथा ऽभागं। आ। अवृषायिषत॥१५॥ उपहूतेत्यु
पऽहूता। पृथिवी। माता। उप। मां। पृथिवी। माता। ह्वयतां। अग्निः। आग्नीध्रा
त्। स्वाहा॥१६॥ उपहूतइत्युपऽहूतः। द्यौः। पिता। उप। मां। द्यौः। पिता। ह्व
यतां। अग्निः। आग्नीध्रात्। स्वाहा॥१७॥ मयि। इदं। इंद्रः। इंद्रियं। दधातु।
अस्मान्। रायः। मघवानइति मघऽवानः। सचंतां। अस्माकं। संतु। आ ॥८॥
शिषइत्याऽशिषः। सत्याः। नः। संतु। आशिषइत्याऽशिषः। अग्ने। वाजजित्

भायोंद

दिति वाजऽजित् । वाजं । त्वा । सस्रवाꣳसं । सस्रवाꣳसमिति सस्रुऽवाꣳसं । वाजजित्तमिति
वाजऽजितं । सं । मार्ज्मि ॥ १८ ॥ देवं । सवितुः । एतं । वा । वृणते । बृहस्पतिं । ब्रह्माणं ।
तत् । अहं । मनसे । प्र । ब्रवीमि ॥ १९ ॥ मनः । गायत्र्यै । गायत्री । त्रिष्टुभे । त्रिस्तु
भ इति त्रिऽस्तुभे । त्रिष्टुप् । [illegible]विति त्रिऽस्तुप् । जगत्यै । जगती । अनुष्टु
भे । अनुस्तुभ इत्यनुऽस्तुभे । अनुष्टुप् । अनुस्तुविति अनुऽस्तुप् । प्रजापतय इ
ति प्रजाऽपतये । प्रजापतिरिति प्रजाऽपतिः । विश्वेभ्यः । देवेभ्यः ॥ २० ॥ बृ
हस्पतिः । देवानां । ब्रह्मा । अहं । मनुष्याणां । भूः । भुवः । स्वः । निरस्त इति निः
ऽअस्तः । पाप्मा । इदं । अहं । बृहस्पतेः । सदसि । सीदयामि ॥ २१ ॥ मित्रस्य ।

त्वा। चक्षुषा। प्रति। ईक्षे। प्रति। गृह्णामि॥२२॥ आ। ददे। अग्नेः। त्वा। आस्येन। प्र।
अश्नामि। बृहस्पतेः। मुखेन। याः। अप्स्विसप्॰सु। अंतः। देवताः। ताः। इदं।
शमयंतु॥२३॥ स्वाहाकृतमिति स्वाहा॰कृतं। जठरं। इंद्रस्य। गच्छ। घसिनौ।
मे। मा। सं। पृक्थाः। ऊर्ध्वं। मे। नाभेः। सीद॥२४॥ इंद्रस्य। त्वा। जठरे। सादया
मि। प्रजापतेरिति प्रजा॰पतेः। भागः। असि। ऊर्ज्जस्वान्। पयस्वान्॥२५॥
प्राणापानौ। मे। पाहि। समानव्यानौ। उदानव्यानौ। ऊर्क्। असि। ऊर्जं। म
यि। धेहि। अक्षितिः। असि। मा। मे। क्षेष्ठाः। अमुत्र। अमुष्मिन्। लोके। इह।
च॥२६॥ एषा। ते। अग्ने। समिदिति सं॰इत्। तया। वर्द्धस्व। च। आ। च। प्या

यस्त्वा । बर्द्धिषीमहि । च । वयं । आ । च । प्यासिषीमहि ॥२७॥ एतत् । ते । देव । स
वितः । यज्ञं । प्र । आहुः । बृहस्पतये । ब्रह्मणे । तेन । यज्ञं । अव । तेन । यज्ञपति
मितियज्ञऽपतिं । तेन । मां । अव ॥२८॥ मनः । ज्योतिः । जुषतां । आज्यस्य । बृह
स्पतिः । यज्ञं । इमं । तनोतु । अरिष्टं । यज्ञं । सं । इमं । दधातु । विश्वे । देवासः । इ
ह । मादयंतां । ॐ । प्र । तिष्ठ ॥२९॥ अग्नीषोमयोः । उज्जितिमित्युत्ऽजितिं । अ
नु । उत् । जेषं । वाजस्य । मा । प्रसवेनेतिप्रऽसवेन । प्र । ऊहामि । अग्नीषोमौ ।
ते । अप । नुदतां । यः । अस्मान् । द्वेष्टि । यंच । वयं । द्विष्मः । वाजस्य । एनं । प्रस
वेनेतिप्रऽसवेन । अप । ऊहामि । इंद्राग्न्योः । इंद्राग्नी इतींद्राग्नी ॥३०॥ वसुभ्य

इति वसुऽभ्यः। त्वा। रुद्रेभ्यः। आदित्येभ्यः। सं। जानाथां। द्यावापृथिवी इति द्यावा
पृथिवी। मित्रावरुणौ। त्वा। वृष्ट्या। अवतां॥ २१॥ व्यंतु। वयः। रिप्तः। रिहाणाः।
मरुतां। पृषतीं। गच्छ। वशा। पृश्निः। भूत्वा। दिवं। गच्छ। ततः। नः। वृष्टिं। आ। व
ह॥ २२॥ चक्षुष्पाः। चक्षुःपा इति चक्षुःऽपाः। असि। चक्षुः। मे। पाहि। यं। परि
धिमिति परिऽधिं। पर्यधत्था इति परिऽअधत्थाः। अग्ने। देव। पणिभिरिति प
णिऽभिः। गुह्यमानः॥ २३॥ तं। ते। एतं। अनु। जोषं। भरामि। एषः। न। इत्। त्व
त्। अपचेतयातै इत्यपऽचेतयातै। अग्नेः। प्रियं। पाथः। अपि। इतं॥ २४॥
संस्रवभागा इति संऽस्रवऽभागाः। स्थ। इषा। बृहंतः। प्रस्तरेष्ठाः। प्रस्तरे

स्था इति प्रस्तरेऽस्थाः । परिधय इति परिऽधयः । च । देवाः । इमां । वाचं । अभि ।
विश्वे । गृणंतः । आसद्येत्याऽसद्य । अस्मिन् । बर्हिषि । मादयध्वं । स्वाहा । वाट् ।
घृताची इति घृताची । स्थः । धुर्यौ । पातं । सुम्ने इति सुम्ने । स्थः । सुम्ने । मा । धत्तं ।
।।३५।। अग्ने । अदब्धायो इत्यदब्धऽअयो । अशीतमा पा । हि । मा । दिद्योः । पा
हि । प्रसित्या इति प्रऽसित्यै । दुरिष्ट्या इति दुःऽइष्ट्यै । दुरद्मन्या इति दुःऽअद्म
न्यै । अविषं । नः । पितुं । कृणु । सुषदा । सुसदेति सुऽसदा । योनौ । स्वाहा । वाट् ।
।।३६।। अग्नये । संवेशपतय इति संवेशऽपतये । स्वाहा । सरस्वत्यै । यशोभ
गिन्या इति यशःऽभगिन्यै । स्वाहा । उलूखले । मुसले । यत् । च । शूर्पे । आशिश्रे

॥११॥

इत्वीता इत्वीता

पेस्यः। म्नि। क्रोषे। हृपदि। यतु। कृपालैः॥ ३७॥ उस्कषु इस्कृतुऽ एषः। विष्णुव इति
विःस्नुषे। संजु होमि। सस्याः। संतु। यजमानस्य। कामाः। स्वाहा। आप्यायतां॥
ध्रुवा। हविषा। घृतेन। यज्ञंयज्ञमितियज्ञंऽयज्ञं। प्रति। देवयद्भ्य इति देव
यतुऽभ्यः। सूर्यायोः। ऊधः। अदित्याः। उपस्थ इस्थुपऽस्थे। उरुधारे स्युरु
धारा। पृथिवी। यज्ञे। अस्मिन्॥ ३८॥ देवाः। गातुविद इति गातुऽविदः।
गातुं। इत्वा। गातुं। इत। मनसः। पते। इमं। देव। यज्ञं। स्वाहा। वाते। धाः॥ ३९॥
सं। बर्हिः। अक्तां। हविषा। घृतेन। सं। आदित्यैः। वसुभिरिति वसुऽभिः।
सं। मरुद्भिरिति मरुतऽभिः। सं। इंद्रः। विश्वेदेवेभिरिति विश्वेऽदेवेभिः। अक्तां।

देवयज्यस्सूर्यायोः

॥११॥

दिव्यं। नभः। गच्छतु। यत्। स्वाहा॥२२॥ कः। त्वा। वि। मुंचति। सः। कस्मै। तस्मै। पो
षाय। रक्षसां। भागः। असि॥२३॥ वेषः। असि। उपवेष इत्युपऽवेषः। द्विष
उपा२ तः। ग्रीवाः। वि। विद्धि। वेशान्। अग्ने। सुभगे ति सुऽभग। धारय। इह॥२४॥ स्रु
अ५ चाः। कर्मण्याः। अनपायिन इत्यनपऽयिनः। यथा। असन्। जुहोमि। त्वा। सु
भगेति सुऽभग। सौभगाय। पुरुतमं। पुरुतममिति पुरुऽतमं। पुरुहूतेति
पुरुऽहूत। श्रवस्यत्॥२५॥ सं। वर्चसा। पयसा। सं। तनूभिः। अगन्महि।
मनसा। सं। शिवेन। त्वष्टा। सुदत्र इति सुऽदत्रः। वि। दधातु। रायः। अ
नु। मार्ष्टु। तन्वः। यत्। विलिष्टमिति विऽलिष्टं॥२६॥ यज्ञ। त्रो। वा। ते। अपानु।

।।१२।। त्रिष्टुभे।मे।सं।तिष्ठस्व।अग्निःष्टे।स्विष्टइतिसुऽइष्टे।मे।सं।तिष्ठस्व।।५५।।
दिवि।विष्णुः।विऽअक्रंस्त।जागतेन।छंदसा।ततः।निर्भक्तइतिनिः।
भक्तः।यः।अस्मान्।द्वेष्टि।यं।च।वयं।द्विष्मः।अंतरिक्षे।त्रैष्टुभेन।त्रैष्टु
भेनेतित्रैस्तुभेन।पृथिव्यां।गायत्रेण।।५६।।अस्मात्।अन्नात्।अस्यै।
प्रतिष्ठायै।प्रतिस्थायाइति प्रतिऽस्थायै।अगन्म।[illegible]स्वरितिस्वः।
सं।ज्योतिषा।अभूम।।५७।।स्वयंभूरितिस्वयंऽभूः।असि।श्रेष्ठः।र
श्मिः।वर्चोदाइतिवर्चःऽदाः।असि।वर्चः।मे।देहि।सूर्यस्य।आवृतमि
त्याऽवर्त्तं।अनु।आ।वर्त्ते।।५८।।अग्ने।गृहपतइतिगृहऽपते।सुगृहप ।।१२।।

रात्तांम

तिरिति सुऽगृहपतिः । अहं । त्वया । गृहपत्येति गृहऽपत्या । भूयासं । सुगृ
हपतिरिति सुऽगृहपतिः । [illegible]या । गृहपत्येति गृहऽपत्या । भूयाः ॥४९॥ अस्थु
रि नः । गार्हपत्यानीति गार्हऽपत्यानि । सं । तु । शतं । हिमाः । तिग्मेन । नः । तेज
सा । सं । शिशाधि । सूर्यस्य । आवृतमित्याऽवृतं । अनु । आ । वर्ते ॥५०॥ उरु
विष्णो इति विष्णो । वि । क्रमस्व । उरु । क्षयाय । नः । कृधि । घृतं । घृतयोन इति
घृतऽयोने । पिब । प्रप्रेति प्रऽप्र । यज्ञपतिमिति यज्ञऽपतिं । तिर ॥५१॥ ततः ।
असि । तंतुः । असि । अनु । मा । तनुहि । अस्मिन् । यज्ञे । अस्यां । साधुकृत्याया
मिति साधुऽकृत्यायां । अस्मिन् । अन्ते । अस्मिन्लोके ॥५२॥ इदं । मे । कर्मेदं

॥६३॥ दं। वीर्यं। पुत्रः। अनु। संतनोत्विति संऽतनोतु। अग्ने। व्रतपत इति व्रतऽपते। व्रतं।

अशकं। तत् अचारिषं। तत्। मे। अराधि। इदं। अहं। यः। एव। अस्मि। सः। एव। अस्मि।५३।।

अग्नये। कव्यवाहनायेति कव्यऽवाहनाय। स्वाहा। सोमाय। पितृमत इति पि

तृऽमते। स्वाहा। अपहता इत्यपऽहताः। असुराः। रक्षांसि। वेदिषदः। वेदिस

दइति वेदिऽसदः॥५४॥ ये। रूपाणि। प्रतिमुंचमाना इति प्रतिऽमुंचमानाः। अ

स्वधया। सुराः। संतः। चरंति। परापुर इति पराऽपुरः। निपुर इति निऽपुरः। ये। भरंति। अ

ग्निः। तान्। लोकात्। प्र। नुदाति। अस्मात्॥५५॥ नमः। वः। पितरः। शुष्माय। त ॥६३॥

पसे। यत्। जीवं। तस्मै। रसाय। घोराय। मन्यवे। स्वधायै। वः। पितरः। नमः। एत

त्।वः।पितरः।वासः।गृहान्।नः।पितरः।दत्त।।५१।।उत्।आयुषा।स्वायु
षेति सुऽआयुषा।उत्।पर्जन्यस्य।धामभिरिति धामऽभिः।उत्।अस्थां।अमृ
२२ तान्।अनु।।५२।।आ।धत्त।पितरः।गर्भं।कुमारं।पुष्करस्रजमिति पुष्कर
स्रजं।यथा।इह।पुरुषः।असत्।।५३।।ऊर्ज्जं।वहंतीः।अमृतं।घृतं।पयः।की
लालं।परिस्रुतमिति परिऽस्रुतं।स्वधाः।स्थ।तर्पयत।मे।पितॄन्।।५४।।इ
ति पदपाठे द्वितीयोऽध्यायः।। ।।श्री।।हरिः।।ॐ।। समिधेति संऽइधा।
अग्निं।दुवस्यत।घृतैः।बोधयत।अतिथिं।आ।अस्मिन्।हव्या।जुहोतन।
।।१।।सुसमिद्धायेति सुऽसमिद्धाय।शोचिषे।घृतं।तीव्रं।जुहोतन।अग्नये।

॥२९॥ जातवेदस इति जातऽवेदसे ॥२॥ तं । त्वा । समिद्भिरिति समित्ऽभिः । अंगिरः ।
घृतेन । वर्द्धयामसि ॥ बृहत् । शोचा । यविष्ठ्य ॥३॥ उप । त्वा । अग्ने । हविष्मतीः । घृ
ताचीः । यंतु । हर्यत । जुषस्व । समिध इति संऽइधः । मम ॥४॥ भूः । भुवः । स्वः । द्यौ
रिवेति द्यौःऽइव । भूम्ना । भूमिरिवेति भूमिःऽइव । वरिम्णा ॥ तस्याः । ते । पृथिवी ।
देवयजनीति देवऽयजनि । पृष्ठे । अग्निं । अन्नादमित्यन्नऽअदं । अन्नाद्यायेत्य
न्नऽअद्याय । आ । दधे ॥५॥ आ । अयं । गौः । पृश्निः । अक्रमीत् । असदत् । मात
रं । पुरः ॥ पितरं । च । प्रयन्निति प्रऽयन् । स्वरिति स्वः ॥६॥ अंतरित्यंतः । चरति ।
रोचना । अस्य । प्राणात् । अपानतीत्यपऽअनती ॥ वि । अख्यत् । महिषः । दिवं ॥७॥ ॥२९॥

त्रिंशत्। धाम। वि। राजति। वाक्। पतंगाय। धीयते॥ प्रति। वस्तोः। अ
हे। द्युभिरिति द्युऽभिः॥ ८॥ अग्निऽज्योतिषमित्यग्निःऽज्योतिषं। त्वा। वायुमतीमि
ति वायुऽमतीं। प्राणवंतीमिति प्राणऽवतीं। स्वर्ग्यामिति स्वःऽग्यां। स्वर्गायेति
स्वःऽगाय। उप। दधामि। भास्वतीं। अग्निः। ज्योतिः। अग्निः। स्वाहा॥ ९॥ सू
र्य्यज्योतिषमिति सूर्यःऽज्योतिषं। त्वा। वायुमतीमिति वायुऽमतीं। प्राणवती
मिति प्राणऽवतीं। स्वर्ग्यामिति स्वःऽग्यां। स्वर्गायेति स्वःऽगाय। उप। दधामि।
भास्वतीं। सूर्यः। ज्योतिः। ज्योतिः। सूर्यः। स्वाहा॥ १०॥ सजूरिति सऽजूः। दे
वेन। सवित्रा। सजूरिति सऽजूः। रात्र्या। इंद्रवत्येतींद्रऽवत्या। जुषाणः। अ

ज्योतिः

ग्निः। वेतु। स्वाहा॥ ३१॥ सजूरिति सऽजूः। देवेन। सवित्रा। सजूरिति सऽजूः।
उषसा। इंद्रवत्येतींद्रऽवत्या। जुषाणः। सूर्यः। वेतु। स्वाहा॥ ३२॥ इह। पुष्टिं। पु
ष्टिपतिरिति पुष्टिऽपतिः। दधातु। इह। प्रजामिति प्रऽजां। रमयतु। प्रजापति
रिति प्रजाऽपतिः। अग्नये। गृहपतय इति गृहऽपतये। रयिमत इति रयिऽमते।
पुष्टिपतय इति पुष्टिऽपतये। स्वाहा। अग्नये। अन्नादायेत्यन्नऽअदाय। अन्नप
तय इत्यन्नऽपतये। स्वाहा॥ ३३॥ अनमित्रं। मे। अधराक्। अनमित्रं। उद
क्। कृधि। इंद्र। अनमित्रं। पश्चात्। मे। अनमित्रं। पुरः। कृधि॥ ३४॥ इंद्रः। प
श्चात्। इंद्रः। पुरस्तात्। इंद्रः। अस्मान्। अभि। पातु। विश्वतः॥ इंद्रः। जिघा

ऽसतां।मनोः।सि।विषूचीनो।वि।अस्यतात्॥१५॥समिदिति सं ऽइत्।असि।
सामिद्धइति सं ऽइद्धः।मे।अग्ने।दीदिहि।समेद्धेति सं ऽएद्धा।ते।अग्ने।दीद्या
सं॥१६॥उपप्रयंतइत्युपऽप्रयंतः।अध्वरं।मंत्रं।वोचेम।अग्नये।आरे।अ
स्मेइत्यस्मे।च।शृण्वते॥१७॥अग्निः।मूर्द्धा।दिवः।ककुत्।पतिः।पृथिव्याः।
अयं।अपां।रेतांसि।जिन्वति॥१८॥उभा।वां।इंद्राग्नी इतींद्राग्नी।आहु
वध्याइत्याऽहुवध्यै।उभा।राधसः।सह।मादयध्यै।उभा।दातारौ।इषां।र
यीणां।उभा।वाजस्य।सातये।हुवे।वां॥१९॥अयं।ते।योनिः।ऋत्वियः।य
तः।जातः।अरोचथाः॥तं।जानन्।अग्ने।आ।रोह।अथ।नः।वर्द्धय।र

॥१६॥ र्षिं॥२०॥ अयं। इह। प्रथमः। धायि। धातृभिरिति धातृऽभिः। होता। यजिष्ठः
अध्वरेषु। ईड्यः॥ यं। अप्नवानः। भृगवः। विरुरुचुरिति विऽरुरुचुः। वनेषु।
चित्रं। विभ्वमिति विऽभ्वं॥ विशेविश इति विशेऽविशे॥२१॥ अस्य। प्रत्नां। अ
नु। द्युतं। शुक्रं। दुदुह्रे। अह्रयः॥ पयः। सहस्रसामिति सहस्रऽसां॥ ऋषीं॥
॥२२॥ तनूपा इति तनूऽपाः। अग्ने। असि। तन्वं। मे। पाहि। आयुर्दा इत्यायुःऽदाः।
अग्ने। असि। आयुः। मे। देहि। वर्चोदा इति वर्चःऽदाः। अग्ने। असि। वर्चः। मे।
[illegible] देहि॥२३॥ अग्ने। यत्। मे। तन्वाः। ऊनं। तत्। मे। आ। पृण। इंधानाः। शतं। हि ॥सो॥७
माः। द्युमंतमिति द्युऽमंतं। सं। इधीमहि॥२४॥ वयस्वंतः। वयस्कृतं। वयःऽकृत ॥१६॥

मिति वयःऽकृतं। सहस्वंतः। सहस्कृतं। सहःऽकृतमिति सहःऽकृतं। अग्ने। स
पत्नदंभनमिति सपत्नऽदंभनं। अदब्धासः। अदाभ्यं॥२५॥ चित्रावसो। चि
त्रवसो इति चित्रऽवसो। स्वस्ति। ते। पारं। अशीय। सं। त्वं। अग्ने। सूर्यस्य। वर्च
सा। अगथाः। ऋषीणां। स्तुतेन॥२६॥ प्रियेण। धाम्ना। अहं। आयुषा। वर्च
सा। प्रजयेति प्रऽजया। रायः। पोषेण। ग्मिषीय। अंधः। स्थ। अंधः। वः। भ
क्षीय। महः। स्थ। महः। वः। भक्षीय॥२७॥ ऊर्जः। स्थ। ऊर्जं। वः। भक्षीय।
रायः। पोषः। स्थ। रायः। पोषं। वः। भक्षीय। रेवतीः। रमध्वं। अस्मिन्। योनौ।
गोष्ठे। गोस्थ इति गोऽस्थे। क्षये। लोके॥२८॥ इह। एव। स्त। इतः। मा। अप। गा

सचस्व। नः। स्वस्तये॥३२॥ अग्ने। त्वं। नः। अंतमः। उत। त्राता। शिवः। भव।

त॥ सऽहितेति संऽहिता॥ असि। विश्वरूपीति विश्वऽरूपी। ऊर्जा। मा। आ। वि
॥१७॥ श। गोपत्येन॥२९॥ उप। त्वा। अग्ने। दिवेदिवइति दिवेऽदिवे। दोषावस्तरिति
दोषाऽवस्तः। धिया। वयं॥ नमः। भरंतः। आ। इमसि॥३०॥ राजंतं। अध्वरा
णां। गोपां। ऋतस्य। दीदिविं॥ वर्द्धमानं। स्वे। दमे॥३१॥ सः। नः। पितेवेति पि
५ अग्ने। ताऽइव। सूनवे। सूपायन इति सुऽउपायनः। भव। वरूथ्यः॥ वसुः। अग्निः।
वसुश्रवा इति वसुऽश्रवाः। अच्छ। नक्षि। द्युमत्तममिति द्युमत्ऽतमं। रयिं।
दाः॥३३॥ तं। त्वा। शोचिष्ठ। दीदिव इति दीदिऽवः। सुम्नाय। नूनं। ईमहे। सखि ॥१७॥
भ्य इति सखिऽभ्यः॥ सः। नः। बोधि। श्रुधि। हवं। उरुष्य। नः। अघायतः।

द्युमत्तेमांव रयिंर

अघयत इत्यघऽयतः। समस्मात्॥२४॥ इच्छे। आ। इहि। अदिते। काम्ये। आ।
इहि। मयि। वः। कामधरणमिति कामऽधरणं। भूयात्॥२५॥ सोमानं। स्वरणं।
कृणुहि। ब्रह्मणः। पते। कक्षीवंतं। यः। औशिजः॥२६॥ यः। रेवान्। यः। अमी
वहेत्यमीवऽहा। वसुविदिति वसुऽवित्। पुष्टिवर्द्धन इति पुष्टिऽवर्द्धनः॥ सः। नः।
सिषक्तु। सिसक्त्विति सिसक्तु। यः। तुरः॥२७॥ मा। नः। शंसः। अररुषः। धू
र्तिः। प्रणक्। मर्त्यस्य॥ रक्ष। नः। ब्रह्मणः। पते॥२८॥ महि। त्रीणां। अवः।
अस्तु। द्युक्षं। मित्रस्य। अर्यम्णः। दुराधर्षमिति दुःऽआधर्षं। वरुणस्य।
॥२९॥ नहि। तेषां। अमा। चन। न। अध्वस्वित्यध्वऽसु। वारणेषु। ईशे। रि

॥१९॥ पुः । अघघ्नीऽः सहस्रघऽघ्नीऽः सः ॥ ५० ॥ ते । हि । पुत्रासः । अदितेः । प्र । जीव
से । मर्त्याय । ज्योक् । चास्र्यैतिः । यच्छंति । अजस्रं ॥ ५१ ॥ कदा । चन । स्तरीः ।
असि । न । इंद्र । सश्चसि । दाशुषे । उपोपेत्युपऽउप । इत् । नु । मघवन्निति
मघऽवन् । भूयः । इत् । नु । ते । दानं । देवस्य । पृच्यते ॥ ५२ ॥ तत् । सवितुः । व
रेण्यं । भर्गः । देवस्य । धीमहि । धियः । यः । नः । प्रचोदयादिति प्रऽचोदयात् ।
॥ ५३ ॥ परि । ते । दूळभः । दुर्दभ इति दुःऽदभः । रथः । अस्मान् । अश्नोतु । वि
श्वतः । येन । रक्षसि । दाशुषः ॥ समिद्ध इति सम्ऽइद्धः । मा । सं । अर्धय । प्र ॥१९॥
ऋ जयेति प्रऽजया । धनेन । च ॥ ५४ ॥ भूः । भुवः । स्वरिति स्वः । सुप्रजा इति

वसुवित्तमोग्ने

सुऽप्रजाः। प्रजयेति प्रऽजया। भूयासं। सुवीरइति सुऽवीरः। वीरैः। सुपो
षइति सुऽपोषः। पोषैः॥३५॥ नर्य। प्रजामिति प्रऽजां। मे। पाहि। शाःस्य। पु
शून्। मे। पाहि। आ। अगन्म। विश्ववेदसमिति विश्वऽवेदसं। अस्मभ्यं।
वसुवित्तममिति वसुवित्ऽतमं॥३६॥ अग्ने। संम्राळिति सं॰राट्। अभि।
द्युम्नं। अभि। सहः। आ। यच्छस्व। अयं। अग्निः। गृहपतिरिति गृहऽप
तिः। गार्हपत्यइति गार्हऽपत्यः। प्रजावानिति प्रजाऽवान्। वसुवित्तमइ ह
ति वसुऽवित्ऽतमः॥३७॥ अग्ने। गृहपतइति गृहऽपते। अभि। द्युम्नं।
अभि। सहः। आ। यच्छस्व। गृहाः। मा॥ बिभीत। मा। वेपध्वं। ऊर्जं। बिभ्रतः।

॥१०॥

र मोदेमानो

आ। इमसि॥४८॥ ऊर्ज्जं। बिभ्रत्। वः। सुमना इति सुऽमनाः। सुमेधा इति
सुऽमेधाः। गृहान्। आ। एमि। मनसा। मोदमानः। येषां। अध्येतीत्यधिऽ
एति। प्रवसन्निति प्रऽवसन्। येषु। सौमनसः। बहुः॥४९॥ गृहान्। उप। ह्व
यामहे। ते। नः। जानंतु। जानतः। उपहूता इत्युपऽहूताः। इह। गावः। उ
पहूता इत्युपऽहूताः। अजावयः॥५०॥ अथो इत्यथो। अन्नस्य। कीला
लः। उपहूता इत्युपऽहूताः। गृहेषु। नः। क्षेमाय। वः। शांत्यै। प्र। पद्ये। शि
वं। शग्मं। शंयोरिति शंऽयोः। शंयोरिति शंऽयोः॥५१॥ प्रघासिन इति
प्रऽघासिनः। हवामहे। मरुतः। रिशादसः॥ करंभेण। सजोषस इति

॥१०॥

रा

मोदमाणाय वांम

तिसऽजोषसः।।५२।।यत्।ग्रामे।अरण्ये।सभायां।इंद्रिये।एनः।चकृम।वयं।
इदं।तत्।अव।यजामहे।स्वाहा।।५३।।मोइतिमो।सुनः।इंद्र।अत्र।पृत्स्वितिपृत्
ऽसु।देवैः।अस्ति।हि।स्मा।ते।शुष्मिन्।अवया।इत्यवऽयाः।।महः।चित्।य
स्य।मीढुषः।यव्या।हविष्मतः।मरुतः।वंदते।गीः।।५४।।अक्रन्।कर्म।कर्म
कृत इति कर्मऽकृतः।सह।वाचा।मयोभुवेतिमयःऽभुवा।।देवेभ्यः।कर्म।कृ
त्वा।अस्तं।प्र।इत।सचाभुव इति सचाऽभुवः।।५५।।अवभृथेत्यवऽभृथ।
निचुंपुणेतिनिऽचुंपुण।निचेरुरितिनिऽचेरुः।असि।निचुंपुणेतिनिऽचुंपु
ण।अव।देवैः।देवकृतमितिदेवऽकृतं।एनः।अयासिषं।अव।मर्त्यैः।म

व्ण र्वो

॥२०॥ र्त्यैः। स्तता मि [illegible] मर्त्य कृतं। पुरुराण्वइतिपुरु ऽ राण्वः। देव। रिषः। पाहि॥५६॥
पूर्णा। दर्वि। परा। पत। सुपूर्णेतिसु ऽ पूर्णा। पुनः। आ। पत। वस्नेवेतिवस्न ऽ
इव। वि। क्रीणावहे। इषं। ऊर्जं। शतक्रतोइतिश त ऽ क्रतो॥५७॥ देहि। मे। दद
मि। ते। नि। मे। धेहि। नि। ते। दधे॥ निहारमितिनि ऽ हारं। नि। हरामि। ते। निहा
रमितिनि ऽ हारं। नि। हरासि। मे। स्वाहा॥५८॥ अक्षन्। अमीमदंत। हि। अव।
प्रियाः। अधूषत॥ अस्तोषत। स्वभानवइतिस्व ऽ भानवः। विप्राः। नविष्ठ
या। मती। योज। नु। इंद्र। ते। हरीइति हरी।५९॥ सुसंदृशमितिसु ऽ संदृशं। ॥२०॥
त्वा। वयं। मघवन्नितिमघ ऽ वन्। वंदिषीमहि। प्र। नूनं। पूर्णवंधुरइतिपू

र्णऽवंधुरः। स्तुतः। यासि। वशान्। अनु। योज। नु। इंद्र। ते। हरी इतिहरी॥८०॥
मनः। नु। आ। हुवामहे। नाराशंऽसेन। स्तोमेन॥ पितृणां। च। मन्मभिरितिम
न्मऽभिः॥८१॥ आ। नः। एतु। मनः। पुनरितिपुनः। क्रत्वे। दक्षाय। जीवसे॥ ज्यो
क्। च। सूर्य्यं। दृशे॥८२॥ पुनः। नः। पितरः। मनः। ददातु। दैव्यः। जनः॥ जीवं।
व्रातं। सचेमहि॥८३॥ वयं। सोम। व्रते। तव। मनः। तनूषु। बिभ्रतः॥ प्रजावं
तइतिप्रजाऽवंतः। सचेमहि॥८४॥ एषः। ते। रुद्र। भागः। सह। स्वस्रा। अंबि
कया। तं। जुषस्व। स्वाहा॥ एषः। ते। रुद्र। भागः। आखुः। ते। पशुः॥८५॥ अव।
रुद्रं। अदीमहि। अव। देवं। त्र्यंबकमितित्रिऽअंबकं। यथा। नः। वस्यसः। कर

॥२९॥

त्। यथा। नः। श्रेयसः। करत्। यथा। नः। व्यवसाययादिति विऽअवसाययात्॥६६॥
भेषजं। असि। भेषजं। गवे। अश्वाय। पुरुषाय। भेषजं। सुगमितिसुऽगं। मेषाय।
मेष्यै॥६७॥ त्र्यंबकमितित्रिऽअंबकं। यजामहे। सुगंधिमितिसुऽगंधिं। पुष्टिवर्द्धन
मितिपुष्टिऽवर्द्धनं॥ उर्वारुकमिवेत्युर्वारुकंऽइव। बंधनात्। मृत्योः। मुक्षीय। मा।
अमृतात्॥६८॥ त्र्यंबकमितित्रिऽअंबकं। यजामहे। सुगंधिमितिसुऽगंधिं। प
पतिऽ तिवेदनमितिऽवेदनं॥ उर्वारुकमिवेत्युर्वारुकंऽइव। बंधनात्। इतः। मुक्षीय। मा।
अमुतः॥६९॥ एषते। रुद्र। अवसेन। परः। मूजवतइति मूजऽवतः। अति। इहि। ॥२९॥
अवततधन्वेत्यवततऽधन्वा। पिनाकावसइति पिनाकऽअवसः। कृत्तिवासा

इति स्वधितिः वासाः। अहिंऽसनु। नः। शिवः। त्र्यां तः। अति। इहि॥ ७०॥ वाजिनां॥
वाजेः। अवतु। नक्षः। अस्मान्। रेतः। सिक्तं। अमृतं। बलाय। विश्वे। देवाः। अग्नि।
यत्। संबभूवुरिति संऽबभूवुः। तत्। मा। चिनोतु। प्रजयेति प्रऽजया। धनेन॥ ७१॥
वाजी। अहं। वाजिनस्य। उपहूत इत्युपऽहूतः। उपहूतस्येत्युपऽहूतस्य। भक्ष
यामि। वाजैः। वाजी। भूयासं॥ ७२॥ सवित्रा। प्रसूताइति प्रऽसूताः। दैव्यः। आ
पः। उंदंतु। ते। तनूं। दीर्घायुत्वायेति दीर्घायुःऽत्वाय। वर्चसे॥ ७३॥ कश्यपस्य।
त्र्यायुषमिति त्रिऽआयुषं। जमदग्नेरिति जमत्ऽअग्नेः। त्र्यायुषमिति त्रिऽआ
युषं। यत्। देवानां। त्र्यायुषमिति त्रिऽआयुषं। तत्। मे। अस्तु। त्र्यायुषमिति त्रि

॥२॥

आयुषं॥७४॥ येन। धाता। बृहस्पतेः॥ इंद्रस्य। च। आयुषे। अवपत्। तेन। ते। वपा
मि। ब्रह्मणा। जीवातवे। जीवनाय॥७५॥ दीर्घायुत्वायेति दीर्घायुऽत्वाय। बलाय। व
र्चसे। सुप्रजास्त्वायेति सुप्रजाःऽत्वाय। च। असौ। अथो इत्यथो। जीव। शरदः। शतं।
॥७६॥ ॥ इतिपदपाठेसंहितायां तृतीयोध्यायः॥ श्री॥ ॥ हरिः॥ ॐ॥ आ।
इदं। अगन्म। देवयजनमिति देवऽयजनं। पृथिव्याः। यत्र। देवासः। अजुषंत।
विश्वे॥ ऋक्सामाभ्यामित्यृक्ऽसामाभ्यां। संतरंत इति संऽतरंतः। यजुर्भिरि
ति यजुःऽभिः। रायः। पोषेण। सं। इषा। मदेम॥१॥ इमाः। आपः। शं। ऊं इति।
मे। संतु। देवीः। ओषधे। त्रायस्व। स्वधित इति स्वऽधिते। मा। एनं। हिंसीः॥

॥२॥

आपः। अस्मान्। मातरः। शुंधयंतु। घृतेन। नः। घृतप्व इति घृतऽप्वः। पुनंतु॥१॥
विश्वं। हि। रिप्रं। प्रवहंतीति प्रऽवहंति। देवीः। उत्। इत्। आभ्यः। शुचिः। आ।
पूतः। एमि॥ दीक्षा तपसोः। तनूः। असि। तां। त्वा। शिवां। शग्मां। परि। दधे। भद्रं।
वर्णं। पुष्यन्॥३॥ महीनां। पयः। असि। वर्चोदा इति वर्चःऽदाः। असि। वर्चः। मे।
देहि। वृत्रस्य। कनीनका। असि। चक्षुर्दा इति चक्षुःऽदाः। असि। चक्षुः। मे। दे
हि॥४॥ चित्पतिरिति चित्ऽपतिः। मा। पुनातु। वाक्पतिरिति वाक्ऽपतिः। मा। पु
नातु। देवः। मा। सविता। पुनातु। अच्छिद्रेण। पवित्रेण। सूर्यस्य। रश्मिभिरि
ति रश्मिऽभिः। तस्य। ते। पवित्रपत इति पवित्रऽपते। पवित्रपूतस्येति पवित्र

ऋतस्य। यज्ञकाम इति यज्ञःकामः। पुनः। [illegible] नु। त्राकेयं॥५॥ आ। वः। देवासः। ईम
हे। वामं। प्रयतीति प्रःयति। अध्वरे। आ। वः। देवासः। आशिष इत्याःशिषः।
यज्ञियासः। हवामहे॥६॥ स्वाहा। यज्ञं। मनसः। उरोः। अंतरिक्षात्। द्यावापृ
थिवीभ्यां। वातात्। आ। रभे॥७॥ आकूत्या इत्याःकूत्यै। प्रयुज इति प्रःयुजे। अ
ग्नये। स्वाहा। मेधायै। मनसे। दीक्षायै। तपसे। सरस्वत्यै। पूष्णे। अग्नये। स्वा
हा॥ आपः। देवीः। बृहतीः। विश्वशंभुव इति विश्वःशंभुवः। द्यावापृथिवी इ
ति द्यावापृथिवी। उरु। अंतरिक्ष। बृहस्पतये। हविषा। विधेम। स्वाहा॥८॥
विश्वः। देवस्य। नेतुः। मर्तः। वुरीत। सख्यं॥ विश्वः। राये। इषुध्यति। द्युम्नं। वृ

णीत। पुष्यसे। स्वाहा॥ ९॥ ऋक्सामयोरित्यृक्ऽसामयोः। शिल्पे इति शिल्पे।
स्थः। ते इति ते। वां। आ। रभे। ते इति ते। मा। पातं। आ। अस्य। यज्ञस्य। उदृच इ
त्युत्ऽऋचः॥ १०॥ शर्म। असि। शर्म। मे। यच्छ। नमः। ते। अस्तु। मा। मा। हिं
सीः। ऊर्क्। असि। आंगिरसी। ऊर्णम्रदा इत्यूर्णऽम्रदाः। ऊर्जं। मे। यच्छ॥ ११॥ सो
मस्य। नीविः। असि। विष्णोः। शर्म्म। असि। शर्म्म। यजमानस्य। इंद्रस्य। योनिः।
असि। सुसस्या इति सुऽसस्याः। कृषीः। कृधि॥ १२॥ उत्। श्रयस्व। वनस्पते।
ऊर्ध्वः। मा। पाहि। अंहसः। आ। अस्य। यज्ञस्य। उदृच इत्युत्ऽऋचः॥ १३॥ व्र
तं। कृणुत। व्रतं। कृणुत। अग्निः। ब्रह्म। अग्निः। यज्ञः। वनस्पतिः। यज्ञियः॥ १४॥

॥म२४॥ देवीं। धियं। मनामहे। सुमृळीकामिति सुऽमृळीकां। अभिष्टये। वर्चोदामिति
वर्चःऽदां। विश्वधायसमिति विश्वऽधायसं। सुतीर्थेति सुऽतीर्था। नः। असत्।
वशे॥१५॥ ये। देवाः। मनोजाता इति मनःऽजाताः। मनोयुज इति मनःऽयुजः।
दक्षऋतव इति दक्षऽऋतवः। ते। नः। अवंतु। ते। नः। पांतु। तेभ्यः। स्वाहा॥१६॥
स्वात्राः। पीताः। भवत। यूयं। आपः। अस्माकं। अंतः। उदरे। सुशेवा इति सुऽ
शेवाः। ताः। अस्मभ्यं। अयक्ष्माः। अनमीवाः। अनागसः। स्वदंतु। देवीः। अ
मृताः। ऋतावृधः। ऋतवृध इत्यृतऽवृधः॥१७॥ इयं। ते। यज्ञिया। तनूः। ॥म२४॥
अपः। मुंचामि। न। प्रजामिति प्रऽजां। अंहोमुच इत्यंहःऽमुचः। स्वाहा। कृ

ताऽइति स्वाहाऽकृताः । पृथिवीं । आ । विशत । पृथिव्याः । सं । भव । १८ । अग्ने । त्वं ।
सु । जागृहि । वयं । सु । मंदिषीमहि । रक्षा । नः । अप्रयुछन्नित्यप्रऽयुछन् ।
प्रबुधइति प्रऽबुधे । नः । पुनरिति पुनः । कृधि । १९ । पुनः । मनः । पुनः । आयुः ।
मे । आ । अगात् । पुनरिति पुनः । चक्षुः । पुनरिति पुनः । श्रोत्रं । मे । आ । अगात् ।
पुनरिति पुनः । प्राणः । पुनः । आत्मा । मे । आ । अगात् । वैश्वानरः । अदब्धः । त
नूपाइति तनूऽपाः । अग्निः । मा । पातु । दुरितादिति दुःऽइतात् । अवद्यात् । २० ॥
त्वं । अग्ने । व्रतपाइति व्रतऽपाः । असि । देवः । आ । मर्त्येषु । आ । त्वं । यज्ञेषु । ई
ड्यः । २१ ॥ रास्व । इयत् । सोम । आ । भूयः । भर । देवः । नः । सविता । वसोः । दा

॥२५॥

ता। वसु। अदात्। ॥२३॥ एषा। ते। शुक्र। तनूः। एतत्। वर्चः। तया। सं। भव। भ्राजं।
गच्छ। जूः। असि। धृता। मनसा। जुष्टा। विष्णवे। ॥२४॥ तस्याः। ते। सत्यसव
स इति सत्यऽसवसः। प्रसव इति प्रऽसवे। तनुवा। यंत्रं। अशीय। स्वाहा। चं
द्रं। असि। शुक्रं। अमृतं। वैश्वदेवमिति वैश्वऽदेवं। ॥२५॥ चित्। मना। धीः।
दक्षिणा। क्षत्रियां। यज्ञिया। अदितिः। उभयतःऽशीर्ष्णी शीर्ष्णीत्युभयतःऽशी
र्ष्णी। सा। नः। सुप्राचीति सुऽप्राची। सुप्रतीचीति सुऽप्रतीची। भव। ॥२६॥
मित्रः। त्वा। पदि। बध्नीतां। पूषा। अध्वनः। पातु। इंद्राय। अध्यक्षायेत्य
धिऽअक्षाय। अनु। त्वा। माता। मन्यतां। पिता। भ्राता। सगर्भ्य इति सऽगर्भ्यः।

॥२५॥

सखा। सखेष्व्य इति सः ऽ खेष्व्यः॥२६॥ स्या। देवि। देवं। अच्छ। इहि। इंद्राय। सोमं।
रुद्रः। त्वा। आ। वर्त्तयतु। स्वस्ति। सोमसखेति सोमः ऽ सखा। पुनः। आ। इहि।
॥२७॥ वस्वी। असि। अदितिः। आदित्या। रुद्रा। चंद्रा। बृहस्पतिः। त्वा। सुम्ने। र
म्णातु। रुद्रः। वसुभिरिति वसुऽभिः। आ। चके।॥२८॥ अदित्याः। त्वा। मूर्धन्। आ।
जिघर्मि। देवयजन इति देवऽयजने। पृथिव्याः। इळायाः। पदं। असि। घृत
वदिति घृतःऽवत्। स्वाहा॥२९॥ अस्मे इत्यस्मे। रमस्व। अस्मे इत्यस्मे। ते। बंधुः। त्वे
इति त्वे। रायः। अस्मे इत्यस्मे। रायः॥३०॥ मा। वयं। रायः। पोषेण। यौष्म। तोतः। । वि।
रायः। सं। अख्य। देव्या। धिया। सं। दक्षिणया। उरुचक्षसेत्युरुऽचक्षसा। मा।

मे। आयुः। प्रा। मोषीः। मो इति मो। अहं। तव। वीरान्। विदेय। तव। देवि। संदृशी
तिसंदृशि।।२०।।एषः। ते। गायत्रः। भागः। इति। मे। सोमाय। ब्रूतात्। त्रैष्टुभः।
त्रैस्तुभ इति त्रैस्तुभः। जागतः। छंदोमानानामिति छंदः ऽमानानां। साम्राज्य
मिति सां ऽराज्यं। गच्छतात्। इति। मे। सोमाय। ब्रूतात्।।२१।।आस्माकः। असि।
शुक्रः। ते। ग्रह्यः। विचित इति वि ऽचितः। त्वां। वि। चिन्वंतु।।२२।।अभि। त्यं। देवं।
सवितारं। ओण्योः। कविक्रतुमिति कवि ऽक्रतुं। अर्चामि। सत्यसवमिति सत्य ऽ
सवं। रत्नधामिति रत्न ऽधां। अभि। प्रियं। मतिं। कविं।। ऊर्ध्वा। यस्य। अमतिः। भाः।
अदिद्युतत्। सवीमनि। हिरण्यपाणिरिति हिरण्य ऽपाणिः। अमिमीत। सुक्र

तुरितिसुऽक्रतुः। रूपा। स्वरितिस्वंः॥२३॥ प्रजाभ्यइतिप्रऽजाभ्यः। त्वा। प्रजाइ
तिप्रऽजाः। त्वा। अनुप्राणंत्वित्यनुऽप्राणंतु। प्रजाइतिप्रऽजाः। त्वं। अनुप्राणिहि
त्यनुऽप्राणिहि॥२४॥ चंद्रं। त्वा। चंद्रेण। क्रीणामि। शुक्रं। शुक्रेण। अमृतं। अमृ
तेन। सग्मे। ते। गोः। अस्मेइत्यस्मे। ते। चंद्राणि॥२५॥ तपसः। तनूः। असि। प्रजा
पतेरितिप्रजाऽपतेः। वर्णः। परमेण। पशुना। क्रीयसे। सहस्रपोषमितिसह
स्रऽपोषं। पुषेयं॥२६॥ मित्रः। नः। आ। इहि। सुमित्रधइतिसुऽमित्रधाः। इंद्रस्य।
उरुं। आ। विश। दक्षिणं। उशन्। उशंतं। स्योनः। स्योनं॥२७॥ स्वान। भ्राज। अंघा
रे। बंभारे। हस्त। सुहस्तेतिसुऽहस्त। कृशानो इति कृशानो। एते। वः। सोमक्र

यणा इति सोम ऽ क्रयणाः । तान् । रक्षध्वं । मा । वः । दभन् ॥ २७ ॥ परि । मा । अग्ने । दुश्च
रितादिति दुः ऽ चरितात् । बाधस्व । आ । मा । सुचरित इति सु ऽ चरिते । भज । उत् ।
आयुषा । स्वायुषेति सु ऽ आयुषा । उत् । अस्थां । अमृतान् । अनु ॥ २८ ॥ प्रति । पं
थां । अपद्महि । स्वस्तिगामिति स्वस्ति ऽ गां । अनेहसं । येन । विश्वाः । परि । द्विषः ।
वृणक्ति । विंदते । वसु ॥ २९ ॥ अदित्याः । त्वक् । असि । अदित्यै । सदः । आ । सीद । अ
स्तभ्नात् । द्यां । ऋषभः । अंतरिक्षं । अमिमीत । वरिमाणं । पृथिव्याः । आ । असी
दत् । विश्वा । भुवनानि । सम्राळिति सं ऽ राट् । विश्वा । इत् । तानि । वरुणस्य । व्रता
नि ॥ ३० ॥ वनेषु । वि । अंतरिक्षं । ततान । वाजं । अर्वत्स्वित्यर्वत् ऽ सु । पयः । उस्रिया

सु। हृत्स्विति हृत्ऽसु। क्रतुं। वरुणः। विक्षु। अग्निं। दिवि। सूर्यं। अदधात्। सोमं। अ
द्रौ॥३१॥ सूर्यस्य। चक्षुः। आ। रोह। अग्नेः। अक्ष्णः। कनीनकं। यत्र। एतशेभिः।
ईयसे। भ्राजमानः। विपश्चितेति विपःऽचिता॥३२॥ उस्रौ। आ। इतं। धूर्षाहा इ
ति धूःऽषाहौ। युज्येथां। अनश्रू इत्यनश्रू। अवीरहणौ। अवीरहनाइत्यवीरऽह
नौ। ब्रह्मचोदना इति ब्रह्मऽचोदनौ। स्वस्ति। यजमानस्य। गृहान्। गच्छतं॥३३॥
भद्रः। मे। असि। प्रच्यवस्व। भुवः। पते। विश्वानि। अभि। धामानि। मा। त्वा। प
रिपरिण इति परिऽपरिणः। परिपंथिन इति परिऽपंथिनः। वृकाः। अघायवः।
अघयवय इत्यघऽयवः। विदन्। श्येनः। भूत्वा। परा। पत। यजमानस्य। गृहा

॥२८॥

न् । गच्छ । तत् । नौ । सम्ऽस्कृतं ॥ ३४ ॥ नमः । मित्रस्य । वरुणस्य । चक्षसे । महे । देवा
य । तत् । ऋतं । सपर्यत ॥ दूरेदृश इति दूरेऽदृशे । देवजातायेति देवऽजाताय । केत
वे । दिवः । पुत्राय । सूर्याय । शंसत ॥ ३५ ॥ वरुणस्य । उत्तंभनं । असि । स्कंभसर्ज
नी इति स्कंभऽसर्जनी । स्थः । ऋतसदनीत्यृतऽसदनी । ऋतसदनमित्यृतऽस
दनं । ऋतसदनीत्यृतऽसदनीं । आ । सीद ॥ ३६ ॥ या । ते । धामानि । हविषा । य
जंति । ता । ते । विश्वा । परिभूरिति परिऽभूः । अस्तु । यज्ञं ॥ गयस्फान इति गयऽ
स्फानः । प्रतरण इति प्रऽतरणः । सुवीर इति सुऽवीरः । अवीरहेत्यवीरऽहा ॥ प्र ।
चर । सोम । दुर्यान् ॥ ३७ ॥ ७ ॥ इति पदपाठे संहितायां चतुर्थोध्यायः ॥ ४ ॥ श्री ॥

॥२८॥

॥ हरिः ॥ ॐ ॥ अग्नेः । तनूः । असि । विष्णवे । त्वा । सोमस्य । अतिथेः । आति
थ्यं । श्येनाय । सोमभृत इति सोमऽभृते । अग्नये । रायस्पोषद इति रायस्पो
षऽदे । विष्णवे । त्वा ॥ १ ॥ अग्नेः । जनित्रं । असि । वृषणौ । स्थः । उर्वशी । आयुः ।
पुरूरवाः । असि । गायत्रेण । त्वा । छंदसा । मंथामि । त्रैष्टुभेन । त्रैष्टुभेनेति त्रै
ष्टुभेन । जागतेन । त्वा । छंदसा । मंथामि ॥ २ ॥ भवतं । नः । समनसा इति सऽम
नसौ । सचेतसा इति सऽचेतसौ । अरेपसौ ॥ मा । यज्ञं । हिंसिष्टं । मा । यज्ञ
पतिमिति यज्ञऽपतिं । जातवेदसा इति जातऽवेदसौ । शिवौ । भवतं । अ
द्य । नः ॥ ३ ॥ अग्नौ । अग्निः । चरति । प्रविष्ट इति प्रऽविष्टः । ऋषीणां । पुत्रः । अ

भिशस्तिपावेत्यभिशस्तिऽपावा॥ सः। नः। स्योनः। सुयजेति सुऽयजा। यज। इ
ह। देवेभ्यः। हव्यं। सदं। अप्रयुच्छन्नित्यप्रऽयुच्छन्। स्वाहा॥ ७॥ आपतय इत्याऽ
पतये। त्वा। गृह्णामि। परिपतय इति परिऽपतये। तनूनप्त्र इति तनूऽनप्त्रे। शा
क्वराय। त्वा। शक्मन्। ओजिष्ठाय॥ ८॥ अनाधृष्टं। असि। अनाधृष्यं। देवानां। ओ
जः। अनभिशस्तीत्यनभिऽशस्ति। अभिशस्तिपा इत्यभिशस्तिऽपाः। अनभि
शस्तेन्यमित्यनभिऽशस्तेन्यं॥ ९॥ अञ्जसा। सत्यं। उप। गेषं। सुविते। मा। धाः।
अग्ने। व्रतपा इति व्रतऽपाः। त्वे इति त्वे। व्रतपा इति व्रतऽपाः॥ ७॥ या। तव। तनूः।
इयं। सा। मयि। या। मम। तनूः। एषा। सा। त्वयि। सह। नौ। व्रतपत इति व्रतऽपते।

व्रतानि।अनु।मे।दीक्षां।दीक्षापतिरिति दीक्षाऽपतिः।मन्यतां।अनु।तपः।
तपस्पतिः।तपःपतिरिति तपःऽपतिः॥८॥ अंशुरंशुरित्यंशुःऽअं
शुः।ते।देव।सोम।आ।प्यायतां।इंद्राय।एकधनविद इत्येकऽधनऽविदे।आ।
तुभ्यं।इंद्रः।प्यायतां।आ।त्वं।इंद्राय।प्यायस्व॥१॥ आ।प्यायय।अस्मान्।स
खीन्।सन्या।मेधया।स्वस्ति।ते।देव।सोम।सुत्यां।उदृचमित्युत्ऽऋचं।अ
शीय॥१०॥ एष्टा इत्याऽइष्टाः।रायः।प्र।इषे।भगाय।ऋतं।ऋतवादिभ्य इत्यृ
तवादिऽभ्यः।नमः।दिवे।नमः।पृथिव्यै॥१३॥ या।ते।अग्ने।अयःशयेत्ययःऽश
या।तनूः।वर्षिष्ठा।गह्वरेष्ठा।गह्वरेष्ठेति गह्वरेऽस्था।उग्रं।वचः।अप।अ

वधीत्। त्वेषं। वचः। अप। अवधीत्। स्वाहा। रजःशायेति रजः। शाया। हरीशा
या। हरिशायेति हरि ऽ शाय। १२। तप्तायनीति तप्त ऽ अयनी। मे। असि। वित्ता
यनीति वित्त ऽ अयनी। मे। असि। अवतात्। मा। व्यथितं। अवतात्। मा। नाथि
तं। १३। विदेः। अग्नेः। नभः। नाम। अग्ने। अंगिरः। आयुना। नाम्ना। आ। इ
हि। यः। अस्यां। पृथिव्यां। असि। यत्। ते। अनाधृष्टं। नाम। यज्ञियं। तेन।
त्वा। आ। दधे। द्वितीयस्यां। तृतीयस्यां। अनु। त्वा। देववीतय इति देव ऽ वीत
ये। सिंही। असि। सपत्नसाही। सपत्नसहीति सपत्न ऽ सही। देवेभ्यः। क
ल्पस्व। शुंधस्व। शुंभस्व। १४। इंद्रघोष इतींद्र ऽ घोषः। त्वा। वसुभिरिति

वसुऽभिः। पुरस्तात्। पातु। प्रचेता इति प्रऽचेताः। रुद्रैः। पश्चात्। मनोजवा इ
ति मनःऽजवाः। पितृभिरिति पितृऽभिः। दक्षिणतः। विश्वकर्मेति विश्वऽकर्मा।
आदित्यैः। उत्तरतः। पातु॥१५॥ इदं। अहं। तप्तं। वाः। बर्हिर्द्धेति बर्हिःऽधाः।
यज्ञात्। निः। सृजामि। सिंही। असि। स्वाहा। आदित्यवनिरित्यादित्यऽव
निः॥१६॥ ब्रह्मवनिरिति ब्रह्मऽवनिः। क्षत्रवनिरिति क्षत्रऽवनिः। सुप्र
जावनिरिति सुप्रजाऽवनिः। रायस्पोषवनिरिति रायस्पोषऽवनिः। आ।व
ह। देवान्। यजमानाय। स्वाहा। भूतेभ्यः। त्वा॥१७॥ ध्रुवः। असि। पृथिवीं
दृंह। ध्रुवक्षिदिति ध्रुवऽक्षित्। अंतरिक्षं। [illegible]च्युतक्षिदित्यच्युतऽक्षित्।

२दृहृतः

।।रु५।। बं।हृदू।हः।अग्नेः।भस्म।असि।अग्नेः।पुरीषं।असि।।१८।।युंजते।मनः।उत।
युंजते।धियः।विप्राः।विप्रस्य।विपश्चितइतिविपःऽचितः।वि।होत्राः।दधे।
वयुना।वित्।वयुनविदितिवयुनऽवित्।एकः।इत्।मही।देवस्य।सवितुः।परि
स्तुतिः।परि।स्तुतिरितिपरिऽस्तुतिः।।१९।।इदं।विष्णुः।वि।चक्रमे।त्रेधा।नि।
दधे।पदं।।समूढमितिसंऽऊढं।अस्य।पांसुरे।स्वाहा।।२०।।इरावती
इतीराऽवती।धेनुमतीइतिधेनुऽमती।हि।भूतं।सूयवसिनी।सुयवसिनी
इतिसुऽयवसिनी।मनवे।दशस्या।वि।अस्कभ्नाः।रोदसीइतिरोदसी।विष्णो ।।रु५।।
इतिविष्णो।एतेइत्येते।दाधर्थ।पृथिवीं।अभितः।मयूखैः।स्वाहा।।२१।।देव

श्रुताइति देवऽश्रुतौ । देवेषु । आ । घोषतं । प्राचीइति प्राची । प्र । इतं । अध्वरं । कु
ल्पयं।ती इति कल्पयंती । ऊर्ध्वं । यज्ञं । नयतं । मा । जिह्वरतं ॥२२॥ स्वं । गोष्ठं ।
गोस्थमिति गोऽस्थं । आ । वदतं । देवीइति देवी । दुर्येइति दुर्ये । आयुः । मा । निः ।
वादिष्टं । प्रजामिति प्रऽजां । मा । निः । वादिष्टं । अत्र । रमेथां । वर्ष्मन् । पृथिव्याः ॥२३॥
विष्णोः । नु । कं । वीर्याणि । प्र । वोचं । यः । पार्थिवानि । विममइति विऽममे । रजांऽ
सि ॥ यः । अस्कभायत् । उत्तरमित्युत्ऽतरं । सधस्थमिति सधऽस्थं । विचक्रमा
णइति ~~विं~~ विऽचक्रमाणः । त्रेधा । उरुगाय इत्युरुऽगायः । विष्णवे । त्वा ॥२४॥ दि
वः । वा । विष्णोइति विष्णो । उत । वा । पृथिव्याः । महः । वा । विष्णोइति विष्णो । उ

।।२२।।

रोः।अंतरिक्षात्।उभा।हि।हस्ता।वसुना।पृणस्व।आ।प्र।यछ।दक्षिणात्।आ।
उत।सव्यात्।विष्णवे।त्वा।।२५।।प्र।तत्।विष्णुः।स्तवते।वीर्येण।मृगः।न।भीमः।
कुचरः।गिरिष्ठाः।गिरिस्था इति गिरि ऽ स्थाः।।यस्य।उरुषु।त्रिषु।विक्रमणेष्वि
ति वि ऽ क्रमणेषु।अधिक्षियंतीत्यधि ऽ क्षियंति।भुवनानि।विश्वा।।२६।।विष्णोः।
रराटं।असि।श्नप्त्रे इति श्नप्त्रे।स्थः।स्यूः।ध्रुवः।वैष्णवं।असि।विष्णवे।त्वा।।२७।
आ।ददे।नारी।असि।इदं।अहं।रक्षसाँ।ग्रीवाः।अपि।कृंतामि।बृहन्।असि।
असि।बृहद्रवा इति बृहत् ऽ रवाः।बृहतीं।इंद्राय।वाचं।वद।रक्षोहणं।रक्षो
हनमिति रक्षः ऽ हनं।वलगहनमिति वलग ऽ हनं।वैष्णवीं।।२७।।इदं।अहं।

स:५

।।३२।।

तं। वलगं। उत्। वपामि। यं। नः। निष्ट्यः। यं। अमास्यः। निचखानेति निऽचखान।
समानः। असमानः। सबंधुरिति सऽबंधुः। असबंधु[illegible]यसंऽबंधुः। सजात
इति सऽजातः। असजातः। उत्। कृत्यां। किरामि।।२८।। स्वराळिति स्वऽराट्। अ
सि। सपत्नहेति सपत्नऽहा। सत्रराळिति सत्रऽराट्। अभिमातिहेत्यभिमातिऽ
हा। जनराळिति जनऽराट्। रक्षोहेति रक्षःऽहा। सर्वराळिति सर्वऽराट्। अ
मित्रहेत्यमित्रऽहा।।२९।। रक्षोहणः। रक्षोहन इति रक्षःऽहनः। वलगहन इति
वलगऽहनः। प्र। उक्षामि। वैष्णवान्। अव। नयामि। अव। स्तृणामि। वैष्णवान्।
।।३०।। रक्षोहणौ। रक्षोहनाविति रक्षःऽहनौ। वलगहनाविति वलगऽहनौ। उप।

॥हरिः॥

दधामि। वैष्णवीइतिवैष्णवी। परि। ऊहामि। वैष्णवीइतिवैष्णवी। वैष्णवं। असि।
वैष्णवाः। स्थ॥२५॥ यवः। असि। यवय। अस्मत्। द्वेषः। यवय। अरातीः। दिवे। अं
तरिक्षाय। पृथिव्यै। त्वा॥२६॥ शुंधंतां। लोकाः। पितृषदनाः। पितृसदनाइतिपि
तृऽसदनाः। पितृषदनं। पितृसदनमितिपितृऽसदनं। असि। उत्। दिवं। स्तभा
न। आ। अंतरिक्षं। पृण। दृंहस्व। पृथिव्यां॥२७॥ द्युतानः। त्वा। मारुतः। मिनोतु।
मित्रावरुणौ। ध्रुवेण। धर्मणा। ब्रह्मवनीतिब्रह्मऽवनि। त्वा। क्षत्रवनीतिक्षत्र
ऽवनि। रायस्पोषवनीतिरायस्पोषऽवनि। परि। ऊहामि॥२८॥ ब्रह्म। दृंह। क्ष
त्रं। आयुः। प्रजामितिप्रऽजां। दृंह। ध्रुवा। असि। ध्रुवः। अस्मिन्। यजमानः।

॥हरिः॥

आयतनऽइडस्पाऽपतेने। भूयात्। घृतेन। द्यावापृथिवी इति द्यावापृथिवी। पूर्व्येषां॥
इंद्रस्य। छदिः। असि। विश्वजनस्येति विश्वऽजनस्य। छाया॥ २५॥ परि। त्वा। गि
र्वणः। गिरः। इमाः। भवंतु। विश्वतः॥ वृद्धायुमिति वृद्धऽआयुं। अनु। वृद्धयः।
जुष्टाः। भवंतु। जुष्टयः॥ २६॥ इंद्रस्य। स्यूः। ध्रुवः। ऐंद्रं। वैश्वदेवमिति वैश्वऽदे
वं। असि॥ २७॥ विभूरिति विऽभूः। असि। प्रवाहणः। प्रवाहन इति प्रऽवाहनः।
वह्निः। हव्यवाहन इति हव्यऽवाहनः। श्वात्रः। प्रचेता इति प्रऽचेताः। तुथः। वि
श्ववेदा इति विश्वऽवेदाः॥ २८॥ उशीक्। कविः। अंघारिः। बंभारिः। अवस्यूः।
दुवस्वान्। शुंध्यूः। मार्जालीयः॥ २९॥ ऋतधामेत्यृतऽधाम। स्वर्ज्योतिरिति स्वः

॥श्री

ज्योतिः। समुद्रः। विश्वव्यचा इति विश्वऽव्यचाः। अजः। एकपादित्येकऽपात्। अहिः।
बुध्न्यः॥४०॥ संम्राळिति संऽम्राराट्। कृशानुः। परिषद्यः। परिसद्य इति परिऽस
द्यः। पवमानः। नभः। प्रतक्वेति प्रऽतक्वा। मृष्टः। हव्यसूदन इति हव्यऽसूदनः।
॥४१॥ समृत्स्व इति संऽद्रुत्सः। विश्ववेदा इति विश्वऽवेदाः। ऊनातिरिक्तस्येत्यू
नऽअतिरिक्तस्य। प्रतिष्ठा। प्रतिस्थेति प्रऽतिस्था। अग्नयः। सगराः। स्थ। सग
रेण। नाम्ना। रौद्रेण। अनीकेन। पात। मा। अग्नयः। पिपृत। मा। अग्नयः। नमः।
वः। अस्तु। मा। मा। हिंसिष्ट॥४२॥ ज्योतिः। असि। विश्वरूपमिति विश्वऽरू
पं। विश्वेषां। देवानां। समिदिति संऽइत्। त्वं। सोम। तनूकृद्भ्य इति तनूकृत्ऽ

सगराः।

॥२४॥

न्यैः। द्वेषोभ्य इति द्वेषःऽभ्यः। अन्यकृतेभ्य इत्यन्यऽकृतेभ्यः॥ उरु। यंता। असि। व
रूथं। स्वाहा॥ जुषाणः। अप्तुः। आज्यस्य। वेतु। स्वाहा॥ ४३॥ अग्ने। नय। सुपथे
ति सुऽपथा। राये। अस्मान्। विश्वानि। देव। वयुनानि। विद्वान्॥ युयोधि। अस्म
त्। जुहुराणं। एनः। भूयिष्ठां। ते। नमउक्तिमिति नमःऽउक्तिं। विधेम॥ ४४॥ अयं।
नः। अग्निः। वरिवः। कृणोतु। अयं। मृधः। पुरः। एतु। प्रभिंदन्निति प्रऽभिंदन्॥
अयं। वाजान्। जयतु। वाजसाता इति वाजऽसातौ। अयं। शत्रून्। जयतु। जर्हृ
षाणः। स्वाहा॥ ४५॥ देव। सवितः। एषः। ते। सोमः। तं। रक्षस्व। मा। त्वा। दभन्॥
एतत्। त्वं। देव। सोम। देवः। देवान्। उप। अगाः॥ ४६॥ इदं। अहं। मनुष्यान्। स

ऋ९५॥

हारायः । पोषेण । स्वाहा ॥ निः । वरुणस्य । पाशात् । मुच्ये ॥ अग्ने । व्रतपा इति व्रतऽ
पाः । त्वे इति त्वे । व्रतपा इति व्रतऽपाः ॥४७॥ या । तव । तनूः । मयि । अभूत् । एषा । सा ।
त्वयि । या । मम । तनूः । त्वयि । अभूत् । इयं । सा । मयि । यथायथमिति यथाऽयथं ।
नौ । व्रतपत इति व्रतऽपते । व्रतानि । अनु । मे । दीक्षां । दीक्षापतिरिति दीक्षाऽपतिः ।
अमंस्त । अनु । तपः । तपस्पतिः । तपःपतिरिति तपःऽपतिः ॥४८॥ अति । अन्या
न् । अगां । न । अन्यान् । उप । अगां । अर्वाक् । त्वा । परेभ्यः । परः । अवरेभ्यः ॥४९॥ तं ।
त्वा । जुषामहे । देव । वनस्पते । देवयज्याया इति देवऽयज्यायै । देवाः । त्वा । देवयज्याया
इति देवऽयज्यायै । जुषंतां । विष्णवे । त्वा ॥५०॥ ओषधे । त्रायस्व । स्वधित इति स्वऽ ॥ऋ९५॥

घिते। मा। एनं। हिꣳसीः॥ दिवं। मा। लेखीः। अंतरिक्षं। मा। हिꣳसीः। पृथिव्या। सं।
भव॥ पर॥ अयं। हि। त्वा। स्वधितिरिति स्वऽधितिः। तेतिजानः। प्रणिनाय। प्रनि
नायेति प्रऽनिनाय। महते। सौभगाय॥ अतः। त्वं। देव। वनस्पते। शतवल्श इ
ति शतऽवल्शः। वि। रोह। सहस्रवल्शा इति सहस्रऽवल्शाः। वि। वयं। रुहेम॥४३॥
इति पदपाठे संहितायां पंचमोऽध्यायः॥ ॥ श्री॥ हरिः॥ ॐम्॥ देवस्य। त्वा। अग्रे
णीः। अग्रेनीरित्यग्रेऽनीः। असि। स्वावेश इति सुऽआवेशः। उन्नेतॄणामित्युत्ऽने
तॄणां। एतस्य। वित्तात्। अधि। त्वा। स्थास्यति। देवः। त्वा। सविता। मध्वा। अनक्तु।
सुपिप्पलाभ्य इति सुऽपिप्पलाभ्यः। त्वा। ओषधीभ्यः॥ दिवं। अग्रेण। अस्पृक्षः। आ।

अंतरिक्षं। मध्येन। अग्नाः। पृथिवीं। उपरेण। अदृंहीः॥३॥ या। ते। धामानि।
उश्मसि। गमध्यै। यत्र। गावः। भूरिशृंगा इति भूरिऽशृंगाः। अयासः। अत्र। अ-
ह। एतत्। उरुगायस्येत्युरुऽगायस्य। परमं। पदं। अव। भाति। भूरि॥६॥ विष्णोः॥
कर्माणि। पश्यत॥ यतः। व्रतानि। पस्पशे॥ इंद्रस्य। युज्यः। सखा॥७॥ तत्।
विष्णोः। परमं। पदं। सदा। पश्यंति। सूरयः॥ दिवीवेति दिविऽइव। चक्षुः। आऽत-
तमित्याऽततं॥८॥ परिवीरिति परिऽवीः। असि। परि। त्वा। देवीः। विशः। व्ययंतां।
परि। इमं। यजमानं। रायः। मनुष्याणां॥ दिवः। सूनुः। असि। एषः। ते। पृथिव्यां।
लोकः। आरण्यः। ते। पशुः॥५॥ उपवीरित्युपऽअवीः। असि। उप। देवान्। दे-

वीः। विप्राः। प्र। अग्रुः। उशिजः। वन्हितमानितिवन्हिऽतमान्। देवा। त्वष्टः। वसु।
रण्व। हव्या। ते। स्वदंतां॥६॥ रेवतीः। रमध्वं। बृहस्पते। धारय। वसूनि। ऋत
स्य। त्वा। देवहविरितिदेवऽहविः। पाशेन। प्रति। मुंचामि। धर्षा। मानुषः॥७॥
अग्नीषोमाभ्यां। जुष्टं। नि। युनज्मि। अद्भ्यइत्यत्ऽभ्यः। त्वा। ओषधीभ्यः। प्र। उक्षामि।
॥८॥ अपां। पेरुः। असि। आपः। देवीः। स्वदंतु। स्वात्तं। चित्। सत्। देवहविरिति
देवऽहविः॥९॥ सं। ते। प्राणः। वातेन। गच्छतां। सं। अंगानि। यजत्रैः। सं। यज
मानः। आशिषेत्याऽशिषा॥१०॥ घृतेन। अक्तौ। पशुं। त्रायेथां। रेवति। यज
माने। प्रियं। धाः। आ। विश॥११॥ उरोः। अंतरिक्षात्। सजूरितिसऽजूः। दे

वेधे।वातेन।अस्य।हविषः।त्मना।यज।सं।अस्य।तन्वा।भव॥१२॥वर्षो इति
वर्षो।वर्षीयसि।यज्ञे।यज्ञपतिमिति यज्ञऽपतिं।धाः।स्वाहा।देवेभ्यः।देवेभ्यः।
स्वाहा।मा।अहिः।भूः।मा।पृदाकुः॥१३॥नमः।आ।तानेत्याऽतान।अनर्वा।प्र ते।
इहि।घृतस्य।कुल्याः।उप।ऋतस्य।पथ्याः।उप॥१४॥देवीः।आपः।शुद्धाः।
वोढ्वं।सुपरिविष्टा इतिसुऽपरिविष्टाः।देवेषु।सुपरिविष्टा इतिसुऽपरिविष्टाः।
वयं।परिवेष्टार इति परिऽवेष्टारः।भूयास्म॥१५॥वाचं।ते।शुंधामि।प्राणं।चक्षुः।
श्रोत्रं।नाभिं।मेढ्रं।पायुं।चरित्रान्।ते।शुंधामि॥१६॥मनः।ते।आ।प्यायतां।वाक्।
प्राणः।चक्षुः।श्रोत्रं।यत्।ते।क्रूरं।यत्।आस्थितमित्याऽस्थितं।तत्।ते।आ।

प्यायतां। निः। स्त्यायतां। शुध्यतु। त्वं। अहोभ्य इत्यहःऽभ्यः।१७। ओषधे।
त्रायस्व। स्वधिते इति स्वऽधिते। मा। एनं। हिंसीः। रक्षसां। भागः। असि।
निरस्तमिति निःऽअस्तं। रक्षः।१८।। इदं। अहं। रक्षः। अभि। तिष्ठामि। अ
व। बाधे। अधमं। तमः। नयामि।।१९।। घृतेन। द्यावापृथिवी इति द्यावापृथि
वी। प्र। ऊर्णुवाथां। वायो इति वायो। वेः। स्तोकानां। जुषाणः। अग्निः। आऽ
स्य। वेतु। स्वाहा। स्वाहाकृते इति स्वाहाऽकृते। ऊर्ध्वनभसमित्यूर्ध्वऽनभसं।
मारुतं। गच्छतं।।२०।। सं। ते। मनः। मनसा। सं। प्राणः। प्राणेन। गच्छतां। रेट्। अ
सि। अग्निः। त्वा। श्रीणातु। आपः। त्वा। सं। अरिणन्।।२१।। वातस्य। त्वा। ध्राज्यै।

॥१८॥

नूस्मः। रक्षः स्तौ। ऊष्मणः। व्यथिषत्। प्रयुतमिति प्रऽयुतं। द्वेषः। घृतं। घृतपा
वान इति घृतऽपावानः। पिबत। वसां। वसापावान इति वसाऽपावानः। पिब
त। अंतरिक्षस्य। हविः। असि। स्वाहा॥१९॥ दिशः। प्रदिश इति प्रऽदिशः। आ
दिश इत्याऽदिशः। विदिश इति विऽदिशः। उद्दिश इत्युत्ऽदिशः। दिग्भ्य इति
दिक्ऽभ्यः। स्वाहा। ऐंद्रः। प्राणः। अंगेअंग इत्यंगेऽअंगे। निधीत इति निऽधी
तः। ऐंद्रः। उदान इत्युत्ऽआनः। अंगेअंग इत्यंगेऽअंगे। नि। दीध्ये॥२०॥ देव। त्व
ष्टः। भूरि। ते। समंसमिति संऽसं। एतु। सलक्ष्मेति सऽलक्ष्मा। यत्। विषुरूप
मिति विषुऽरूपं। भवाति। देवत्रेति देवऽत्रा। यंतं। अवसे। सखायः। अनु। त्वा।

॥१८॥

माता। पितरः। सं। दुतु॥२०॥ समुद्रं। गच्छ। स्वाहा। देवं। सवितारं। अंतरिक्षं।
मित्रावरुणौ। अहोरात्रे इत्यहोरात्रे। छंदांसि। द्यावापृथिवी इति द्यावापृ
थिवी। सोमं। यज्ञं। नभः। दिव्यं। अग्निं। वैश्वानरं। मनः। मे। हार्दि। यच्छ॥२१॥
दिवं। ते। धूमः। गच्छतु। अंतरिक्षं। ज्योतिः। पृथिवीं। भस्मना। आ। पृण। स्वाहा।
॥२२॥ मा। अपः। मा। ओषधीः। हिंसीः। धाम्नोधाम्न इति धाम्नःऽधाम्नः। रा
जन्। ततः। वरुण। नः। मुंच। यत्। आहुः। अघ्न्याः। इति। वरुण। इति। शपामहे।
ततः। वरुण। नः। मुंच॥२३॥ सुमित्रिया इति सुऽमित्रियाः। नः। आपः। ओषध
यः। संतु। दुर्मित्रिया इति दुःऽमित्रियाः। तस्मै। संतु। यः। अस्मान्। द्वेष्टि।

।देवः।अध्वरः।इति।मोनू।अ

।मं।९।।

चा।वयं।द्विष्मः।।१८।।इदं।आपः।प्र।वहत।यत्।किं।च।दुरितम्।मयि।तदु।रतम

यि।।यत्।वा।अहं।अभिदुद्रोहेत्यभि।दुद्रोह।यत्।वा।शेपे।उत।अनृते

म्।।१९।।हविष्मतीः।इमाः।आपः।हविष्मान्।आ।विवासति।।हविष्मान्।देवः।

स्तु।सूर्यः।।२०।।अग्नेः।वः।अपन्नगृहस्येत्यपन्न।गृहस्य।सदसि।सा

दयामि।इन्द्राग्न्योः।भागधेयीरिति।भाग।धेयीः।स्थ।मित्रावरुणयोः।वि

श्वेषां।देवानां।भागधेयीरिति।भाग।धेयीः।स्थ।।२१।।अमूः।याः।उप।सू

र्ये।याभिः।वा।सूर्यः।सह।।ताः।नः।हिन्वंतु।अध्वरं।।२२।।हृदे।त्वा।मनसे।

दिवे।सूर्याय।अध्वरं।दिवि।देवेषु।होत्राः।यच्छ।।२३।।सोम।राजन्।विश्वाः।

यो।ऊर्ध्वः।

३९

तां। प्रजा इति प्रऽजाः। उपावरोहेत्युपऽअवरोह। विश्वाः। त्वां। प्रजा इति प्रऽजाः।
उपावरोहंत्वित्युपऽअवरोहंतु॥२४॥ शृणोतु। अग्निः। समिधेति सम्ऽइधा।
हवं। मे। शृण्वंतु। आपः। धिषणाः। च। देवीः॥ श्रोत। ग्रावाणः। विदुषः। न। यज्ञं।
शृणोतु। देवः। सविता। हवं। मे। स्वाहा॥२५॥ देवीः। आपः। अपां। नपात्। यः।
वः। ऊर्मिः। हविष्यः। इंद्रियावान्। इंद्रियवानितींद्रियऽवान्। मदिंतम इति
मदिन्ऽतमः॥२६॥ तं। देवेभ्यः। देवत्रेति देवऽत्रा। दात। शुक्रपेभ्य इति शु-
क्रऽपेभ्यः। येषां। भागः। स्थ। स्वाहा॥२७॥ कार्षिः। असि। समुद्रस्य। त्वा। अ-
क्षित्यै। उत्। नयामि। सं। आपः। अद्भिरित्यप्ऽभिः। अग्मत। सं। ओषधीभिः।

ओषधीः ।२८। यं । अग्ने । पृत्स्विति पृत्ऽसु । मर्त्यं । अवीः । वाजेषु । यं । जुनाः । सः ।
यंता । शश्वतीः । इषः । स्वाहा ।२९। आ । दुदो । रा । वो । अस्ति । गभीरं । इमं । अध्वरं । कृ
धि । इंद्राय । सुषूतमं । सुसुतममितिसुऽसुतमं । उत्तमेनेत्युत्ऽतमेन ।। पवि
ऊर्जस्वंतं । मधुमंतमितिमधुऽमंतं । पयस्वंतं । निग्राभ्या इति निऽग्राभ्याः । स्थ ।
देवश्रुत इति देवऽश्रुतः । तर्पयत । मा ।।३०।। मनः । मे । तर्पयत । वाचं । प्राणं । च
क्षुः । श्रोत्रं । आत्मानं । प्रजामिति प्रऽजां । पशून् । गणान् । गणाः । मे । मा । वि । तृ
षन् ।।३१।। इंद्राय । त्वा । वसुमत इति वसुऽमते । रुद्रवत इति रुद्रऽवते । आदि
त्यवत इत्यादित्यऽवते । अभिमातिघ्न इत्यभिमातिऽघ्ने । श्येनाय । सोमभृत

इतिसोमऽभृते।अग्नये।रायस्पोषदऽइति रायस्पोषऽदे।।४२।।यत्।ते।सोम।दिवि।
ज्योतिः।पृथिव्यां।उरौ।अंतरिक्षे।तेन।अस्मै।यजमानाय।उरु।राये।कृधि।
अधि।दात्रे।वोचः।।४३।।श्वात्राः।स्थ।वृत्रतुरऽइति वृत्रऽतुरः।राधोगूर्त्ताः
इतिराधःऽगूर्त्ताः।अमृतस्य।पत्नीः।ताः।देवीः।देवत्रेतिदेवऽत्रा।इमं।यज्ञं।
नयत।उपहूताऽइत्युपऽहूताः।सोमस्य।पिबतु।।४४।।मा।भेः।मा।सं।वि
क्थाः।ऊर्जं।धत्स्व।धिषणे इति धिषणे।वीड्वी इति वीड्वी।सतीइतिसती।।
वीळयेथां।ऊर्जं।दधाथां।पाप्मा।हतः।न।सोमः।।४५।।प्राक्।अपाक्।
उदक्।अधराक्।सर्वतः।त्वा।दिशः।आ।धावंतु।अंब।निः।पर।सं।

।तृ। ९

अरीः। विदं॥४६॥ त्वं। अंग। प्र। शंसिषः। देवः। शविष्ठ। मर्त्यं॥ न। त्वत्।
अन्यः। मघवन्निति मघऽवन्। अस्ति। मर्डिता। इंद्र। ब्रवीमि। ते। वचः॥४७॥
॥इति पदपाठे षष्ठोऽध्यायः॥ ॥श्री॥ हरिः॥ ॐ॥ मू॥ वाचः। पतये। पव
स्व। वृष्णः। अंशुभ्यामित्यंशुऽभ्यां। गभस्तिपूत इति गभस्तिऽपूतः।
देवः। देवेभ्यः। पवस्व। येषां। भागः। असि। मधुमतीरिति मधुऽमतीः।
नः। इषः। कृधि॥१॥ यत्। ते। सोम। अदाभ्यं। नाम। जागृवि। तस्मै। ते।
सोम। सोमाय। स्वाहा। स्वाहा। उरु। अंतरिक्षं। अनु। एमि। स्वांकृत इ
ति स्वांऽकृतः। असि। विश्वेभ्यः। इंद्रियेभ्यः। दिव्येभ्यः। पार्थिवेभ्यः॥२॥

मनेः। त्वा। अष्टु। स्वाहा। त्वा। स्वभव इति स्वऽभवः। सूर्याय। देवेभ्यः। त्वा। मरी
चिपेभ्य इति मरीचिऽपेभ्यः। देव। अंशो इत्यंशो। यस्मै। त्वा। ईडे। तत्।
सत्यं। उपरिप्रुतेत्युपरिऽप्रुता। भंगेन। हतः। असौ। फट्। प्राणाय। त्वा। व्या
नायेति विऽआनाय। त्वा॥३॥ उपयामगृहीत इत्युपयामऽगृहीतः। असि।
अंतः। यच्छ। मघवन्निति मघऽवन्। पाहि। सोमं। उरुष्य। रायः। सं। इ
षः। यजस्व॥४॥ अंतरित्यंतः। ते। द्यावापृथिवी इति द्यावापृथिवी। दधा
मि। अंतः। दधामि। उरु। अंतरिक्षं। सजूरिति सऽजूः। देवेभिः। अवरैः।
परैः। च। अंतर्याम इत्यंतःऽयामे। मघवन्निति मघऽवन्। मादयस्व। उद्धा

॥५२॥ नाये स्कंतः ऽआनाय । त्वा ॥५॥ आ । वायो इति वायो । भूष । शुचिपा इति शुचिऽ
पाः । उप । नः । सहस्रं । ते । नियुत इति निऽयुतः । विश्ववारेति विश्वऽवार । उ
पो इत्युपो । ते । अंधः । मद्यं । अयामि । यस्य । देव । दधिषे । पूर्वपेयमिति
पूर्वऽपेयं । वायवे । त्वा ॥६॥ इंद्रवायू इतींद्रवायू । इमे । सुताः । उप । प्रयो
भिरिति प्रयःऽभिः । आ । गतं ॥ इंदवः । वां । उशंति । हि । वायवे । इंद्रवायु
भ्यामितींद्रवायुऽभ्यां । त्वा । एषः । ते । योनिः । सजोषोभ्यामिति सजोषःऽभ्यां ।
त्वा ॥७॥ अयं । वां । मित्रावरुणा । सुतः । सोमः । ऋतावृधा । ऋतवृधे ॥५२॥
त्यृतऽवृधा ॥ मम । इत् । इह । श्रुतं ॥ मित्रावरुणाभ्यां । त्वा ॥८॥ राया । वयं । स
हवं ॥

सवांऽस इति ससऽवांऽसः । मदेम । हव्येन । देवाः । यवसेन । गावः ॥ तां
धेनुं । मित्रावरुणा । युवं । नः । विश्वाहा । धत्तं । अनपस्फुरंतीं सनपःस्फु मिर
रंतीं । एषः । ते । योनिः । ऋतायुभ्यां । ऋतयुभ्यामित्यृतयुऽभ्यां । त्वा ॥ १९ ॥ या
वां । कशा । मधुमतीति मधुऽमती । अश्विना । सूनृतावतीति सूनृताऽव
ती ॥ तया । यज्ञं । मिमिक्षतं ॥ अश्विभ्यामित्यश्विऽभ्यां । त्वा । एषः । ते । योनिः ।
माध्वीभ्यां । त्वा ॥ २० ॥ तं । प्रत्नथेति प्रत्नऽथा । पूर्वथेति पूर्वऽथा । विश्वथे
ति विश्वऽथा । इमथेतीमऽथा । ज्येष्ठतातिमिति ज्येष्ठऽतातिं । बर्हिषदं ।
बहिसदमिति बर्हिऽसदं । स्वर्विदमिति स्वःऽविदं । प्रतीचीनं । वृजनं । दो

॥४३॥
२४

हस्ते। धुनिं। आस्तुं। जयेतं। अनु। या। स्तु। वर्द्धसे। षांडाय। त्वा॥११॥ एषः। ते।
योनिः। वीरतां। पाहि। अपमृष्ट इत्यपऽमृष्टः। षंडः। देवाः। त्वा। शुक्रपा इति शु
क्रऽपाः। प्र। नयंतु। अनाधृष्टा। असि। सुवीर इति सुऽवीरः। वीरान्। प्रजन
यन्निति प्रऽजनयन्। परि। इहि। अभि। रायः। पोषेण। यजमानं। संजग्मा
न इति संऽजग्मानः। दिवा। पृथिव्या। शुक्रः। शुक्रशोचिषेति शुक्रऽशोचि
चिषा। निरस्त इति निःऽअस्तः। षंडः। शुक्रस्य। अधिष्ठानं। अधिस्थान
मित्यधिऽस्थानं। असि॥१२॥ अच्छिन्नस्य। ते। देव। सोम। सुवीर्यस्येति सु ॥४३
वीर्यस्य। रायः। पोषस्य। ददितारः। स्याम। सा। प्रथमा। संऽस्कृतिः। वि

श्ववारेति विश्वऽवारा। सः। प्रथमः। वरुणः। मित्रः। अग्निः।।१३।। सः। प्र
थमः। बृहस्पतिः। चिकित्वान्। तस्मै। इंद्राय। सुतं। आ। जुहोत। स्वाहाः।
तृपंतु। होत्राः। मध्वः। यत्। स्विष्टमिति सुऽइष्टं। सुर्न्तमिति सुऽर्न्तं।
यत्। स्वाहा।।१४।। अयं। वेनः। चोदयत्। पृश्निगर्भा इति पृश्निऽगर्भाः।
ज्योतिर्जरायुरिति ज्योतिःऽजरायुः। रजसः। विमान इति विऽमाने। इमं।
अपां। संगम इति संऽगमे। सूर्यस्य। शिशुं। न। विप्राः। मतिभिरिति म
तिऽभिः। रिहंति। मर्काय। त्वा।।१५।। मनः। न। येषु। हवनेषु। तिग्मं। वि
पः। शच्या। वनुथः। द्रवंता। आ। यः। शर्याभिः। तुविनृम्ण इति तुविऽनृ

॥४४॥ ण्णः । अस्य । अश्रीणीत । आदित्या मिसाः दिर्वं । गर्भस्तौ । एषः । ते । योनिः । प्र
जा इति प्रऽजाः । पाहि । अपमृष्ट इत्यपऽमृष्टः । मर्कः । देवाः । त्वा । मंथिपा इति
मथिऽपाः । प्र । नयंतु । अनाधृष्टा । असि । सुप्रजा इति सुऽप्रजाः । प्रजा इति
तै॰४ प्रऽजाः । प्रजनयन्निति प्रऽजनयन्न् । परि । इहि । अभि । रायः । पोषेण । यजमा
नं । संजग्मान इति संऽजग्मानः । दिवा । पृथिव्या । मथी । मंथि शोचिषेति मंथिऽ
शोचिषा । निरस्त इति निःऽअस्तः । मर्कः । मथिनः । अधिष्ठानं । अधिस्था
नमित्यधिऽस्थानं । असि ॥ १६ ॥ ये । देवासः । दिवि । एकादश । स्थ । पृथिव्यां । ॥४४॥
अधि । एकादश । स्थ । अप्सुक्षित इत्यप्सुऽक्षितः । महिना । एकादश । स्थ ।

ते। देवासः। यज्ञं। इमं। जुषध्वं॥१७॥ आग्रयणः। असि। स्वाग्रयण इति सुऽ
आग्रयणः। पाहि। यज्ञं। पाहि। यज्ञपतिमिति यज्ञऽपतिं॥१८॥ विष्णुः। त्वां।
इन्द्रियेण। पातु। विष्णुं। त्वं। पाहि। अभि। सवनानि। पाहि। सोमः। पवते। सोमः।
पवते॥१९॥ अस्मै। ब्रह्मणे। क्षत्राय। सुन्वते। यजमानाय। इषे। ऊर्ज्जे। अ
द्भ्य इत्यत्ऽभ्यः। ओषधीभ्यः। द्यावापृथिवीभ्यां। सुभूतायेति सुऽभूताय। ब्र
ह्मवर्चसायेति ब्रह्मऽवर्चसाय। पवते। विश्वेभ्यः। त्वा। देवेभ्यः। एषः। ते। योनिः।
विश्वेभ्यः। त्वा। देवेभ्यः॥२०॥ इंद्राय। त्वा। बृहद्वत इति बृहत्ऽवते। वयस्व
ते। उक्थायुवे। उक्थायुवमित्युक्थऽयुवे। गृह्णामि। यत्। ते। इंद्र। बृहत्। वयः।

॥४५॥ तस्मै। त्वा॥ विष्णवे। त्वा॥ एषः। ते। योनिः। विश्वेभ्यः। त्वा॥ २१॥ देवेभ्यः। त्वा। देवायु
मपीतय इति सोमऽपीतये ॥२६॥ एकया। च। तिसृभिरिति तिसृऽभिः। च।
वहसे। त्रिंशता। च। नियुद्भिरिति नियुत्ऽभिः। वायो इति वायो॥ इह। ता।
वि। मुंच ॥२७॥ नियुत्वान्। वायो इति वायो। शुक्रः। अयामि। ते। गंता। अ
सि। सुन्वतः। गृहं ॥२८॥ वायो इति वायो। शुक्रः। अयामि। ते। मध्वः। अग्रं।

२ आ। गहि। अयं।

य

दिविऽइष्टिषु॥ आ। याहि। सोमपीतँइति सोमऽपीतये। स्पार्हः। देव। नियुत्वता॥
॥६७॥ ॥२९॥ आ। नः। नियुद्भिरिति नियुत्ऽभिः। शतिनीभिः। अध्वरं। सहस्रिणी
भिः। उप। याहि। यज्ञं॥ वायो इति वायो। अस्मिन्। सवने। मादस्व। यूयं।
पात। स्वस्तिभिरिति स्वस्तिऽभिः। सदा। नः॥३०॥ तव। वायो इति वायो। ऋ
तस्पते। ऋतपत इत्यृतऽपते। त्वष्टुः। जामातः। अद्भुत। अवांसि। आ।
वृणीमहे॥३१॥ एन। द्यौः। उग्रा। पृथिवी। दृल्हा॥ येन। स्वरिति स्वः। स्तभि ॥६७॥
तं। येन। नाकः॥ यः। अंतरिक्षे। रजसः। विमान इति विऽमानः। कस्मै। देवाय।
हविषा। विधेम॥३२॥ यं। क्रंदसी इति क्रंदसी। अवसा। तस्तभाने इति तस्त त

३५

भाने। अभि। ऐक्षेतां। मनसा। रेजमाने इति रेजमाने॥ यत्र। अधि। सूरः।
उदितः इत्युत्ऽइतः। विभातीति विऽभाति॥ २३॥ आपः। ह। यत्। बृहतीः। विश्वं।
आयन्। गर्भं। दधानाः। जनयंतीः। अग्निं॥ ततः। देवानां। सं। अवर्त्तत। अ
सुः। एकः॥ २४॥ यः। चित्। आपः। महिना। पर्यपश्यदिति परिऽअपश्यत्। द
क्षं। दधानाः। जनतीः। यज्ञं। यः। देवेषु। अधि। देवः। एकः। आसीत्॥ नः।
जजान। बृहतीः। जजान॥ विश्वा। जातानि॥ २५। अभि। त्वा। शूर। नोनुमः।
अदुग्धाइवेत्यदुग्धाःऽइव। धेनवः। ईशानं। अस्य। जगतः। स्वर्दृशमिति स्वः।
दृशं। ईशानं। इंद्र। तस्थुषः॥ २६॥ न। त्वावानिति त्वाऽवान्। अन्यः। दिव्यः।

॥८५॥

न।पार्थिवः।न।जातः।न।जनिष्यते।अश्वायतः।अश्वयंतइत्यश्वऽयंतः।मघ
वन्नितिमघऽवन्।इंद्र।वाजिनः।गव्यंतः।त्वा।हवामहे॥२७॥त्वां।इत्।हि।हवाम
हे।सातौ।वाजस्य।कारवः॥त्वां।वृत्रेषु।इंद्र।सत्पतिमितिसत्ऽपतिं।नरः।
त्वां।काष्ठासु।अर्वतः॥२८॥सः।त्वं।नः।चित्र।वज्रहस्तेतिवज्रऽहस्त।धृ
ष्णुयेतिधृष्णुऽया।महः।स्तवानः।अद्रिवइत्यद्रिऽवः।गो।अश्वं।रथ्यं।इंद्र।
सं।किर।सत्रा।वाजं।न।जिग्युषे॥२९॥कया।नः।चित्रः।आ।भुवत्।
ऊती।सदावृधइतिसदाऽवृधः।सखा॥कया।शचिष्ठया।वृता॥३०॥कः।
त्वा।सत्यः।मदानां।मंहिष्ठः।मत्सत्।अंधसः॥दृळ्हा।चित्।आरुजे।वसु॥

॥८५॥

॥४१॥ अग्नि । सु । नः । सखीनां । अविता । जरितॄणां । त्राता । न । वासि । ऊतये ॥४२॥
यज्ञायज्ञेतियज्ञाऽयज्ञा । वः । अग्नये । गिरागिरेतिगिराऽगिरा । च । दक्षसे । प्रप्रेति
प्रऽप्र । वयं । अमृतं । जातवेदसमितिजातऽवेदसं । प्रियं । मित्रं । न । शंसिषं ॥४३॥
ऊर्जः । नपातं । सः । हिन । अयं । अस्मयुरित्यस्मऽयुः । दाशेम । हव्यदातयइतिह
व्यऽदातये ॥ भुवत् । वाजेषु । अविता । भुवत् । वृधः । उत । त्राता । तनूनां ॥४४॥
संवत्सरः । असि । परिवत्सरइतिपरिऽवत्सरः । इदावत्सरः । इद्वत्सरइतीत्ऽवत्स
रः । वत्सरः । उषसः । ते । कल्पतां । अहोरात्राः । अर्द्धमासाइत्यर्द्धऽमासाः । मासाः ।
ऋतवः । संवत्सरः । ते । कल्पतां ॥४५॥ प्रेत्साइतिप्रऽइत्से । एत्साऽइत्साऽइसे । संच । अग्ने । स

म

यु

॥६१॥

सारय।सुपर्णचिदितिसुपर्णऽचित्।असि।तया।देवतया।अंगिरस्वत्।ध्रु
वः।सीद॥ ८६॥ इतिपदपाठेएकोनत्रिंशत्तमोध्यायः॥ ॥ श्री॥ ॥ हरिः॥ ॐ
श्रु॥ ॥ समिधेतिसम्ऽइधा।इंद्रं।इळः।पदे।नाभा।पृथिव्याः।अधि॥ दिवः।व
र्ष्मन्।सं।इध्यते।ओजिष्ठः।चर्षणीसहां।चर्षणिसहामितिचर्षणिऽसहां।वेतु॥
॥१॥ तनूनपातमितितनूऽनपातं।ऊतिभिरित्यूतिऽभिः।जेतारं।अपराजित
मित्यपराऽजितं॥ इंद्रं।देवं।स्वर्विदमितिस्वःऽविदं।पथिभिरितिपथिऽभिः।
मधुमत्तमैरितिमधुमत्ऽतमैः।नराशंसेन।तेजसा॥२॥ इळाभिः।इंद्रं।
ईळितं।आजुह्वानमित्याऽजुह्वानं।अमर्त्यं।देवः।देवैः।सवीर्यइतिसऽवी

॥६१॥

यैः। वज्रहस्त इति वज्रऽहस्तः। पुरंदर इति पुरंऽदरः॥३॥ बर्हिषि। इंद्रं। नि
षद्वरं। निसद्वरमिति निसत्ऽवरं। वृषभं। नर्यापसम्मिति नर्यऽअपसं॥
वसुभिरिति वसुऽभिः। रुद्रैः। आदित्यैः। सयुग्भिरिति सयुक्ऽभिः। बर्हिः।
आ। असदत्॥४॥ ओजः। न। वीर्यं। सहः। द्वारः। इंद्रं। अवर्द्धयन्॥ सुप्रा
यणाः। सुप्रायना इति सुऽप्रायनाः। अस्मिन्। यज्ञे। वि। श्रयंतां। ऋतावृधः।
ऋतवृध इत्यृतऽवृधः। द्वारः। इंद्राय। मीळ्हुषे। व्यंतु॥५॥ उषे इत्युषे। इंद्र
स्या। धेनु इति धेनू। सुदुघे इति सुऽदुघे। मातरा। मही इति मही। सवातरा
इति सऽवातरौ। न। तेजसा। वत्सं। इंद्रं। अवर्द्धतां॥ वीतां॥६॥ भिषजा। स

॥७०॥

खाय। हुविषा। इंद्रं। भिषज्यतः॥ कुवी इति कुवी। देवौ। प्रचेतसा। इति प्रऽचेत
सा। इंद्राय। धत्तः। इंद्रियं॥७॥ इळा। सरस्वती। भारती। महीः। इंद्रपत्नीरि
तींद्रऽपत्नीः। हविष्मतीः॥८॥ त्वष्टारं। इंद्रं। देवं। भिषजं। सुयज्ञमिति सु
ऽयज्ञं। घृतश्रियमिति घृतऽश्रियं। पुरुरूपमिति पुरुऽरूपं। सुरेतसमि
ति सुऽरेतसं। मघोनां॥९॥ धियः। जोष्टारं। इंद्रियं॥ मध्वा। समंजन्निति सं
ऽअंजन्। पथिभिरिति पथिऽभिः। सुगेभिरिति सुऽगेभिः॥ स्वदाति। यज्ञं। म
धुना। घृतेन॥१०॥ इंद्रं। स्वाहा। आज्यस्य। मेदसः। स्तोकानां। स्वाहाकृती ॥७०॥
नामिति स्वाहाऽकृतीनां। हव्यसूक्तीनामिति हव्यऽसूक्तीनां। देवाः। आ

ज्यस्यपाइत्याज्यऽपाः। जुषाणा। इंद्रः। आज्यस्य॥२१॥ देवं। बर्हिः। इंद्रं। सुदेव
मितिसुऽदेवं। देवैः। वीरवदितिवीरऽवत्। स्तीर्णं। वेद्यां। अवर्द्धयत्॥ वस्तोः।
वृतं। प्र। अक्तोः। भृतं। राया। बर्हिष्मतः। अति। अगात्॥२२॥ इंद्रं। संघातइ
तिसंऽघाते। वीड्वीः। यामन्। अवर्द्धयन्॥ आ। वत्सेन। तरुणेन। कुमारेण।
च। मीवता। अप। अर्वाणं। रेणुककाटमितिरेणुऽककाटं। नुदंतां॥२३॥ उषा
सानक्ता। उषसानक्तेत्युषसानक्ता। इंद्रं। यज्ञे। प्रयतीतिप्रऽयति। अह्वेतां।
दैवीः। विशः। प्र। अयासिष्टां। सुप्रीते इतिसुऽप्रीते। सुधिते इतिसुऽधिते॥२४॥
वसुधिती इतिवसुऽधिती। देवं। इंद्रं। अवर्द्धतां॥ अयावि। अघा। द्वेषांसि।

अन्या

७१ आ । अस्या । वसत । वसु । वार्याणि । यजमानाय । त्रिक्षिते इति त्रिऽक्षिते ॥ १५ ॥ सु
दुघे इति सुऽदुघे । पयसा ॥ इषं । ऊर्जं । अस्या । वसत । सग्धिं । सपीतिमिति सऽ
पीतिं । अस्या । नवेन । पूर्वं । दयमाने इति दयमाने । पुराणेन । नवं । अथा । तां । ऊ
र्जं । ऊर्जाहुती इत्यूर्जऽआहुती । ऊर्जयमाने इत्यूर्जयमाने ॥ १६ ॥ हताघन्नाः
सा इति हतऽअघन्नाःसौ । आ । अभार्षं । त्रिक्षितौ ॥ १७ ॥ पतिं । इंद्रं । अवर्द्ध
यन् ॥ अस्रसतू । भारती । दिवं । रुद्रैः । यज्ञं । सरस्वती । इळा । वसुमतीति व
सुऽमती । गृहान् ॥ १८ ॥ त्रिवरूथ इति त्रिऽवरूथः । त्रिवंधुर इति त्रिऽवंधुरः ॥ ७२
ऋतेन । त्रितिपृष्ठानामिति त्रितिऽपृष्ठानां । आहित इत्याऽहितः । सहस्रेण ॥

प्र। वर्त्तते। मित्रावरुणा। अस्य। होत्रं। अर्हतः। वृहस्पतिः। स्तोत्रं। अश्विना। आ
ध्वर्यवं॥१९॥ मधुश्चारवइति मधुऽश्चारवः। सुपिप्पलइति सुऽपिप्पलः॥ दिवं।
अग्रेण। अस्य। स्तत्। आ। अंतरीक्षं। पृथिवी। अदृंहीत्॥२०॥ स्वासस्थमिति
सुऽआसस्थं। इंद्रेण। आसन्नमिसाऽसन्नं। अन्या। वर्हिऽषि। अभि। अभूत्।
॥२१॥ स्विष्टमिति सुऽइष्टं। कुर्वन्। स्विष्टकृदिति स्विष्टऽकृत्। स्विष्टमिति सुऽइष्टं।
अद्य। करोतु। नः॥२२॥ इंद्राय। छागं। इंद्राय। छागेन। अजघत्। तं। मेदस्तः। प्रति।
पचता। अग्रभीत्। अवीवधत। पुरो कमोन॥२३॥ समिधानमिति संऽइधानं।
महत्। यशः। सुसमिद्धमिति सुऽसमिद्धं। वरेण्यं। अग्निं। इंद्रं। वयोधसमिति व

पऽधस्व ॥ गायत्रीं । छंदः । इंद्रियं । त्र्यविमिति त्रिऽअविं । गां । वयः । दधत् ॥ २४ ॥ तनूनपातमिति तनूऽनपातं । उद्भिदमित्युत्ऽभिदं । यं । गार्भं । अदितिः । दधे सुचिं । उष्णिहं । दित्यवाहमिति दित्यऽवाहं ॥ २५ ॥ ईळेन्यं । ईळितं । वृत्रहंतममिति वृत्रहन्ऽतमं । इळाभिः । ईड्यं । सहः । सोमं । अनुष्टुभं । अनुस्तुभमिति अनुऽस्तुभं । पंचाविमिति पंचऽअविं ॥ २६ ॥ सुबर्हिषमिति सुऽबर्हिषं । पूषण्वंतमिति पूषण्ऽवंतं । अमर्त्यं । सीदंतं । बर्हिषि । प्रिये । अमृता ॥ बृहतीं । त्रिवत्समिति त्रिऽवत्सं ॥ २७ ॥ व्यचस्वतीः । सुप्रायणाः । सुप्रायणा इति सुऽप्रायणाः । ऋतावृधः । ऋतवृध इत्यृतऽवृधः । द्वारः । देवीः । हिरण्ययीः । ब्रह्माणं । पंक्तिं । इह । तुर्यवाह

मिति तुर्यऽवाहं ॥१८॥ सुपेशसेति सुऽपेशसा । सुश्रीत्ये इति सुऽश्रीत्ये । बृहतीइ
ति बृहती । उभे इत्युभे । नक्तोषासा । नक्तोषसेति नक्तोषसा । नादध्रीतेइति दध्रीते ।
विश्वं । त्रिष्टुभं । त्रिस्तुभमिति त्रिऽस्तुभं । पष्ठवाहमिति पष्ठऽवाहं ॥१९॥ प्रचेतसे
ति प्रऽचेतसा । देवानां । उत्तममित्युत्ऽतमं । यज्ञाः । होतारा । दैव्या । कवी इति
कवी । सयुजेति सऽयुजा । जगतीं । अनड्वाहं ॥२०॥ पेशस्वतीः । तिस्रः । देवीः ।
हिरण्ययीः । भारतीः । बृहतीः । महीः । पतिं ॥ विराजमिति विऽराजं । धेनुं ।
नां ॥२१॥ सुरेतसमिति सुऽरेतसं । त्वष्टारं । पुष्टिवर्द्धनमिति पुष्टिऽवर्द्धनं ।
रूपाणि ॥ बिभ्रतं । पृथक् । पुष्टिं ॥ द्विपदमिति द्विऽपदं । उक्षाणं ॥२२॥ हिरण्य

७२

र्णमिति हिरण्यऽपर्णं। उक्थिनं। सूनानां। बिभ्रतं। वशिं। भगं। ककुभं। वयां। वे
दन्तं। श्रिया। स्वाहाकृतीरिति स्वाहाऽकृतीः। अग्निं। गृहपतिमिति गृहऽ
पतिं। प्रथकं। वरुणं। भेषजं। कविं। क्षत्रं। अतिछंदसमित्यतिऽछंदसं।
बृहत्। ऋषभं। गां। देवं। बर्हिः। वयोधसमिति वयःऽधसं। देवं। इंद्रं।
अवर्द्धयत्। गायत्र्या। छंदसा। इंद्रियं। चक्षुः। इंद्रे। वयः। दधत्। ३५॥
सुचिं। उष्णिहा। प्राणं। अनुष्टुभं। अनुस्तुभेत्यनुऽस्तुभं। बलं। बृह
त्या। श्रोत्रं। पंक्त्या। क्रतुं। देवं। त्रिष्टुभं। त्रिस्तुभेति त्रिऽस्तुभं। हविषं।

७२

जगत्स्या।भ्रषं॥ विराजेति विऽराजो। रूपं॥ द्विपदेति द्विऽपदा। नगं॥
कुकुभा। यशः। अतिछंदसेत्यतिऽछंदसा। क्षत्रं॥ इंद्राय। वयोधस
इति वयःऽधसे। छागं। इंद्राय। वयोधस इति वयःऽधसे। छागेन॥
इति पद[illegible]त्रिऽ२त्रातिमोध्यायः॥ ॥ समाप्तः॥ श्री॥ श्री॥ श्री

॥१९॥

॥१९॥

॥१॥

॥ श्रीगजाननायनमः॥ श्रीगुरुमूर्त्तयेनमः॥ हरिः॥ ॐ नु। संमिद्ध इति सं।
इधः। अंजन्। कृदरं। मतीनां। घृतं। अग्ने। मधुमदिति मधुऽमत्। पिन्वमानः।
वाजी। वहन्। वाजिनं। जातवेद इति जातऽवेदः। देवानां। वक्षि। प्रियं। आ।
सधस्थमिति सधऽस्थं।१। घृतेन। अंजन्। सं। पथः। देवयानानिति देवऽयाना
न्। प्रजानन्निति प्रऽजानन्। वाजी। अपि। एतु। देवान्। अनु। त्वा। सप्ते। प्रदि
श इति प्रऽदिशः। सचंतां। स्वधां। अस्मै। यजमानाय। धेहि।२। ईड्यः। च। अ
सि। वंद्यः। च। वाजिन्। आशुः। च। असि। मेध्यः। च। सप्ते। अग्निः। त्वा। देवैः।
वसुभिरिति वसुऽभिः। सजोषा इति सऽजोषाः। प्रीतं। वह्निं। वहतु। जातवे

नि

॥१॥

दा इति जातऽवेदाः।।३।।स्तीर्णं।बर्हिः।सुष्टरीम।सुस्तरीमेति सुऽस्तरीम।जुषा
णा।उरु।पृथु।प्रथमानं।पृथिव्यां।देवेभिः।युक्तं।अदितिः।सजोषा इति सऽजो
षाः।स्योनं।कृण्वाना।सुविते।दधातु।।४।।एताः।ऊं इति।वः।सुभगा इति सुऽभ
गाः।विश्वरूपा इति विश्वऽरूपाः।वि।पक्षोभिरिति पक्षःऽभिः।श्रयमाणाः।उ
त्।आतैः।।ऋष्वाः।सतीः।कवषः।शुंभमानाः।द्वारः।देवीः।सुप्रायणाः।सुप्रा
यना इति सुऽप्रायनाः।भवंतु।।५।।अंतरा।मित्रावरुणा।चरंती इति चरंती।
मुखं।यज्ञानां।अभि।संविदाने इति संऽविदाने।उषासा।उषसेत्युषसा।वां।

॥२॥

सुहिरण्ये इति सुऽहिरण्ये । सुशिल्पे इति सुऽशिल्पे । ऋतस्य । योनौ । इह । साद
यामि ॥ ६ ॥ प्रथमा । वां । सरथिनेति सऽरथिना । सुवर्णेति सुऽवर्णा । देवौ । पश्यं
तौ । भुवनानि । विश्वा । अपिप्रयं । चोदना । वां । मिमाना । होतारा । ज्योतिः । प्रदिशेति
प्रऽदिशा । दिशंता ॥ ७ ॥ आदित्यैः । नः । भारती । वष्टु । यज्ञं । सरस्वती । सह । रुद्रैः ।
२० नः । आवीत् । उपहूतेत्युपऽहूता । वसुभिरिति वसुऽभिः । सजोषा इति सऽजोषाः ।
यज्ञं । नः । देवीः । अमृतेषु । धत्त ॥ ८ ॥ त्वष्टा । वीरं । देवकाममिति देवऽकामं । जजा
न । त्वष्टुः । अर्वा । जायते । आशुः । अश्वः । त्वष्टा । इदं । विश्वं । भुवनं । जजान । ब
होः । कर्तारं । इह । यक्षि । होतरिति होतः ॥ ९ ॥ अश्वः । घृतेन । त्मन्या । समक्त इति सं ॥२॥

अक्तः। उप। देवान्। ऋतुथा इत्यृतुऽथाः। पाथः। एतु। वनस्पतिः। देवलोकमि
तिदेवऽलोकं। प्रजानन्निति प्रऽजानन्। अग्निना। हव्या। स्वदितानि। वक्षत्।।१०।।
प्रजापतेरिति प्रजाऽपतेः। तपसा। वावृधानः। ववृधान इति ववृधानः। सद्यः।
जातः। दधिषे। यज्ञं। अग्ने। स्वाहाकृतेनेति स्वाहाऽकृतेन। हविषा। पुरोगा इति
पुरःऽगाः। याहि। साध्या। हविः। अदंतु। देवाः।।११।। केतुं। कृण्वन्। अकेतवे। पे
शः। मर्याः। अपेशसे। सं। उषद्भिरित्युषत्ऽभिः। अजायथाः।।१२।। जीमूतस्येवे
तिजीमूतस्यऽइव। भवति। प्रतीकं। यत्। वर्मी। याति। समदामिति सऽमदां। उप
स्थ इत्युपऽस्थे। अनाविद्धया। तन्वा। जय। त्वं। सः। त्वा। वर्मणः। महिमा। पिपर्तु।

॥२३॥ धन्वना । गाः । धन्वना । आजिं । जयेम । धन्वना । तीव्राः । समदइतिसऽमदः । ॥२॥
जयेम । धनुः । शत्रोः । अपकाममित्यपऽकामं । कृणोति । धन्वना । सर्वाः । प्रदिश
इति प्रऽदिशः । जयेम ॥२४॥ ते इतिते । आचरंतीइत्याऽचरंती । समनेवेतिसमना
ऽइव । योषा । मातेवेतिमाताऽइव । पुत्रं । बिभृतां । उपस्थ इत्युपऽस्थे । अप । श
त्रून् । विध्यतां । संविदानेतिसंऽविदाने । आर्त्नीइत्यार्त्नी । इमे इतीमे । विष्फुरंती ।
विस्फुरंती इति विऽस्फुरंती । अमित्रान् ॥२५॥ वक्ष्यंतीवेति वक्ष्यंतीऽइव । इत् ।
आ । गनीगंति । कर्णं । प्रियं । सखायं । परिषस्वजाना । परिसस्वजानेति परिऽ
सस्वजाना । योषेवेतियोषाऽइव । शिंक्ते । विततेति विऽतता । अधि । धन्वन् । ज्या । ॥२॥

इयं। समने। पारयंती।।४०।। अहिरिवेत्यहिःऽइव। भोगैः। परि। एति। बाहुं।
ज्यायाः। हेतिं। परिऽबाधमान इति परिऽबाधमानः। हस्तघ्न इति हस्तऽघ्नः।
विश्वा। वयुनानि। विद्वान्। पुमान्। पुमांसं। परि। पातु। विश्वतः।।४१।। वक्षी
नां। पिता। बहुः। अस्य। पुत्रः। चिश्चा। कृणोति। समना। अवगत्येत्यवऽगत्य।
इषुधिरितीषुऽधिः। संकाः। पृतनाः। च। सर्वाः। पृष्ठे। निनद्ध इति निऽनद्धः।
जयति। प्रसूत इति प्रऽसूतः।।४२।। सुपर्णमिति सुऽपर्णं। वस्ते। मृगः। अस्याः।
दंतः। गोभिः। संनद्धेति संऽनद्धा। पतति। प्रसूतेति प्रऽसूता। यत्र। नरः। सं।
च। वि। च। द्रवंति। तत्र। अस्मभ्यं। इषवः। शर्म। यंसन्।।४३।। वनस्पते। वी

ड्वंगइति वीळुऽअंगः। हि। भूयाः। अस्मत्सखेत्यस्मत्ऽसखा। प्रतरणइतिप्र
तरणः। सुवीरइति सुऽवीरः। गोभिः। संनद्धइति संऽनद्धः। असि। वीळयस्व।
आस्थातेत्याऽस्थाता। ते। जयतु। जेत्वानि॥२०॥ रथे। तिष्ठन्। नयति। वाजिनः।
पुरः। यत्रयत्रेति यत्रऽयत्र। कामयते। सुषारथिः। सुसारथिरिति सुऽसार
थिः। अभीशूनां। महिमानं। पनायत। मनः। पश्चात्। अनु। यच्छंति। रश्मयः।
॥२१॥ आ। जंघंति। सानु। एषां। जघनान्। उप। जिघ्नते। अश्वाजनीत्यश्व
ऽअजनि। प्रचेतसइति प्रऽचेतसः। अश्वान्। समत्स्विति समत्ऽसु। चोदय।
॥२२॥ उप। श्वासय। पृथिवीं। उत। द्यां। पुरुत्रेति पुरुऽत्रा। ते। मनुतां। विष्ठितं।

विस्थितमिति विऽस्थितं। जगत्। सः। दुंदुभे। सजूरिति सऽजूः। इंद्रेण। देवैः।
दूरात्। दवीयः। अप। सेध। शत्रून्॥२३॥ यत्। अक्रंदः। प्रथमं। जायमानः।
उद्यन्निति उत्ऽयन्। समुद्रात्। उत। वा। पुरीषात्। श्येनस्य। पक्षा। हरिणस्य।
बाहू इति बाहू। उपस्तुत्यमित्युपऽस्तुत्यं। महि। जातं। ते। अर्वन्॥२४॥ यमेन।
दत्तं। त्रितः। एनं। आयुनक्। अयुनगि सयुनक्। इंद्रः। एनं। प्रथमः। अधि।
अतिष्ठत्। गंधर्वः। अस्य। रस्नां। अगृभ्णात्। सूरात्। अश्वं। वसवः। निः। अ
तष्ट॥२५॥ असि। यमः। असि। आदित्यः। अर्वन्। असि। त्रितः। गुह्येन। व्रतेन।
असि। सोमेन। समया॥ विपृक्त इति विऽपृक्तः। आहुः। ते। त्रीणि। दिवि। बंधना

भि॥२६॥ त्रीणि। ते। आहुः। दिवि। बंधनानि। त्रीणि। अप्सि सप्ऽसु। त्रीणि।
अंतरित्यंतः। समुद्रे। उतवेत्युतऽइव। मे। वरुणः। छंत्सि। अर्वन्। यत्र। ते। आ
हुः। परमं। जनित्रं॥२७॥ इमा। ते। वाजिन्। अवमार्जनानीत्यवऽमार्जनानि।
इमा। शफानां। सनितुः। निधानेति निऽधाना। अत्र। ते। भद्राः। रशनाः। अ
पश्यं। ऋतस्य। याः। अभिरक्षंतीत्यभिऽरक्षंति। गोपाः॥२८॥ आत्मानं। ते। म
नसा। आरात्। अजानां। अवः। दिवा। पतयंतं। पतंगं। शिरः। अपश्यं। प
थिभिरिति पथिऽभिः। सुगेभिरिति सुऽगेभिः। अरेणुभिरित्यरेणुऽभिः। जे
हमानं। पतत्रि॥२९॥ अत्र। ते। रूपं। उत्तममित्युत्ऽतमं। अपश्यं। जिगीष

नाणं। इषः। आ। पदे। गोः। यदा। ते। मर्त्तः। अनु। भोगं। आनट्। आत्। इत्।
ग्रसिष्ठः। ओषधीः। अजीगरित्यजीगः। ७। अनु। त्वा। रथः। अनु। मर्यः। अ
न र्वन्। अनु। गावः। अनु। भगः। कनीनां। अनु। व्रातासः। तव। सख्यं। ईयुः।
अनु। देवाः। ममिरे। वीर्यंते। ॥८॥ हिरण्यश्रृंग इति हिरण्यऽश्रृंगः। अपः। ऽअयः। अस्य।
अस्य। पादाः। मनोजवा इति मनःऽजवाः। अवरः। इंद्रः। आसीत्। देवाः।
इत्। अस्य। हविरद्यमिति हविःऽअद्यं। आयान्। यः। अर्वंतं। प्रथमः।
अध्यतिष्ठदित्यधिऽअतिष्ठत्। ९। ईर्मांतास इतीर्मऽअंतासः। सिलि
कमध्यमास इति सिलिकऽमध्यमासः। सं। शूरणासः। दिव्यासः। अत्याः।

॥द॥

हंसाःऽइवेति हंसाःऽइव । श्रेणिशऽइति श्रेणिऽशः । यतंते । यत् । आ । अक्षिषुः ।
दिव्यं । अज्मं । अश्वाः ॥ १० ॥ तव । शरीरं । पतइष्णु । अर्वन् । तव । चित्तं । वातःऽ
इवेति वातःऽइव । ध्रजीमान् । तव । शृंगाणि । विष्ठिता । विस्थितेति विऽस्थिता ।
पुरुत्रेति पुरुऽत्रा । अरण्येषु । जर्भुराणा । चरंति ॥ ११ ॥ उप । प्र । अगात् । श
सनं । वाजी । अर्वा । देवद्रीचा । मनसा । दीध्यानः । अजः । पुरः । नीयते । ना
भिः । अस्य । अनु । पश्चात् । कवयः । यंति । रेभाः ॥ १२ ॥ परमं । यत् । सधस्थ
मिति सधऽस्थं । अर्वान् । अच्छ । पितरं । मातरं । च । अद्य । देवान् । जुष्टत
मऽइति जुष्टऽतमः । हि । गम्याः । अथ । आ । शास्ते । दाशुषे । वार्याणि ॥ १३ ॥

॥द॥

समिद्ध इति संऽइद्धः। अद्य। मनुषः। दुरोणे। देवः। देवान्। यजसि। जातवेद इति जातऽवेदः। आ। च। वह। मित्रमह इति मित्रऽमहः। चिकित्वान्। त्वं। दूतः। कविः। असि। प्रचेता इति प्रऽचेताः॥ १॥ तनूनपादिति तनूऽनपात्। पथः। ऋतस्य। यानान्। मध्वा। समंजन्निति संऽअंजन्। स्वदय। सुजिह्वेति सुऽजिह्व। मन्मानि। धीभिः। उत। यज्ञं। ऋंधन्। देवत्रेति देवऽत्रा। च। कृणुहि। अध्वरं। नः॥ २॥ नराशंसस्य। महिमानं। एषां। उप। स्तोषाम। यजतस्य। यज्ञैः। ये। सुक्रतव इति सुऽक्रतवः। शुचयः। धियंधा इति धियंऽधाः। स्वदंति। देवाः। उभयानि। हव्या॥ ३॥ आजुह्वान इत्याऽजुह्वानः। ई

।।७।।

ड्यः।वंद्यः।च।आ।याहि।अग्ने।वसुभिरिति वसुऽभिः।सजोषा इति सऽ
जोषाः।त्वं।देवानां।असि।यह्व।होता।सः।एनान्।यक्षि।इषितः।यजी
यान्।।३०।। प्राचीनं।बर्हिः।प्रदिशेति प्रऽदिशा।पृथिव्याः।वस्तोः।अ
स्याः।वृज्यते।अग्रे।अह्नां।वि।ऊं इति।प्रथते।वितरमिति विऽतरं।व
रीयः।देवेभ्यः।अदितये।स्योनं।।३१।। व्यचस्वतीः।उर्विया।वि।श्रयतां।प
तिभ्य इति पतिऽभ्यः।न।जनयः।शुंभमानाः।देवीः।द्वारः।बृहतीः।वि
श्वमिन्वा इति विश्वंऽइन्वाः।देवेभ्यः।भवत।सुप्रायणाः।सुप्रायणा
इति सुऽप्रायनाः।।३२।। आ।सुष्वयंति।सुष्वयंती इति सुऽस्वयंती।य

।।७।।

जते इति यजते।उपाके इत्युपाके।उषासानक्ता।उषसानक्तेत्युषसानक्ता।
सदतां।नि।योनौ।दिव्ये इति दिव्ये।योषणे इति योषणे।बृहती इति बृह
ती।सुरुक्मे इति सुऽरुक्मे।अधि।श्रियं।शुक्रपिशमिति शुक्रऽपिशं।द
२ धाने इति दधाने॥[illegible]॥दैव्या।होतारा।प्रथमा।सुवाचेति सुऽवाचा।मिमा
ना।यज्ञं।मनुषः।यजध्यै।प्रचोदयंतेति प्रऽचोदयंता।विदथेषु।कारू
इति कारू।प्राचीनं।ज्योतिः।प्रदिशेति प्रऽदिशा।दिशंतां॥[illegible]॥आ।नः।य
ज्ञं।भारती।तूयं।एतु।इळा।मनुष्वत्।इह।चेतयंती।तिस्रः।देवीः।बर्हिः।
आ।इदं।स्योनं।सरस्वती।स्वपस इति सुऽअपसः।सदंतु॥[illegible]॥यः।

॥८॥ इमेइतीमे। द्यावापृथिवीइति द्यावापृथिवी। जनित्री इति जनित्री। रूपैः।
अपिंशत्। भुवनानि। विश्वा। तं। अद्य। होतः। इषितः। यजीयान्। दे
वं। त्वष्टारं। इह। यक्षि। विद्वान्॥९॥ उपावसृजेत्युपऽअवसृज। त्मन्या।
समंजन्निति संऽअंजन्। देवानां। पाथः। ऋतुथेत्यृतुऽथा। हवींषि। वन
स्पतिः। शमिता। देवः। अग्निः। स्वदंतु। हव्यं। मधुना। घृतेन॥१०॥ सद्यः।
जातः। वि। अमिमीत। यज्ञं। अग्निः। देवानां। अभवत्। पुरोगा इति पुरः।
गाः। अस्य। होतुः। प्रदिशीति प्रऽदिशि। ऋतस्य। वाचि। स्वाहाकृतमिति
स्वाहाऽकृतं। हविः। अदंतु। देवाः॥११॥ अग्नये। गायत्राय। त्रिवृतइति त्रि ॥८॥

व्ते। राथंतरायेति राथंऽतराय। अष्टाकपाल इत्यष्टाऽकपालः। ऐंद्राय।
त्रैष्टुभाय। त्रैस्तुभायेति त्रैस्तुभाय। पंचदशायेति पंचऽदशाय। बार्हता
य। एकादशकपाल इत्येकादशऽकपालः। विश्वेभ्यः देवेभ्यः। जागतेभ्यः। स
प्तदशेभ्य इति सप्तऽदशेभ्यः। वैरूपेभ्यः। द्वादशकपाल इति द्वादशऽकपा
लः। मित्रावरुणाभ्यां। आनुष्टुभाभ्यां। आनुस्तुभाभ्यामित्यानुऽस्तुभाभ्यां।
एकविंशाभ्यामित्येकऽविंशाभ्यां। वैराजाभ्यां। पयस्या। बृहस्पतये।
पांक्ताय। त्रिणवाय। त्रिनवायेति त्रिऽनवाय। शाक्वराय। चरुः। सवित्रे।
औष्णिहाय। त्रयस्त्रिंशायेति त्रयःऽत्रिंशाय। रैवताय। द्वादशकपा

ल इति द्वादशऽकपालः। प्रजापत्य इति प्रजाऽपत्यः। चरुः। अदित्यै। विष्णु
पत्न्या इति विष्णुऽपत्न्यै। चरुः। अग्नये। वैश्वानराय। द्वादशाकपाल इति
द्वादशऽकपालः। अनुमत्या इत्यनुऽमत्यै। अष्टाकपाल इत्यष्टाऽकपालः
॥८१॥ आग्नेयः। कृष्णग्रीव इति कृष्णऽग्रीवः। सारस्वती। मेषी। बभ्रुः।
सौम्यः। पौष्णः। श्यामः। शितिपृष्ठ इति शितिऽपृष्ठः। बार्हस्पत्यः। शिल्पः।
वैश्वदेव इति वैश्वऽदेवः। ऐन्द्रः। अरुणः। मारुतः। कल्माषः। ऐन्द्राग्नः। सं
हित इति संऽहितः। अधोराम इत्यधःऽरामः। सावित्रः। वारुणः। कृष्णः।
एकशितिपादित्येकऽशितिपात्। पेत्वः॥ ॥५०॥ अग्नये। अनीकवत इत्यनी

कःऽवते। रोहिताञ्जिरिति रोहितऽअञ्जिः। अनड्वान्। अधोरामावित्यधःऽ
रामौ। सावित्रौ। पौष्णौ। रजतनाभी इति रजतऽनाभी। वैश्वदेवाविति वै
श्वऽदेवौ। पिशङ्गौ। तूपरौ। मारुतः। कल्माषः। आग्नेयः। कृष्णः। अजः। सा
रस्वती। मेषी। वारुणः। पेत्वः॥ २१॥ श्री॥ ॥ इति पदपाठे एकोनत्रिंशत्तमो
ध्यायः॥ ॥ हरिः॥ ॐ मु॥ अस्य। अजरासः। दमां। अरित्राः। अर्चद्धूमा
सऽइत्यर्चत्ऽधूमासः। अग्नयः। पावकाः। श्वितीचयः। श्वात्रासः। भुरण्य
वः। वनर्षदः। वनसद इति वनऽसदः। वायवः। न। सोमाः॥ १॥ हरयः।
धूमकेतव इति धूमऽकेतवः। वातजूता इति वातऽजूताः। उप। द्यवि।

॥२०॥

यतंते। पृथक्। अग्नयः॥२॥ यज। नः। मित्रावरुणा। यज। देवान्। ऋतं। बृह
त्। अग्ने। यक्षि। स्वं। दमं॥३॥ द्वे इति द्वे। विरूपे इति विऽरूपे। चरतः। स्वर्थे इति
सुऽअर्थे। अन्यान्ये सन्याऽअन्या। वत्सं। उप। धापयेते इति धापयते। हरिः।
अन्यस्यां। भवति। स्वधावानिति स्वधाऽवान्। शुक्रः। अन्यस्यां। ददृशे। सु
वर्चा इति सुऽवर्चाः॥४॥ त्रीणि। शता। त्री। सहस्राणि। अग्निं। त्रिंशत्। च।
व। देवाः। नव। च। असपर्यन्। औक्षन्। घृतैः। अस्तृणन्। बर्हिः। अस्मै। आ
त्। इत्। होतारं। नि। असादयंत॥५॥ अग्निः। वृत्राणि। जंघनत्। द्रवि
णस्युः। विपन्यया। समिद्ध इति सं ऽ इद्धः। शुक्रः। आहुत इत्याऽहुतः॥६॥ वि

॥२०॥

श्वेभिः। सोम्यं। मधु। अग्ने। इंद्रेण। वायुना। पिब। मित्रस्य। धामभिरिति धा
मऽभिः॥ ७॥ आ। यत्। इषे। नृपतिमिति नृऽपतिं। तेजः। आ। नट्। सुचि।
रेतः। निऽसिक्तं। निसिक्तमिति निऽसिक्तं। द्यौः। अभीके। अग्निः। शर्द्धं। अनव
द्यं। युवानं। स्वाध्यमिति सुऽआध्यं। जनयत्। सूदयत्। च॥ ८॥ अग्ने।
शर्द्ध। महते। सौभगाय। तव। द्युम्नानि। उत्तमानीत्युत्ऽतमानि। संतु। सं।
जास्पत्यं। जाःपत्यमिति जाःऽपत्यं। सुयममिति सुऽयमं। आ। कृणुष्व। शत्रू
यतां। शत्रूयतामिति शत्रुऽयतां। अभि। तिष्ठ। महांसि॥ ९॥ त्वां। हि। मंद्र
तममिति मंद्रऽतमं। अर्कशोकैरित्यर्कऽशोकैः। ववृमहे। महि। नः। श्रोषि।

॥२१॥

अग्ने । इं इं । न । हा । श्रावसा । देवता । वासुं । रणंति । राधसा । नृतमाइति नृऽ
तमाः ॥ १० ॥ त्वेइति त्वे । अग्ने । स्वाहुतेति सुऽआहुत । प्रियासः । संतु । सूरयः ।
यंतारः । ये । मघवानइति मघऽवानः । जनानां । ऊर्वां । दयंत । गोनां ॥ ११ ॥ श्रुधि ।
श्रुत्कर्णेति श्रुत्ऽकर्ण । वन्हिभिरिति वन्हिऽभिः । देवैः । अग्ने । सयावभिरिति
सयावऽभिः । आ । सीदंतु । बर्हिषि । मित्रः । अर्यमा । प्रातर्यावाणः । प्रातर्या
वानइति प्रातःऽयावानः । अध्वरं ॥ १२ ॥ विश्वेषां । अदितिः । यज्ञियानां । विश्वे
षां । अतिथिः । मानुषाणां । अग्निः । देवानां । अवः । आवृणानइत्याऽवृणानः ।
सुमृळीकइति सुऽमृळीकः । भवतु । जातवेदाइति जातऽवेदाः ॥ १३ ॥ महः ।

॥२१॥

अग्नेः। समिधानस्येति संऽइधानस्य। त्रामणि। अनागाः। मित्रे। वरुणे। स्व
स्तये। श्रेष्ठे। स्याम। सवितुः। सवीमनि। तत्। देवानां। अवः। अद्य। वृणीमहे।
।१४।। आपः। चित्। पिप्युः। स्तर्यः। न। गावः। नक्षन्। ऋतं। जरितारः। ते।
इंद्र। याहि। वायुः। न। नियुत इतिनिऽयुतः। नः। अच्छ। त्वं। हि। धीभिः। द
यसे। वि। वाजान्। ।१५।। गावः। उप। अवत। अवतं। मही इतिमही। यज्ञ
स्य। रप्सुदा। उभा। कर्णा। हिरण्यया। ।१६।। यत्। अद्य। सूरे। उदीत इत्युत्ऽइ
ते। अनागाः। मित्रः। अर्यमा। सुवाति। सविता। भगः। ।१७।। आ। सुते। सिंच
त। श्रियं। रोदस्योः। अभि।श्रियमित्यभिऽश्रियं। रसा। दधीत। वृषभं। ।१८।।

आतिष्ठंतमित्याऽतिष्ठंतं। परि। विश्वे। अभूषन्। श्रियः। वसानः। चरति।
स्वरोचिरिति स्वऽरोचिः। महत्। तत्। वृष्णः। असुरस्य। नाम। आ। विश्वरू
प इति विश्वऽरूपः। अमृतानि। तस्थौ॥१९॥ प्र। वः। महे। मंदमानाय। अंध
सः। अर्च। विश्वानराय। विश्वाभुवे। विश्वभुव इति विश्वऽभुवे। इंद्रस्य। य
स्य। सुमखमिति सुऽमखं। सहः। महि। श्रवः। नृम्णं। च। रोदसी इति रोद
सी। सपर्यतः॥२०॥ वृहन्। इत्। इध्मः। एषां। भूरि। शस्तं। पृथुः। स्वरुः।
॥२१॥ इंद्र। आ। इहि। मत्सि। अंधसः। विश्वेभिः। सोमपर्वभिरिति सोम
पर्वऽभिः। महान्। अभिष्टिः। ओजसा॥२२॥ इंद्रः। वृत्रं। अवृणोत्। शर्द्धनी

तिरिति तिराऽर्ह्द्यऽनीतिः। प्र। मायिनां। अमीनात्। पर्षणीतिः। वर्पऽनीतिरि
तिं वर्पऽनीतिं। अहन्। व्यंऽसमिति विऽअंऽसं। उग्राधन्वा। वनेषु। आविः।
धेनाः। अकृणोत्। राम्याणां॥ २५॥ कुतः। त्वं। इंद्र। माहिनः। सन्। एकः। या
सि। सत्पत इति सत्ऽपते। किं। ते। इत्था। संपृच्छसे। समराण इति संऽअरा
णः। शुभानैः। वोचेः। तत्। नः। हरिव इति हरिऽवः। यत्। ते। अस्मे इत्यस्मे॥ २६॥
आ। तत। ते। इंद्र। आयवः। पनंत। अभि। ये। ऊर्वं। गोमंतमिति गोऽमंतं।
तितृत्सान्। सकृत्वमिति सकृत्ऽत्वं। ये। पुरुपुत्रामिति पुरुऽपुत्रां। महीं।
सहस्रधारामिति सहस्रऽधारां। बृहतीं। दुदुक्षन्। दुधुक्षन्मिति दुधुक्ष

न्नी॥२५॥ इमां। ते। धियं। प्र। भरे। महः। महीं। अस्य। स्तोत्रे। धिषणा। यत्। ते। आन
जे। तं। उत्सव इत्युत्ऽसवे। च। प्रसव इति प्रऽसवे। च। सासहिं। ससहिमिति ससहिं।
इंद्रं। देवासः। शवसा। अमदन्। अनु॥२६॥ विभ्राडिति विऽभ्राट्। बृहत्। पिब
तु। सोम्यं। मधु। आयुः। दधत्। यज्ञपताविति यज्ञऽपतौ। अविह्रुतमित्यविऽ
ह्रुतं। वातजूत इति वातऽजूतः। यः। अभिरक्षतीत्यभिऽरक्षति। त्मना। प्रजा
इति प्रऽजाः। पुपोष। पुरुधा। वि। राजति॥२७॥ येन। पावक। चक्षसा। भुरण्यं
तं। जनान्। अनु। त्वं। वरुण। पश्यसि॥२८॥ देव्यौ। अध्वर्यू इत्यध्वर्यू। आ।
गतं। रथेन। सूर्यत्वचेति सूर्यऽत्वचा। मध्वा। यज्ञं। सं। अंजाथेर सं अंजाथे॥२९॥

आ। नः। इळाभिः। विदथे। सुशस्तीति सुऽशस्ति। विश्वानरः। सविता। देवः।
एतु। अपि। यथा। युवानः। मत्सथ। नः। विश्वं। जगत्। अभिपित्व इत्यभिऽ
पित्वे। मनीषा॥२०॥ यत्। अद्य। कत्। च। वृत्रहन्निति वृत्रऽहन्। उत्ऽअगाः। इ
त्युत्ऽअगाः। अभि। सूर्य। सर्वं। तत्। इंद्र। ते। वशे॥२॥ तरणिः। विश्व
दर्शत इति विश्वऽदर्शतः। ज्योतिष्कृत्। ज्योतिःकृदिति ज्योतिःऽकृत्। अ
सूर्य॥ सि। विश्वं। आ। भासि। रोचनं॥३॥ तत्। सूर्यस्य। देवत्वमिति देवऽत्वं।
तत्। महित्वमिति महिऽत्वं। मध्या। कर्तोः। विततमिति विऽततं। सं। जभा
र। यदा। इत्। अयुक्त। हरितः। सधस्थादिति सधऽस्थात्। आत्। रात्री।

५८

वासः। तनुते। सिमस्मै॥२३॥ तत्। मित्रस्य। वरुणस्य। अभिचक्ष इत्यभिऽच
क्षे। सूर्यः। रूपं। कृणुते। द्योः। उपस्थ इत्युपऽस्थे। अनंतं। अन्यत्। रुशत्।
अस्य। पाजः। कृष्णं। अन्यत्। हरितः। सं। भरंति॥२४॥ बट्। महान्। असि।
सूर्य। बट्। आदित्य। महान्। असि। महः। ते। सतः। महिमा। पनस्यते। अ
द्धा। देव। महान्। असि॥२५॥ बट्। सूर्य। श्रवसा। महान्। असि। सत्रा। दे
व। महान्। असि। मह्ना। देवानां। असुर्यः। पुरोहित इति पुरःऽहितः। विभ्वि
ति विऽभु। ज्योतिः। अदाभ्यं॥२६॥ श्रायंत इवेति श्रायंतःऽइव। सूर्यं। विश्वा। ॥५८॥
इत्। इंद्रस्य। भक्षत। वसूनि। जाते। जनमाने। ओजसा। प्रति। भागं। न। दीधि

मो॥३॥ अद्य। देवाः। उदितेत्युत्ऽइता। सूर्यस्य। निः। अंहसः। पिपृता।
निः। अवद्यात्। तत्। नः। मित्रः। वरुणः। मामहंतां। ममहंतामिति ममहं
तां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः॥६॥ आ। कृष्णेन। रजसा। वर्त
मानः। निवेशयन्निति निऽवेशयन्। अमृतं। मर्त्यं। च। हिरण्ययेन। स
विता। रथेन। आ। देवः। याति। भुवनानि। पश्यन्॥१॥ प्र। वा। वृजेव
वृज इति ववृजे। सुप्रया इति सुऽप्रयाः। बर्हिः। एषां। आ। विश्पती वा। वि
श्पती इवेति विश्पतीऽइव। बीरीटे। इयाते इतीयाते। विशां। अक्तोः। उष
सः। पूर्वहूता इति पूर्वऽहूतौ। वायुः। पूषा। स्वस्तये। नियुत्वान्॥७॥ इंद्रवा

॥१५॥ यू इतींद्रवायू। बृहस्पतिं। मित्रा। अग्निं। पूषणं। भगं। आदित्यान्। मारु
तं। गणं॥३॥ वरुणः। प्रावितेति प्रऽअविता। भुवत्। मित्रः। विश्वाभिः।
ऊतिभिरित्यूतिऽभिः। करतां। नः। सुराधस इति सुऽराधसः॥४॥ अधि।
नः। इंद्र। एषां। विष्णो इति विष्णो। सजात्यानामिति सऽजात्यानां। इत। मरु
तः। अश्विना॥५॥ अग्ने। इंद्र। वरुण। मित्र। देवाः। शर्धः। प्र। यंत। मारु
त। उत। विष्णो इति विष्णो। उभा। नासत्या। रुद्रः। अध। ग्नाः। पूषा। भगः।
सरस्वती। जुषंत॥६॥ इंद्राग्नी इतींद्राग्नी। मित्रावरुणा। अदितिं। स्वरि
ति स्वः। पृथिवीं। द्यां। मरुतः। पर्वतान्। अपः॥ हुवे। विष्णुं। पूषणं। ब्रह्मणः। ॥१५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पतिं। भगं। नु। नराऽशंसं। सवितारं। उत। त्ये॥ २५॥ अस्मे इत्यस्मे। रुद्राः। मेहना।
पर्वतासः। वृत्रहत्ये इति वृत्रऽहत्ये। भरहूताविति भरऽहूतौ। सजोषा इति
सऽजोषाः। यः। शंसते। स्तुवते। धायि। पज्रः। इंद्रज्येष्ठा इतींद्रऽज्येष्ठाः। अ
स्मान्। अवंतु। देवाः॥ २६॥ अर्वांचः। अद्य। भवत। यजत्राः। आ। वः। हार्दि।
भयमानः। व्ययेयं। त्राध्वं। नः। देवाः॥ निजुर इति निऽजुरः। वृकस्य। त्रा
ध्वं। कर्त्तात्। अवपद इत्यवऽपदः। यजत्राः॥ २७॥ विश्वे। देवाः। शृणुत। इ
मं। हवं। मे। ये। अंतरिक्षे। ये। उप। द्यवि। स्थ। ये। अग्निजिह्वा इत्यग्निऽ
जिह्वाः। उत। वा। यजत्राः। आसद्येत्याऽसद्य। अस्मिन्। बर्हिषि। माद

॥२६॥ यध्वं॥४८॥ देवेभ्यः। हि। प्रथमं। यज्ञियेभ्यः। अमृतत्वमित्यमृतऽत्वं। सु
वसि। भागं। उत्तममित्युत्ऽतमं। आत्। इत्। दामानं। सवितः। वि। ऊर्णु
षे। अनूचीना। जीविता। मानुषेभ्यः॥४९॥ प्र। वायुं। अच्छ। बृहती। म
नीषा। बृहद्रयिमिति बृहत्ऽरयिं। विश्ववारमिति विश्वऽवारं। रथप्रा
मिति रथऽप्रां। द्युतद्यामेति द्युतत्ऽयामा। नियुत इति निऽयुतः। पत्यमा
नः। कविः। कविं। इयक्षसि। प्रयज्यो इति प्रऽयज्यो॥५०॥ मित्रं। हुवे। पूत
दक्षमिति पूतऽदक्षं। वरुणं। च। रिशादसं। धियं। घृताचीं। साधन्ता॥५१॥
दस्रा। युवाकवः। सुताः। नासत्या। वृक्तबर्हिष इति वृक्तऽबर्हिषः। आ। ॥२६॥

याता। रुद्रवर्त्तनी इति रुद्रऽवर्त्तनी ॥५२॥ विदत्। यदि। सरमा। रुग्णं। अ
द्रैः। महि। पाथः। पूर्व्यं। सध्र्यक्। करिति क्वः। अग्रं। नयत्। सुपदी इति सुऽ
पदी। अक्षराणां। अच्छ। रवं। प्रथमा। जानती। गात् ॥५३॥ नहि। स्पत्।
अविदन्। अन्यं। अस्मात्। वैश्वानरात्। पुरएतारमिति पुरःऽएतारं।
अग्नेः। आ। ईं। एवं। अवृधन्। अमर्ताः। अमर्त्यं। वैश्वानरं। क्षेत्रजि
त्यायेति क्षेत्रऽजित्याय। देवाः ॥५४॥ उग्रा। विघनिनेति विऽघनिना।
म्रधः। इंद्राग्नी इतीं द्राग्नी। हवामहे। ता। नः। मृळातः। ईदृशे ॥५५॥
उप। अस्मै। गायत। नरः। पवमानाय। इंदवे। अभि। देवान्। इयक्षते॥

॥१८॥

॥५६॥ ये । त्वा । अहिहत्य इत्यहिऽहत्ये । मघवन्निति मघऽवन् । अवर्द्धन् ।
ये । शांबरे । हरिव इति हरिऽवः । ये । गईष्टाइति गोऽइष्टौ । ये । त्वा । नूनं । अ
नुमदंतीत्यनुऽमदंति । विप्राः । पिब । इंद्र । सोमं । सगण इति सऽगणः । म
रुद्भिरिति मरुत्ऽभिः ॥५७॥ जनिष्ठाः । उग्रः । सहसे । तुराय । मंद्रः । ओ
जिष्ठः । बहुलाभिमान इति बहुलऽअभिमानः । अवर्द्धन् । इंद्रं । मरुतः ।
चित् । अत्र । माता । यत् । वीरं । दधनत् । धनिष्ठा ॥५८॥ आ । तु । नः । इंद्र । वृ
त्रहन्निति वृत्रऽहन् । अस्माकं । अर्द्धं । आ । गहि । महान् । महीभिः । ऊ ॥१८॥
तिभिरित्यूतिऽभिः ॥५९॥ त्वं । इंद्र । प्रतूर्तिष्विति प्रऽतूर्तिषु । अभि । वि

श्वाः। असि। स्पृधः। अशस्तिहेत्यशस्तिऽहा। जनिता। विश्वतूरिति
विश्वऽतूः। असि। त्वं। तूर्य। तरुष्यतः॥६०॥ अनु। ते। शुष्मं। तुरयंतं।
ईयतुः। क्षोणी इति क्षोणी। शिशुं। न। मातरा। विश्वाः। ते। स्पृधः। श्नथ
यंत। मन्यवे। वृत्रं। यत्। इंद्र। तूर्वसि॥६१॥ अदब्धेभिः। सवितरिति स
वितः। पायुभिरिति पायुऽभिः। त्वं। शिवेभिः। अद्य। परि। पाहि। नः। गयं।
हिरण्यजिह्व इति हिरण्यऽजिह्व। सुविताय। नव्यसे। रक्ष। माकिः।
नः। अघशंस इत्यघऽशंसः। ईशत॥६२॥ प्र। वीरयेति वीरऽया।
शुचयः। दद्रिरे। वां। अध्वर्युभिरित्यध्वर्युऽभिः। मधुमंत इति मधुऽमं

॥१८॥

तः।सुतासः।वह।वायोइतिवायो।नियुतइतिनिऽयुतः।याहि।अछ।पिब।
सुतस्य।अंधसः।मदाय॥६३॥काव्ययोः।आजानेष्वित्याऽजानेषु।क्रत्वा।
दक्षस्य।दुरोणे।रिशादसा।सधस्थेष्वितिसधऽस्थे।आ॥६४॥तिरश्ची
नः।विततइतिविऽततः।रश्मिः।एषां।अधः।स्वित्।आसीत्।उपरि।
स्वित्।आसीत्।रेतोधाइतिरेतःऽधाः।आसन्।महिमानः।आसन्।
स्वधा।अवस्तात्।प्रयतिरिति प्रऽयतिः॥६५॥परस्तात्॥६५॥आ।रोद
सीइतिरोदसी।अपृणत्।आ।स्वः।महत्।जातं।यत्।एनं।अपसः।
अधारयन्।सः।अध्वराय।परि।नीयते।कविः।अत्यः।न।वाजसात

॥१८॥

य इतिवाजऽसातये।चनोहित इतिचनःऽहितः॥६६॥उक्थेभिः।वृत्रहं
तमेति वृत्रहन्ऽतमा।या।मंदाना।चित्।आ।गिरा॥आंगूषेः।आवि
वासत इत्याऽविवासतः॥उप।नः।सूनवः।गिरः।शृण्वंतु।अमृतस्य।
ये।सुमृळीका इतिसुऽमृळीकाः।भवंतु।नः॥६८॥ब्रह्माणि।मे।मतयः।
शं।सुतासः।शुष्मः।इयर्ति।प्रभृत इति प्रऽभृतः।मे।अद्रिः।आ।शा
सते।प्रति।हर्यंति।उक्था।इमा।हरी इति हरी।वहतः।ता।नः।अच्छ॥
६९॥अनुत्तं।आ।ते।मघवन्निति मघऽवन्।नकिः।नु।न।त्वावानिति त्वाऽ
वान्।अस्ति।देवता।विदानः॥न।जायमानः।नशते।न।जातः।यानि।कृ

॥१२॥

रिष्या । कृणुहि । प्रवद्धेति प्रऽवद्ध ॥७०॥ तत् । इत् । आस । भुवनेषु । ज्येष्ठं ।
यतः । जज्ञे । उग्रः । त्वेषनृम्णः इति त्वेषऽनृम्णः ॥ सद्यः । जज्ञानः । नि । रिणा
ति । शत्रून् । अनु । यं । विश्वे । मदंति । ऊमाः ॥७१॥ इमाः । ऊँ इति । त्वा । पु
रूवसो । पुरूवसो इति पुरुऽवसो । गिरः । वर्धंतु । याः । मम ॥ पावकवर्णा
इति पावकऽवर्णाः । शुचयः । विपश्चित इति विपःऽचितः । अभि । स्तोमैः ।
अनूषत ॥७२॥ यस्य । अयं । विश्वः । आर्यः । दासः । शेवधिपा इति शेव
धिऽपाः । अरिः ॥ तिरः । चित् । आर्ये । रुशमे । पवीरवि । तुभ्य । इत् । सः ।
अज्यते । रयिः ॥७३॥ अयं । सहस्रं । ऋषिभिरिति ऋषिऽभिः । सहस्कृतः ।

॥१२॥

सहः कृत इति सहःऽकृतः। समुद्र इवेति समुद्रःऽइव। पप्रथे॥ सत्युः। सः।
अस्य। महिमा। गृणे। शवः। यज्ञेषु। विप्रराज्य इति विप्रऽराज्ये॥७५॥ ॥इ
ति पदपाठे द्वात्रिंशमोध्यायः॥ हरिः॥ ॐम्॥ यत्। जाग्रतः। दूरं। उदै
ति उत्ऽऐति। दैवं। तत्। ऊँ इस्कं। सुप्तस्य। तथा। एव। एति॥ दूरंगममिति
दूरंऽगमं। ज्योतिः। एकं। तत्। मे। मनः। शिवसंकल्पमिति शिवऽसंक
ल्पं॥१॥ पितुं। नु। स्तोषं। महः। धर्माणं। तविषीं। यस्य। त्रितः। वि। ओज
सा। वृत्रं। विपर्वमिति विऽपर्वं। अर्दयत्॥२॥ अनु। इत्। नु। अनुमत इत्यनु
मते। मन्यासै। च। नः। कृधि॥ क्रत्वे। दक्षाय। नः। हिनु। प्र। नः। आयूंष्

।शं।

ज्योतिषां

अस्तुं

सं

षि। ता। रिषः॥३॥ सिनीवालि। पृथुष्टुके। पृथुस्तुक इति पृथुऽस्तुके। या।
देवानां। असि। स्वसा। जुषस्व। हव्यं। आहुतमित्याऽहुतं। प्रजामिति प्रऽ
जां। देवि। दिदिड्ढि। नः॥४॥ पंच। नद्यः। सरस्वतीं। अपि। यंति। सस्रो
तस इति सऽस्रोतसः॥ सरस्वती। तु। पंचधा। सो इति सो। देशे। अभवत्।
सरित्॥५॥ त्वं। अग्ने। प्रथमः। अंगिराः। ऋषिः। देवः। देवानां। अभवः।
शिवः। सखा। तव। व्रते। कवयः। विद्मनापस इति विद्मनाऽअपसः। अ
जायंत। मरुतः। भ्राजदृष्टय इति भ्राजत्ऽऋष्टयः॥६॥ त्वं। नः। अग्ने। त
व। देव। पायुभिरिति पायुऽभिः। मघोनः। रक्ष। तन्वः। च। वंद्य। त्राता। तो

कस्य। तनये। गवां। असि। अनिमिषमित्यनिऽमिषं। रक्षमाणः। तव। व्रते।७।।
उत्तानायां। अव। भर। चिकित्वान्। सद्यः। प्रवीतेति प्रऽवीता। वृषणं। जजान।।
अरुषस्तूपइत्यरुषऽस्तूपः। रुशत्। अस्य। पाजः। इळायाः। पुत्रः। वयु
ने। अजनिष्ट।।८।। इळायाः। त्वा। पदे। वयं। नाभा। पृथिव्याः। अधि। जातवे
दइतिजातऽवेदः। नि। धीमहि। अग्ने। हव्याय। वोल्हवे।।९।। प्र। मन्महे। श
वसानाय। शूषं। आंगूषं। गिर्वणसे। अंगिरस्वत्। सुवृक्तिभिरितिसुवृ
क्तिऽभिः। स्तुवते। ऋग्मियाय। अर्चाम। अर्कं। नरे। विश्रुतायेति विऽश्रुताय।।
।।१०।। प्र। वः। महे। नमः। भरध्वं। आंगूष्यं। शवसानाय। साम। येन। नः। र

वै। पितरः। पदज्ञा इति पदऽज्ञाः। अर्चंतः। अंगिरसः। गाः। अविंदन्॥ १३॥ इछ
ति। त्वा। सोम्यासः। सखायः। सुन्वंति। सोमं। दधति। प्रयांसि॥ तितिक्षंते। अ
भिशस्तिमित्यभिऽशस्तिं। जनानां। इंद्र। त्वत्। आ। कः। चन। हि। प्रकेत इति प्र
केतः॥ १४॥ न। ते। दूरे। परमा। चित्। रजांसि। आ। तु। प्र। याहि। हरिव इति
हरिऽवः। हरिभ्यामिति हरिऽभ्यां॥ स्थिराय। वृष्णे। सवना। कृता। इमा। युक्ताः।
ग्रावाणः। समिधान इति संऽइधाने। अग्नौ॥ १५॥ अषाल्हं। युत्स्विति युत्ऽ
सु। पृतनासु। पप्रिं। स्वर्षां। स्वस्सामिति स्वःऽसां। अप्सां। वृजनस्य। गोपां॥
भरेषुजामिति भरेषुऽजां। सुक्षितिमिति सुऽक्षितिं। सुश्रवसमिति सुऽश्र

सं।७गा।

वंस। जयंतं। त्वां। अनु। मदेम। सोम॥१४॥ सोमः। धेनुं। सोमः। अर्वंतं। आशुं। सोमः।
वीरं। कर्मण्यं। ददाति। सादन्यं। सदन्यमिति सऽदन्यं। विदथ्यं। सभेयं। पितृश्रवण
मिति पितृऽश्रवणं। यः। ददाशत्। अस्मै॥१५॥ त्वं। इमाः। ओषधीः। सोम। विश्वाः।
गा। त्वं। अपः। अजनयः। त्वं। [illegible]। ततंथ। उरु। अंतरिक्षं। त्वं। ज्योतिषा। वि। तमः। व
वर्थ॥१६॥ देवेन। नः। मनसा। देव। सोम। रायः। भागं। सहसावन्निति सहसाऽ
वन्। अभि। युध्य। मा। त्वा। आ। तनत्। ईशिषे। वीर्यस्य। उभयेभ्यः। प्र। चिकि
त्स। गोऽइष्टाविति गोऽइष्टौ॥१७॥ अष्टौ। वि। अख्यत्। ककुभः। पृथिव्याः। त्री। ध
न्व। योजना। सप्त। सिंधून्। हिरण्याक्ष इति हिरण्यऽअक्षः। सविता। देवः। आ।

॥२१॥ भगान्। दधत्। रत्ना। दाशुषे। वार्याणि॥१८॥ हिरण्यपाणिरिति हिरण्यऽपा
णिः। सविता। विचर्षणिरिति विऽचर्षणिः। उभे इत्युभे। द्यावापृथिवी इति द्या
वापृथिवी। अंतः। ईयते॥ अप। अमीवां। बाधते। चेति। सूर्यं। अभि। कृष्णे
न। रजसा। द्यां। ऋणोति॥१९॥ हिरण्यहस्त इति हिरण्यऽहस्तः। असुरः। सु
नीथ इति सुऽनीथः। सुमृळीक इति सुऽमृळीकः। स्ववानिति स्वऽवान्। यातु।
अर्वाङ्॥ अपसेधन्निति अपऽसेधन्। रक्षसः। यातुधानानिति यातुऽधाना
न्। अस्थात्। देवः। प्रतिदोषमिति प्रतिऽदोषं। गृणानः॥२०॥ ये। ते। पंथाः। ॥२२॥
सवितरिति सवितः। पूर्व्यासः। अरेणवः। सुकृता इति सुऽकृताः। अंतरिक्षे॥

तेभिः । नः । अद्य । पथिभिरिति पथिऽभिः । सुगेभिरिति सुऽगेभिः । र
क्ष । च । नः । अधि । च । ब्रूहि । देव ।२१। उभा । पिबतं । अश्विना । उभा ।
नः । शर्म । यच्छतं । अविद्रियाभिः । ऊतिभिरित्यूतिऽभिः ।२२। अप्न
स्वतीं । अश्विना । वाचं । अस्मे इत्यस्मे । कृतं । नः । दस्रा । वृषणा । मनी
षां । अद्यूत्ये । अवसे । नि । ह्वये । वां । वृधे । च । नः । भवतं । वाजसाता
इति वाजऽसातौ ।२३। द्युभिरिति द्युऽभिः । अक्तुभिरित्यक्तुऽभिः । प
रि । पातं । अस्मान् । अरिष्टेभिः । अश्विना । सौभगेभिः ।।२४।। आ । सं
त्रि । पार्थिवं । रजः । पितुः । अप्रायि । धामभिरिति धामऽभिः । दिवः ।

॥२३॥

सदोहसी । बृहती । वि । तिष्ठसे । आ । त्वेषं । वर्त्तते । तमः ॥ २५ ॥ उषः । तत् । चित्रं । आ । भर । अस्मभ्यं । वाजिनीवतीति वाजिनीऽवति । येन । तोकं । च । तनयं । च । धामहे ॥ २६ ॥ प्रातर्जितमिति प्रातःऽजितं । भगं । उग्रं । हुवेम । वयं । पुत्रं । अदितेः । यः । विधर्त्तेति विऽधर्त्ता । आध्रः । चित् । यं । मन्यमानः । तुरः । चित् । राजा । चित् । यं । भगं । भक्षि । इति । आह ॥ २७ ॥ पूषन् । तव । व्रते । वयं । न । रिष्येम । कदा । चन । स्तोतारः । ते । इह । स्मसि ॥ २८ ॥ पथस्पथः । पथः पथ इति पथःऽपथः । परिपतिमिति परिऽपतिं । वचस्या । कामेन । कृतः । अभि । आनट् । अर्कं ॥ सः ।

॥२३॥

नः। शासतु। शुरुधः। त्वंजाया इति त्वं ऽ जायाः॥ धियंधियमिति धियंऽधि
यं। सीषधाति। सीसधातीति सीसधाति। प्र। पूषा॥ १९॥ त्रीणि। पदा।
वि। चक्रमे। विष्णुः। गोपाः। अदाभ्यः॥ अतः। धर्माणि। धारयन्॥ २०॥
तत्। विप्रासः। विपन्यवः। जागृवांसइति जागृऽवांसः। सं। इंध
ते॥ विष्णोः। यत्। परमं। पदं॥ २१॥ घृतवती इति घृतऽवती। भुवना
नां। अभिश्रियेत्यभिऽश्रिया। उर्वीइत्युर्वी। पृथ्वीइति पृथ्वी। मधुदु
घेइति मधुऽदुघे। सुपेशसेति सुऽपेशसा॥ द्यावापृथिवी इति द्या
वाऽपृथिवी। वरुणस्य। धर्मणा। विष्कभिते। विस्कभिते इति वि। ऽस्कभिते॥

॥२८॥ अजरे इति सजरे । भूरिरेतसेति भूरिऽरेतसा ॥७४॥ यो । नः । सपत्ना इति सऽ
पत्नाः । अप । ते । भवंतु । इंद्राग्निभ्यामितींद्राग्निऽभ्यां । अव । बाधामहे । ता
न् ॥ वसवः । रुद्राः । आदित्याः । उपरिस्पृशमित्युपरिऽस्पृशं । मा । उग्रं । चे
त्तारं । अधिराजमित्यधिऽराजं । अक्रन् ॥७५॥ आ । नासत्या । त्रिभिरिति
त्रिऽभिः । एकादशैः । इह । देवेभिः । यातं । मधुपेयमिति मधुऽपेयं । अश्वि
ना । प्र । आयुः । तारिष्टं । निः । रपांसि । मृक्षतं । सेधतं । द्वेषः । भवतं । स
चाभुवेति सचाऽभुवा ॥७६॥ एषः । वः । स्तोमः । मरुतः । इयं । गीः । मांदा
र्यस्य । मान्यस्य । कारोः । आ । इषा । यासीष्ट । तन्वे । वयां । विद्याम । इषं । ॥२८॥

ष्ठजनं । जीरदानुमिति जीरऽदानुं ॥ ७५ ॥ सहस्तोमा इति सहऽस्तोमाः । सह
छंदस इति सहऽछंदसः । आवृत इत्याऽवृतः । सहप्रमा इति सहऽप्रमाः । ऋ
षयः । सप्त । दैव्याः । पूर्वेषां । पंथां । अनुदृश्येत्यनुऽदृश्य । धीराः । अन्वालेभि
र इत्यनुऽआलेभिरे । रथ्यः । न । रश्मीन् ॥ ७६ ॥ आयुष्यं । वर्चस्यं । रायः । पोषं ।
औद्भिदं ॥ इदं । हिरण्यं । वर्चस्वत् । जैत्राय । आ । विशतात् । ऊं इत्यूं । मां ॥ ७७ ॥
न । तत् । रक्षांसि । न । पिशाचाः । तरंति । देवानां । ओजः । प्रथमजमिति प्र
थमऽजं । एतत् ॥ यः । बिभर्ति । दाक्षायणं । हिरण्यं । सः । देवेषु । कृणुते । दीर्घं ।
आयुः । सः । मनुष्येषु । कृणुते । दीर्घं । आयुः ॥ ७८ ॥ यत् । आ । अबध्नन् । दाक्षा

यणाः । हिरेण्यं । शतानीकायेति शत ऽ अनीकाय । सुमनस्यमाना इति सुऽमनस्य
मानाः । तनूः । मे । आ । बध्नामि । शतशारदायेति शत ऽ शारदाय । आयुष्मान् । रजद
ष्टिरिति जरत् ऽ अष्टिः । यथा । असत् ॥ ७२ ॥ उत । नः । अहिः । बुध्न्यः । शृणोतु । अ
जः । एकपादित्येक ऽ पात् । पृथिवी । समुद्रः ॥ विश्वे । देवाः । ऋतावृधः । ऋतवृ
ध इत्यृत ऽ वृधः । हुवानाः । स्तुताः । मंत्राः । कविशस्ता इति कवि ऽ शस्ताः । अवं
तु ॥ ७३ ॥ इमाः । गिरः । आदित्येभ्यः । घृतस्नूरिति घृत ऽ स्नूः । सनात् । राजभ्य
इति राज ऽ भ्यः । जुह्वा । जुहोमि ॥ शृणोतु । मित्रः । अर्यमा । भगः । नः । तुविजा
त इति तुवि ऽ जातः । वरुणः । दक्षः । अंशः ॥ ७४ ॥ सप्त । ऋषयः । प्रतिहिताः

तिप्रतिऽहिताः। शरीरे। सप्त। रक्षंति। सदं। अप्रमादमित्यप्रऽमादं॥ सप्त। आ
पः। स्वपतः। लोकं। ईयुः। तत्र। जाग्रतः। अस्वप्नजाइत्यस्वप्नऽजौ। सत्रसदाइ
तिसत्रऽसदौ। च। देवौ॥ ५५॥ उत्। तिष्ठ। ब्रह्मणः। पते। देवयंतइति देवऽयंतः।
त्वा। ईमहे॥ उप। प्र। यंतु। मरुतः। सुदानव इति सुऽदानवः। इंद्र। प्राशूः। भव।
सचा॥ ५६॥ प्र। नूनं। ब्रह्मणः। पतिः। मंत्रं। वदति। उक्थ्यं॥ यस्मिन्। इंद्रः। व
रुणः। मित्रः। अर्यमा। देवाः। ओकांसि। चक्रिरे॥ ५७॥ ब्रह्मणः। पते। त्वं। अ
स्य। यंता। सूक्तस्येति सुऽउक्तस्य। बोधि। तनयं। च। जिन्व॥ विश्वं। तत्। भ
द्रं। यत्। अवंति। देवाः। बृहत्। वदेम। विदथे। सुवीरा इति सुऽवीराः॥ ५८॥ ६॥

॥ ॥इति पदपाठे त्रयस्त्रिंशत्तमोऽध्यायः॥ ॥हरिः॥ ॐ॥ विश्वानि। देव।
सवितः। दुरितानीति दुःऽइतानि। परा। सुव॥ यत्। भद्रं। तत्। नः। आ। सुव।
॥१॥ विभक्तारमिति विऽभक्तारं। हवामहे। वसोः। चित्रस्य। राधसः॥ सविता
रं। नृचक्षसमिति नृऽचक्षसं॥२॥ ब्रह्मणे। ब्राह्मणं। क्षत्राय। राजन्यं। मरु
द्भ्य इति मरुत्ऽभ्यः। वैश्यं। तपसे। शूद्रं। तमसे। तस्करं। नारकाय। वीरहणं।
वीरहनमिति वीरऽहनं॥ पाप्मने। क्लीबं। आक्रयायाऽइत्याऽक्रयायै। अयो
गूं। कामाय। पुंश्चलूं। अतिकुष्टायेत्यतिऽकुष्टाय। मागधं॥३॥ नृत्ताय।
सूतं। गीताय। शैलूषं। धर्माय। सभाचरमिति सभाऽचरं। नरिष्ठायै। भी

मत्लं।। नर्माय। रेभं। हसाय। कारिं। आनंदायेत्याऽनंदाय। स्त्रीषखं। स्त्रीस
खमिति स्त्रीऽसखं। प्रमद इति प्रऽमदे। कुमारीपुत्रमिति कुमारीऽपुत्रं।
मेधायै। रथकारमिति रथऽकारं। धैर्याय। तक्षाणं।।६।। तपसे। कौलालं।
मायायै। कर्मारं। रूपाय। मणिकारमिति मणिऽकारं। शुभे। वपं। शरव्या
यै। इषुकारमितीषुऽकारं। हेत्यै। धनुष्कारं। धनुःकारमिति धनुःऽ
कारं। कर्मणे। ज्याकारमिति ज्याऽकारं। दिष्टाय। रज्जुसर्जमिति रज्जुऽ
सर्जं। मृत्यवे। मृगयुमिति मृगऽयुं। अंतकाय। श्वनिनमिति श्वऽनि
नं।। नदीभ्यः। पौंजिष्टं। ऋक्षीकाभ्यः। नैषादं। नैसादमिति नैसादं।

पुरुषव्याघ्रायेति पुरुषऽव्याघ्राय।दुर्मदमिति दुःऽमदं।गंधर्वाप्सरोभ्य इति
गंधर्वाप्सरःऽभ्यः।व्रात्यं।प्रयुग्भ्य इति प्रयुक्ऽभ्यः।उन्मत्तमिति उत्ऽम
त्तं।सर्पदेवजनेभ्य इति सर्पऽदेवजनेभ्यः।अप्रतिपदमित्यप्रतिऽपदं।
अयेभ्यः।कितवं।ईर्यतायै।अकितवं।पिशाचेभ्यः।विदलकारीमिति वि
दलऽकारीं।यातुधानेभ्य इति यातुऽधानेभ्यः।कंटकीकारीमिति कंटकीऽ
कारीं।८।संधय इति संऽधये।जारं।गेहाय।उपपतिमित्युपऽपतिं।
आर्त्यै इत्याऽऋत्यै।परिवित्तमिति परिऽवित्तं।निर्ऋत्या इति निःऽऋत्यै। ॥२८
परिविविदानमिति परिऽविविदानं।अराध्यै।एदिधिषुःपतिमित्येदिधि

२७

पुःऽपतिं। निष्कृत्यै। निःऽकृत्या इति निःऽकृत्यै। पेशस्कारीं। पेशःकारीमिति
पेशःऽकारीं। संज्ञानायेति संऽज्ञानाय। स्मरकारीमिति स्मरऽकारीं।
प्रकामोद्यायेति प्रकामऽउद्याय। उपसदमित्युपऽसदं। वर्णाय। अनुरु
धमित्यनुऽरुधं। बलाय। उपदामित्युपऽदां।९। उत्सादेभ्य इत्युत्ऽसा
देभ्यः। कुब्जं। प्रमुद इति प्रऽमुदे। वामनं। द्वार्भ्य इति द्वाःऽभ्यः। स्रामं। स्व
प्नाय। अंधं। अधर्माय। बधिरं। पवित्राय। भिषजं॥ प्रज्ञानायेति प्रऽज्ञा
नाय। नक्षत्रदर्शमिति नक्षत्रऽदर्शं। आशिक्षाया इत्याऽशिक्षायै। प्रश्नि
नं। उपशिक्षाया इत्युपऽशिक्षायै। अभिप्रश्निनमित्यभिऽप्रश्निनं। मर्या

दाये। प्रश्नविवाकमिति प्रश्नऽविवाकं॥१२॥ अर्मेभ्यः। हस्तिपमिति हस्तिऽ
पं। जवाय। अश्वपमित्यश्वऽपं। पुष्ट्यै। गोपालमिति गोऽपालं। वीर्याय। अ
विपालमित्यविऽपालं। तेजसे। अजपालमित्यजऽपालं। इरायै। कीनाशं।
कीलालाय। सुराकारमिति सुराऽकारं। भद्राय। गृहपमिति गृहऽपं। श्रे
यसे। वित्तधमिति वित्तऽधं। आध्यक्ष्यायेत्याधिऽअक्षाय। अनुक्षत्तार
मित्यनुऽक्षत्तारं॥१३॥ भायै। दार्वाहारमिति दारुऽआहारं। प्रभाया इति
प्रऽभायै। अग्न्येधमित्यग्निऽएधं। ब्रध्नस्य। विष्टपाय। अभिषेक्तारं।
अभिसेक्तारमित्यभिऽसेक्तारं। वर्षिष्ठाय। नाकाय। परिवेष्टारमिति प

रिऽवेष्टारं। देवलोकायेति देवऽलोकाय। पेशितारं। मनुष्यलोकायेति म
नुष्यऽलोकाय। प्रकरितारमिति प्रऽकरितारं। सर्वेभ्यः। लोकेभ्यः। उपसे
क्तारमित्युपऽसेक्तारं। अवर्त्त्या इत्यवऽऋत्यै। वधाय। उपमन्थितारमि
त्युपऽमन्थितारं। मेधाय। वासःपल्पूलीमिति वासःऽपल्पूलीं। प्रकामा
येति प्रऽकामाय। रजयित्रीं॥१०॥ ऋतये। स्तेनहृदयमिति स्तेनऽहृदयं।
वैरहत्यायेति वैरऽहत्याय। पिशुनं। विविक्त्या इति विऽविक्त्यै। क्षत्तारं। औ
पद्रष्ट्र्यायेत्यौपऽद्रष्ट्र्याय। अनुक्षत्तारमित्यनुऽक्षत्तारं। बलाय। अनुच
रमित्यनुऽचरं। भूम्ने। परिष्कन्दं। परिस्कन्दमिति परिऽस्कन्दं॥ प्रियाय। प्रिय

वादिनमिति प्रियऽवादिनं। अरिष्ट्यै। अश्वसादमित्यश्वऽसादं। स्वर्गाये
तिस्वःऽगाय। लोकाय। भागदुघमिति भागऽदुघं। वर्षिष्ठाय। नाकाय। प
रिवेष्टारमिति परिऽवेष्टारं॥११॥ मन्यवे। अयस्तापमित्ययःऽतापं। क्रोधा
य। निसरमिति निऽसरं। योगाय। योक्तारं। शोकाय। अभिसर्त्तारमित्य
भिऽसर्त्तारं। क्षेमाय। विमोक्तारमिति विऽमोक्तारं। उत्कूलनिकूलेभ्य इत्युत्कू
लऽनिकूलेभ्यः। त्रिष्ठिनं। त्रिस्थिनमिति त्रिऽस्थिनं॥ वपुषे। मानस्कृतं। मा
नःकृतमिति मनःऽकृतं। शीलाय। आंजनीकारीमित्यांजनीऽकारीं। नि
र्ऋत्या इति निःऽऋत्यै। कोशकारीमिति कोशऽकारीं। यमाय। असूं॥१२॥

यमाय। यमस्रमितियमऽस्रं। अथर्वभ्य इत्यथर्वऽभ्यः। अवतोकामित्य

वऽतोकां। संवत्सराय। पर्यायिणीं। पर्यायिनीम्मितिपरिऽआयिनीं। परि

वत्सरायेतिपरिऽवत्सराय। अविजातामित्यविऽजातं। इद्वावत्सराय।

अतीत्वरीमित्यतिऽइत्वरीं। इद्वत्सरायेतीत्ऽवत्सराय। अतिष्कद्वरीं। अ

तिस्कद्वरीमित्यतिऽस्कद्वरीं। वत्सराय। विजर्जरामितिविऽजर्जरां। सं

वत्सराय। पलिक्नीम्। ऋभुभ्य इत्यृभुऽभ्यः। अजिनसंधमित्यजिनऽ

संधं। साध्येभ्यः। चर्मम्नमितिचर्मऽम्नं। १३। सरोभ्य इतिसरःऽभ्यः। धैव

रं। उपस्थावराभ्य इत्युपऽस्थावराभ्यः। दाशं। वैशंताभ्यः। बैंदं। नड्वलाभ्यः।

२० शौष्कलं । पाराय । मार्गारं । अवाराय । कैवर्त्तं । तीर्थेभ्यः । आंदं । विषमेभ्यः । वि
समेभ्य इति वि ऽ समेभ्यः । मैनालं । स्वनेभ्यः । पर्णकं । गुहाभ्यः । किरातं । सा
नुभ्य इति सानु ऽ भ्यः । जंभकं । पर्वतेभ्यः । किंपूरुषं । किंपुरुषमिति किं ऽ पुरु
षं ॥१६॥ बीभत्सायै । पौल्कसं । वर्णाय । हिरण्यकारमिति हिरण्य ऽ कारं । तु
लायै । वाणिजं । पश्चादोषायेति पश्चाः ऽ दोषाय । ग्लाविनं । विश्वेभ्यः । भूते
भ्यः । सिध्मलं । भूत्यै । जागरणं । अभूत्यै । स्वपनं । आर्त्या इत्या ऽ र्त्यै ।
जनवादिनमिति जन ऽ वादिनं । व्यृध्या इति वि ऽ ऋध्यै । अपगल्भमित्यप ऽ २०
गल्भं । संशरायेति सं ऽ शराय । प्रच्छिदमिति प्र ऽ छिदं ॥१७॥ अक्षरा

जायेत्यक्षऽराजाय। कितवं। कृताय। आदिनवदर्शमित्यादिनवऽदर्शं।
त्रेतायै। कल्पिनं। द्वापराय। अधिकल्पिनमित्यधिऽकल्पिनं। आस्कंदा
येत्याऽस्कंदाय। सभास्थाणुमिति सभाऽस्थाणुं। मृत्यवे। गोव्यच्छमिति गोऽ
व्यच्छं। अंतकाय। गोघातमिति गोऽघातं। क्षुधे। यः। गां। विकृंतंतमि
ति विऽकृंतंतं। भिक्षमाणः। उपतिष्ठतीत्युपऽतिष्ठति। दुष्कृताय। दुः
कृतायेति दुःऽकृताय। चरकाचार्यमिति चरकऽआचार्यं। पाप्मने।
सैलगं॥१८॥ प्रतिश्रुत्काया इति प्रतिऽश्रुत्कायै। अर्त्तनं। घोषाय।
भषं। अंताय। बहुवादिनमिति बहुऽवादिनं। अनंताय। मूकं। शब्दाय।

आलंबराघातमित्यालंबराऽआघातं॥ महसे। वीणावादमिति वीणाऽवा
दं। क्रोशाय। तूणवध्ममिति तूणवऽध्मं। अवरस्पराय। अवरपरा
येत्यवरऽपराय। शंखध्ममिति शंखऽध्मं। वनाय। वनपमिति वनऽ
पं। अन्यतोरण्यायेत्यन्यतःऽअरण्याय। दावपमिति दावऽपं॥१९॥
नर्माय। पुंश्चलूं। हसाय। कारिं। यादसे। शाबल्यां। ग्रामण्यं। ग्राम
ण्यमिति ग्रामऽन्यं। गणकं। अभिक्रोशकमित्यभिऽक्रोशकं। तान्। मह
से। वीणावादमिति वीणाऽवादं। पाणिघ्नमिति पाणिऽघ्नं। तूणवध्ममि
ति तूणवऽध्मं। तान्। नृत्ताय। आनंदायेत्याऽनंदाय। तलवं॥२०॥ अ

[illegible]

ग्नये।पीवानं।पृथिव्यै।पीठसर्पिणमिति पीठःसर्पिणं।वायवे।चांडा
लं।अंतरिक्षाय।वंशनर्त्तिनमिति वंशऽनर्त्तिनं।दिवे।खलतिं।
सूर्याय।हर्यक्षमिति हरिऽअक्षं।नक्षत्रेभ्यः।किर्मिरं।चंद्रमसे।किला
सं।अह्ने।शुक्लं।पिंगाक्षमितिपिंगऽअक्षं।रात्र्यै।कृष्णं।पिंगाक्षमि
ति पिंगऽअक्षं॥२२॥अथ।एतान्।अष्टौ।विरूपानिति विऽरूपान्।
आ।लभते।अतिशुक्लमित्यतिऽशुक्लं।च।अतिकृष्णमित्यतिऽकृष्णं।
अतिदीर्घमित्यतिऽदीर्घं।अतिह्रस्वमित्यतिऽह्रस्वं।अतिस्थूलमि
त्यतिऽस्थूलं।अतिकृशमित्यतिऽकृशं।अतिकुल्वमित्यतिऽकुल्वं।अ

३२ तिल्लोमन्नुम्भित्यतिऽल्लोमन्नां। अश्रद्धाः। अब्राह्मणाः। ते। प्राजापसन्ति
प्रजाऽपस्याः॥ मागधः। पुंश्चली। क्लीबः। कितवः। अश्रद्धाः। अब्राह्म
णाः। ते। प्रजापस्याऽइति प्रजाऽपस्याः॥२०॥ इति पदपाठे चतुस्त्रिंशत्तमो
ध्यायः॥ ॥हरिः॥ ॐम्॥ श्री॥ सहस्रशीर्षेति सहस्रऽशीर्षा। पुरुषः।
सहस्राक्षइति सहस्रऽअक्षः। सहस्रपादिति सहस्रऽपात्॥ सः। भू
मिं। सर्वतः। स्पृत्वा। अति। अतिष्ठत्। दशांगुलमिति दशऽअंगुलं॥१॥
भाष्य पुरुषः। एव। इदं। सर्वं। यत्। भूतं। यत्। च। भाव्यं। उत। अमृतत्वस्ये ३२
त्यमृतऽत्वस्य। ईशानः। यत्। अन्नेन। अतिरोहतीत्यतिऽरोहति॥२॥
मिति भाष्यं

एतावान्।अस्य।महिमा।अतः।ज्यायान्।च।पूरुषः।पुरुष इति पुरुषः।पा
दः।अस्य।विश्वा।भूतानि।त्रिपादिति त्रिऽपात्।अस्य।अमृतं।दिवि।३।
त्रिपादिति त्रिऽपात्।ऊर्ध्वः।उत्।ऐत्।पुरुषः।पादः।अस्य।इह।अभव
त्।पुनरिति पुनः॥ततः।विष्वङ्।वि।अक्रामत्।साशनानशने इति सा
शनानशने।अभि॥४॥ततः।विराळिति विऽराट्।अजायत।विराज
इति विऽराजः।अधि।पूरुषः।पुरुष इति पुरुषः॥सः।जातः।अति।अ
रिच्यत।पश्चात्।भूमिं।अथो इत्यथो।पुरः॥५॥तस्मात्।यज्ञात्।सर्व
हु [illegible] तः।संभृतमिति संऽभृतं।पृषदाज्यमिति पृषत्ऽआज्यं॥

३३

पश्रून्। तान्। चक्रे। वायव्यान्। आरण्याः। ग्राम्याः। च। ये।।६।। तस्मात्। यज्ञा
त्। सर्वहुत इति सर्वऽहुतः। ऋचः। सामानि। जज्ञिरे। छंदांऽसि। जज्ञिरे।
तस्मात्। यजुः। तस्मात्। अजायत।।७।। तस्मात्। अश्वाः। अजायंत। ये।
प के। च। उभयादतः। उभयादत इत्युभयऽदतः।। गावः। जज्ञिरे। तस्मात्।
तस्मात्। जाताः। अजावयः।।८।। तं। यज्ञं। बर्हिषि। प्र। औक्षन्। पुरुषं। ह
जातं। अग्रतः। तेन। देवाः। अयजंत। साध्याः। ऋषयः। च। ये।।९।। यत्।
पुरुषं। वि। अदधुः। कतिधा। वि। अकल्पयन्। मुखं। किं। अस्य। आसीत्। बा
हू इति बाहू। ऊरू इत्यूरू। पादौ। उच्यते इत्युच्यते।।१०।। ब्राह्मणः। अस्य। मु

खं। आसीत्। बाहू इति बाहू। राजन्यः। कृतः। ऊरू इत्यूरू। तत्। अस्य।
यत्। वैश्यः। पद्भ्यामिति पत्ऽभ्यां। शूद्रः। अजायत॥११॥ चंद्रमाः। मन
सः। जातः। चक्षोः। सूर्यः। अजायत। श्रोत्रात्। वायुः। च। प्राणः।
च। मुखात्। अग्निः। अजायत॥१२॥ नाभ्याः। आसीत्। अंतरिक्षं। शीर्ष्णः।
द्यौः। सं। अवर्त्तत। पद्भ्यामिति पत्ऽभ्यां। भूमिः। दिशः। श्रोत्रात्। तथा।
लोकान्। अकल्पयन्॥१३॥ यत्। पुरुषेण। हविषा। देवाः। यज्ञं। अतन्व
त॥ वसंतः। अस्य। आसीत्। आज्यं। ग्रीष्मः। इध्मः। शरत्। हविः॥१४॥
सप्त। अस्य। आसन्। परिधय इति परिऽधयः। त्रिः। सप्त। समिध इति सं॥

२४ इध [illegible] ।। देवाः । यत् । यज्ञं । तन्वनाः । अबध्नन् । पुरुषं । पशुं ।। १५ ।। यज्ञेन ।
यज्ञं । ऽ । अयंत । देवाः । तानि । धर्माणि । प्रथमानि । आसन् ।। ते । ह । नाकं । म
हिमानः । सचंत । यत्र । पूर्वे । साध्याः । संति । देवाः ।। १६ ।। अद्भ्य इत्यत् ऽ
भ्यः । संभृत इति सं ऽ भृतः । पृथिव्यै । रसात् । च । विश्वकर्मण इति वि
श्व ऽ कर्मणः । सं । अवर्त्तत । अग्रे ।। तस्य । त्वष्टा ।। विदधदिति वि ऽ दधत् ।
रूपं । एति । तत् । मर्त्यस्य । देवत्वमिति देव ऽ त्वं । आजानमित्या ऽ जानं । अ
ग्रे ।। १७ ।। वेद । अहं । एतं । पुरुषं । महांतं । आदित्य वर्णमित्यादित्य ऽ वर्णं ।
तमसः । परस्तात् ।। तं । एव । विदित्वा । अति । मृत्युं । एति । न । अन्यः । पं २४

पन्थाः । विद्यते । अयनाय ॥१८॥ प्रजापतिरिति प्रजाऽपतिः । चरति । गर्भे । अं
तः । अजायमानः । बहुधा । वि । जायते ॥ तस्य । योनिं । परि । पश्यंति । धी
राः । तस्मिन् । ह । तस्थुः । भुवनानि । विश्वा ॥१९॥ यः । देवेभ्यः । आतपती
त्याऽतपति । यः । देवानां । पुरोहित इति पुरःऽहितः ॥ पूर्वः । यः । देवेभ्यः ।
जातः । नमः । रुचाय । ब्राह्मये ॥२०॥ रुचं । ब्राह्मं । जनयंतः । देवाः । अग्रे ।
तत् । अब्रुवन् ॥ यः । त्वा । एवं । ब्राह्मणः । विद्यात् । तस्य । देवाः । असन् ।
वशे ॥२१॥ श्रीः । च । ते । लक्ष्मीः । च । पत्न्यौ । अहोरात्रे इत्यहोरात्रे । पार्श्वे
इति [illegible]र्श्वे । नक्षत्राणि । रूपं । अश्विनौ । व्यात्तमिति विऽआत्तं । इष्णन् ।

इषाण। अमुं। मे। इषाण। सर्वलोकमिति सर्वऽलोकं। मे। इषाण॥२२॥ तत्।
एव। अग्निः। आदित्यः। वायुः। पूं इत्यूं। चंद्रमाः। शुक्रं। ब्रह्म। आपः। प्र
जापतिरिति प्रजाऽपतिः॥२३॥ सर्वे। निमेषा इति निऽमेषाः। जज्ञिरे। वि
द्युत इति विऽद्युतः। पुरुषात्। अधि। न। एनं। ऊर्ध्वं। न। तिर्यंचं। न। मध्ये।
परि। जग्रभत्॥२४॥ न। तस्य। प्रतिमेति प्रतिऽमा। अस्ति। यस्य। नाम।
महत्। यशः॥२५॥ एषः। ह। देवः। प्रदिश इति प्रऽदिशः। अनु। सर्वाः। पूर्वः।
ह। जातः। सः। उं इत्यूं। गर्भे। अंतरित्यंतः॥ सः। एव। जातः। सः। जनिष्य
माणः। प्रत्यङ्। जनाः। तिष्ठति। सर्वतोमुख इति सर्वतःऽमुखः॥२६॥ वेनः।

तत्।पश्यत्।निहितमिति निऽहितं।गुहा।सत्।यत्र।विश्वं।भवति।एकनी
ळमित्येकऽनीळं॥तस्मिन्।इदं।सं।च।वि।च।एति।सर्वं।सः।ओत इत्याऽ
उतः।प्रोतइति प्रऽउतः।च।विभूरिति विऽभूः।प्रजास्विति प्रऽजासु॥२७॥
प्र।तत्।वोचेत्।अमृतं।नु।विद्वान्।गंधर्वः।धाम।विभृतमिति विऽभृतं।
गुहा।सत्॥त्रीणि।पदानि।निहितेति निऽहिता।गुहा।आ।अस्य।यः।
तानि।वेद।सः।पितुः।पिता।असत्॥२८॥सः।नः।बंधुः।जनिता।सः।वि
धातेति विऽधाता।धामानि।वेद।भुवनानि।विश्वा॥यत्र।देवाः।अमृतं।आ
नशानाः।तृतीये।धामन्।अध्यैरयंतेत्यधिऽऐरयंत॥२९॥परीत्येति प

२६ रिऽइत्य। भूतानि। परीत्येति परिऽइत्य। लोकान्। परीत्येति परिऽइत्य। सर्वाः।
प्रदिश इति प्रऽदिशः। दिशः। च। उपस्थायेत्युपऽस्थाय। प्रथमजामिति प्र
थमऽजां। ऋतस्य। आत्मना। आत्मानं। अभि। सं। विवेश॥ ११॥ परि। द्यावा
पृथिवी इति द्यावापृथिवी। सद्यः। इत्वा। परि। लोकान्। परि। दिशः। परि।
स्वरिति स्वः॥ ऋतस्य। तंतुं। विततमिति विऽततं। विचृत्येति विऽचृत्य। त
त्। अपश्यत्। तत्। अभवत्। तत्। आसीत्॥ १२॥ सदसः। पतिं। अ
द्भुतं। प्रियं। इंद्रस्य। काम्यं॥ सनिं। मेधां। अयासिषं। स्वाहा॥ १३॥ यां। मे
धां। देवगणा इति देवऽगणाः। पितरः। च। उपासत इत्युपऽआसते। तया। २६

